DHVANYĀLOKA

OF

ĀNANDAVARDHANA

[UDDYOTA II]

EDITED
WITH AN ELABORATE ENGLISH EXPOSITION

BY

SRI BISHNUPADA BHATTACHARYA, M.A., P.R.S.,
ESHAN SCHOLAR, GRIFFITH PRIZEMAN, KĀVYATIRTHA.
Principal, Sanskrit College, Calcutta.

WITH A FOREWORD
BY

DR. SUSHIL KUMAR DE, M.A., P.R.S., D.Lit. (London)
PROFESSOR OF SANSKRIT LANGUAGE & LITERATURE,
DEPARTMENT OF POST-GRADUATE TRAINING
AND RESEARCH, SANSKRIT COLLEGE
CALCUTTA.



FIRMA K. L. MUKHOPADHYAY
CALCUTTA-12
1972

DHVANYĀLOKA

[UDDYOTA II]

TEXT & EXPOSITION



DHVANYĀLOKA
OF
ĀNANDAVARDHANA

[UDDYOTA II]

EDITED

WITH AN ELABORATE ENGLISH EXPOSITION

BY

SRI BISHNUPADA BHATTACHARYA, M.A., P.R.S.,
ESHAN SCHOLAR, GRIFFITH PRIZEMAN, KAVYĀTIRTHA.
Principal, Sanskrit College, Calcutta.

WITH A FOREWORD

BY

DR. SUSHIL KUMAR DE, M.A., P.R.S., D.Lit. (London)
PROFESSOR OF SANSKRIT LANGUAGE & LITERATURE,
DEPARTMENT OF POST-GRADUATE TRAINING
AND RESEARCH, SANSKRIT COLLEGE
CALCUTTA.



FIRMA K. L. MUKHOPADHYAY
CALCUTTA-12
1972

Published by
K. L. Mukhopadhyay
Calcutta-12

First Edition, June 1957
Reprint 1972



Printed by :
Alfa Offset Printers
4708, Hauz Quazi
DELHI-6.

Preface to the Second Uddyota.

The present fasciculus comprises the Second Uddyota of the *Dhvanyāloka*, the publication of which was announced several months ago in the Preface to the First Uddyota. In preparing the present Uddyota the author has tried to utilise the collations of manuscripts in the possession of Dr. Sushil Kumar De, the following being particularly important :—

A—India Office MS. No. 1008 E 1135 (Devanāgarī).

B—Bhandarkar Oriental Institute MS. No. 257 of 1875-76 (S'āradā script).

C—Do. No. 255 of 1875-76.

D—Do. No. 256 of 1875-76. (S'āradā script).

The author has tried to make the Supplementary notes appended at the end of the volume as much exhaustive and helpful as possible, important textual variants being noticed with care whenever necessary.

The author takes this opportunity to acknowledge his heartfelt gratitude to all oriental scholars and students of Sanskrit Poetics, who have received these humble efforts of his with enthusiasm and favour and his indebtedness to his teachers, who have all along encouraged him in his arduous task. God willing, the remaining Uddyotas would also be published in due course.

Sanskrit College,
May 15, 1957.

Bishnupada Bhattacharya

CONTENTS

		Pages
1.	Preface	iii
2.	Text and Exposition	1—141
3.	Appendices :	
	(i) Appendix I : Supplementary Notes.	145—168
	(ii) Appendix II	169—172
	(a) Alphabetical Index of *Kārikās*.	
	(b) Alphabetical Index of *Vṛtti*-verses.	
	(c) Alphabetical Index of Illustrative Quotations in the *Vṛtti*.	

DHVANYĀLOKA

[UDDYOTA II]

TEXT

§ १। एवमविवक्षितवाच्य-विवक्षितान्यपरवाच्यत्वेन ध्वनिर्द्विप्रकारः प्रकाशितः। तत्राविवक्षितवाच्यस्य प्रभेदप्रतिपादनायेदमुच्यते—

अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम्।
अविवक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा मतम् ॥१॥

तथाविधाभ्यां च ताभ्यां व्यङ्ग्यस्यैव विशेषः॥

EXPOSITION

§ 1. We have already noted in our notes on the last *Uddyota* (I. Sec. § 41) that classification of *dhvani* into अविवक्षितवाच्य and विवक्षितान्यपरवाच्य varieties was shown by the *Vṛttikāra* in anticipation of the *Kārikākāra's* view expressed later on, though the latter was completely silent on the point in that *Uddyota*. In this opening *kārikā* of the Second *Uddyota* the *Kārikākāra* shows the classification as already noticed by the *Vṛttikāra* beforehand. Compare Abhinavagupta's remarks :

"वृत्तिकारः सङ्गतिमुद्द्योतस्य कुर्वाण उपक्रमते—एवमित्यादि। प्रकाशित इति। मया वृत्तिकारेण सतेति भावः। न चैतन्मयोत्सूत्रमुक्तम्, अपि तु कारिकाकाराभिप्रायेणेत्याह—तत्रेति। तत्र द्विप्रकार-प्रकाशने वृत्तिकारकृते यन्निमित्तं बीजभूतमिति सम्बन्धः। यदि वा—तत्रेति पूर्वशेषः। तत्र प्रथमोद्द्योते वृत्तिकारेण प्रकाशितस्य अविवक्षितवाच्यस्य यः प्रभेदोऽवान्तरप्रकारस्तत्प्रतिपादनायेदमुच्यते।

तदवान्तरभेदप्रतिपादनद्वारेण अविवक्षितवाच्यस्य यः प्रभेदो विवक्षितवाच्यात् प्रभिन्नत्वं तत्प्रतिपादनायेदमुच्यते । भवति मूलतो द्विभेदत्वं कारिकाकारस्यापि सम्मतमेवेति भावः ॥"—*Op. cit.*, pp. 165-166.

In the present *kārikā* the *Kārikākāra* mentions the two subdivisions (अवान्तर-भेद) of the अविवक्षित-वाच्य variety of *dhvani*. They are—(1) अर्थान्तरसंक्रमितवाच्य-ध्वनि, and (2) अत्यन्ततिरस्कृतवाच्य-ध्वनि. Abhinavagupta in his °*Locana* admirably brings out the characteristic features of each of these two sub-varieties. Comp : "......येन वाच्येन अविवक्षितेन सताऽविवक्षितवाच्यो ध्वनिर्व्यपदिश्यते, तद् वाच्यं द्विधेति सम्बन्धः । योऽर्थ उपपद्यमानोऽपि तावतैवानुपयोगात् धर्मान्तरसंवलनयाऽन्यतामिव गतो लक्ष्यमाणोऽनुगतधर्मी स्रक्सूत्रन्यायेनास्ते स रूपान्तरपरिणत उक्तः । यस्तु अनुपद्यमान उपायतामात्रेण अर्थान्तरप्रतिपत्तिं कृत्वा पलायत इव स तिरस्कृत इति ॥"—*Op. cit.*, pp. 166-67. Thus, while in the first sub-variety of अविवक्षितवाच्य-ध्वनि the वाच्य sense, though not totally incompatible, is transformed into one characterised by new attributes, in the second sub-variety the वाच्य sense is totally incompatible and as such has to be abandoned altogether, being used only as a means towards the comprehension of the suggested sense.

तथा....विशेषः—Now, it might be contended that in the present *kārikā* the author has shown the two-fold division of the expressed sense (वाच्यार्थ) only. So, how can it be construed as referring to the classification of the suggested sense (ध्वनि) ? To this the *Vṛttikāra* replies by pointing out that as the nature of the suggested sense (व्यङ्ग्य) also differs according as the suggestive elements (व्यञ्जक) like वाच्य, वाचक etc. vary, there can be no incongruity in construing the *kārikā* as referring to the main classifications of the suggested sense. Compare : "ननु व्यङ्ग्यात्मनो यदा ध्वनेर्भेदो निरूप्यते तदा वाच्यस्य

द्विधेति भेदकथनं न संगतमित्याशङ्क्याह—**तथाविधाभ्यां** चेति । चो यस्मादर्थे । व्यञ्जकवैचित्र्याद्धि युक्तं व्यङ्ग्यवैचित्र्यमिति भावः । व्यञ्जके त्वर्थे यदि ध्वनिशब्दस्तदा न कश्चिद् दोष इति भावः ॥—°*Locana*, p. 167.

TEXT

§ २। तत्रार्थान्तरसंक्रमितवाच्यो यथा—

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव ॥

—इत्यत्र राम-शब्दः। अनेन हि व्यङ्ग्यधर्मान्तरपरिणतः संज्ञी प्रत्याय्यते, न संज्ञिमात्रम् ॥

EXPOSITION

§ 2. The speaker of the verse quoted is Rāma himself. So, if the संज्ञा (Proper name) राम in the expression रामोऽस्मि सर्वं सहे referred to the person bearing that name only and nothing else, then the use of such a word would have been regarded as faulty. But, here, the word राम does not merely convey the primary sense-viz. Daśaratha's son, who is the संज्ञिन् referred to by the संज्ञा राम, but the latter as characterised by such attributes (धर्म) as सकलदुःखभाजनत्व, राज्यनिर्वासितत्व etc. Thus the वाच्यार्थ is transformed (परिणत) from a mere संज्ञिन् to some other sense which includes within its scope the expressed sense-viz. संज्ञिन् itself (Rāma in the present instance) as well. The attributes (धर्म) are, however, comprehended through *suggestion* (व्यञ्जना). अनेन हि......संज्ञिमात्रम्—परिणाम or *transformation* has a technical sense in *Sāṁkhya* philosophy, which is also applicable here. Compare :—

"जहद् धर्मान्तरं पूर्वमुपादत्ते यदा ह्ययम् ।
तत्वादप्रच्युतो धर्मी परिणामः स उच्यते ।."
—(Quoted by Jayaratha in his *Vimarśinī*, p. 41)

Abhinavagupta thus explains the *vṛtti* : अनेनेति रामशब्देन अनुपपद्यमानार्थेनेति भावः। व्यङ्ग्य धर्मान्तरं प्रयोजनरूपं राज्य-निर्वासनादि असंख्येयम् । तच्चासंख्यत्वाद् अभिधाव्यापारेण अशक्य-समर्पणम् । क्रमेणार्प्यमाणमपि एकधीविषयत्वाभावान्न चित्रचर्वणा-पदमिति न चारुत्वातिशयकृत् । प्रतीयमानं तु तदसंख्यमनुद्भिन्न-विशेषत्वेनैव किं किं रूपं न सहते इति चित्रपानकरसापूपगुडमोदक-स्थानीयविचित्रचर्वणापदं भवति । यथोक्तम्—'उक्त्यन्तरेणाशक्यं यद्' इति । एष एव सर्वत्र प्रयोजनस्य प्रतीयमानत्वेनोत्कर्षहेतु-र्मन्तव्यः । मात्रग्रहणेन संज्ञी नात्र तिरस्कृत इत्याह ।।"—*Op. cit.*, pp. 169-70. Compare also Govinda Ṭhakhura's *Kāvya-pradīpa* "रामपदं च सर्वसहत्वानुपयुक्तशक्यार्थतया सकलदुःखभाजनत्वं लक्षयत् सीतां विनाऽपि जीविष्यामीति व्यञ्जयदेव विप्रलम्भं व्यनक्ति ।"—p. 132. We are to note that Govinda regards the attributes सकल-दुःखभाजनत्व etc. as लक्ष्य, while according to the *Vṛttikāra* they are व्यङ्ग्य. (Comp. व्यङ्ग्यधर्मान्तरपरिणतः above).

TEXT

§ ३ । यथा च ममैव विषमबाणलीलायाम्—
ताला जाअन्ति गुणा जाला दे सहिअएहिं घेप्पन्ति ।
रइकिरणानुग्गहिआइं होन्ति कमलाइं कमलाइं ॥[1]
—इत्यत्र द्वितीयः कमलशब्दः ।।

EXPOSITION

§ 3. In this verse the second कमल signifies not merely

---

1. तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते ।
रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि ।।इति च्छाया।।

'a lotus' but 'a lotus as possessing attributes like सौरभ (fragrance), सौकुमार्य (tenderness) etc.' Compare: "अत्र द्वितीयकमलशब्दः सौरभादिगुणयुक्तत्वरूपे लक्ष्ये संक्रमितवाच्यः"—*Pradipa*, p. 58.[1] The verse is really an instance of लाटानुप्रास, for the word कमल though repeated twice has a different significance (तात्पर्य) in each case and as such there is no defect because of *repetition* (पौनरुक्त्य). Compare *Ekāvalī* in which this verse is cited under the figure of speech लाटानुप्रास—"अत्र प्रथमः कमलशब्दो वस्तुमात्राभिधायी। द्वितीयस्तु सौरभ-सौकुमार्य-कान्तिमत्त्व-संभावित-कान्तावदनोपमानत्वादिधर्मरूपार्थ इत्यस्त्येव तात्पर्यभेदः॥"—*Op. cit.*, p. 194.

TEXT

§ ४। अत्यन्ततिरस्कृतवाच्यो यथादिकवेर्वाल्मीकेः—

रविसंक्रान्तसौभाग्यस्तुषारावृतमण्डलः।

निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ॥इति।[2]

अत्रान्धशब्दः॥

EXPOSITION

§ 4. The term अन्ध is a privative term and as such presupposes the capacity for seeing, which the looking glass (आदर्श) totally lacks. The primary sense is therefore to be abandoned altogether in favour of a more suitable sense, which does not comprise within its scope the primary sense (मुख्यार्थ) of अन्ध. Thus it is designated as अत्यन्ततिरस्कृतवाच्य, which is based on जहत्स्वार्थ-लक्षणा or लक्षण-लक्षणा,

---

1. "अनुगृहीतानि स्पृष्टानि कमलानि कमलानि सुरभीणि आह्लादकानि वा भवन्ति। अत्र अतथाभूतेषु कमलत्वजात्यभावो व्यङ्ग्यः कमलपदलक्षणालभ्यः। अत्र रविकिरणाननुग्रहेण न केवलं सौरभादिगुणहानिः, अपि तु कमलत्वसामान्यान्तर्गतिरपि नेति लक्षणामूलध्वनिः"—Vaidyanātha Tatsat's '*Prabhā*' thereon.

2. *Rāmāyaṇa*, III. 16.13 : हेमन्तवर्णने पञ्चवट्यां रामस्योक्तिरियम्—*Locana*.

as has been pointed out in our previous notes. Compare *°Locana* :

"अन्ध इति चोपहतदृष्टिः। जात्यन्धस्यापि गर्भे दृष्टयुपघातात्। अन्धोऽयं पुरोऽपि न पश्यति-इत्यत्र तिरस्कारोऽन्धार्थस्य न त्वत्यन्तम। इह तु आदर्शस्य अन्धत्वमारोप्यमाणमपि न सह्यमिति। अन्ध-शब्दोऽत्र पदार्थस्फुटीकरणाशक्तत्वं नष्टदृष्टिगतं निमित्तीकृत्य आदर्शं लक्षणया प्रतिपादयति। असाधारणविच्छायत्वानुपयोगित्वादिधर्म-जातमसंख्यं प्रयोजनं व्यनक्ति ॥"—*Op. cit.*, p. 172.

Bhaṭṭanāyaka, however, construes इव with निःश्वासान्धः, instead of taking the latter as an adjective qualifying आदर्श, so that the verse is reduced to an illustration of the figure of speech उत्प्रेक्षा. But Abhinavagupta points out the flaws of such an interpretation, as the construction would then be unnecessarily strained. Compare :—

"भट्टनायकेन तु यदुक्तम्—'इवशब्दयोगाद् गौणताऽप्यत्र न काचिद्' इति, तच्छ्लोकार्थमपरामृश्य। आदर्शचन्द्रमसोर्हि सादृश्य-मिवशब्दो द्योतयति। 'निःश्वासान्ध' इति चादर्शविशेषणम। इव-शब्दस्य अन्धार्थेन योजने आदर्शश्चन्द्रमा इत्युदाहरणं भवेत्। योजनं चैतदिवशब्दस्य क्लिष्टम्। न च निःश्वासेनान्ध इवादर्शः, स इव चन्द्रमा इति कल्पना युक्ता। जैमिनीयसूत्रे ह्येवं योज्यते न काव्येऽपीत्यलम् ॥"—*Op. cit.*, pp. 172-73.

TEXT

§ ५। गअणं च मत्तमेहं धारालुलिअज्जुणाइं अ वणाइं।
णिरहङ्कारमिअङ्का हरन्ति नीलाओ वि णिसाओ ॥[1]

अत्र मत्त-निरहङ्कार-शब्दौ ॥

---

1. गगनं च मत्तमेघं धारालुलितार्जुनानि च वनानि।
निरहङ्कारमृगाङ्का हरन्ति नीला अपि निशाः ॥ संस्कृतच्छाया ॥
-हरन्ति उत्सुकयन्तीत्यर्थः :— *Locana.*

EXPOSITION.

§ 5. मत्तता and अहंकार are primarily attributes of animate and sentient beings, and as they are applied in this verse to मेघ and मृगाङ्क (moon), both being inane objects, they must abandon their primary significance in favour of their implied senses, which do not comprehend within their scope even the least shred of the primary meanings. Compare :—

"मत्तशब्देन सर्वथैवेहासम्भवत्स्वार्थेन बाधितमद्योपयोगक्षीवात्मकमुख्यार्थेन सादृश्यात् मेघाल्लँक्षयताऽसमञ्जसकारित्व-दुर्निवारत्वादि-धर्मसहस्रं ध्वन्यते । निरहङ्कारशब्देनापि चन्द्रं लक्षयता तत्पारतन्त्र्यविच्छायत्वोज्जिगमिषारूपजिगीषात्यागप्रभृतिः ॥"—*°Locana*. p. 173

TEXT

§ ६ । असंलक्ष्यक्रमोद्द्योतः क्रमेण द्योतितः परः ।
विवक्षिताभिधेयस्य ध्वनेरात्मा द्विधा मतः ॥२॥

मुख्यतया प्रकाशमानो व्यङ्ग्योऽर्थो ध्वनेरात्मा । स च वाच्यार्थापेक्षया कश्चिदलक्ष्यक्रमतया प्रकाशते, कश्चित् क्रमेणेति द्विधा मतः ॥

EXPOSITION

§ 6. Having thus illustrated in the preceding sections the varieties of the अविवक्षितवाच्य ध्वनि, the *Dhvanikāra* proceeds to the treatment of the other main division of ध्वनि—viz. विवक्षितान्यपरवाच्य. This is not based on Indication or लक्षणा as the first variety is, and as such the primary sense is neither *altogether repudiated* (अत्यन्ततिरस्कृत) nor *transformed* (अर्थान्तरसंक्रमित). The expressed sense has its importance *per se*. But the ultimate object of our cognition is the suggested sense. The latter again may be two-fold—considered from the standpoint of the *sequence* (क्रम)

that intervenes between the cognitions of the वाच्य and व्यङ्ग्य senses. If the sequence is imperceptible—we have the असंलक्ष्यक्रम-variety, which comprises रस, भाव, रसाभास, भावाभास, भावोदय, भावशान्ति, भावशबलता etc.; if, however, the intervening sequence be perceptible, it is known as संलक्ष्यक्रम which might take *either* the form of वस्तुध्वनि *or* of अलंकारध्वनि. °*Locana* explains the term असंलक्ष्यक्रमोद्योत as—"सम्यङ् न लक्षयितुं शक्यः क्रमो यस्य तादृश उद्द्योत उद्द्योतन-व्यापारोऽस्येति बहुव्रीहिः।"

TEXT

§७। तत्र—

रस-भाव-तदाभास-तत्प्रशान्त्यादिरक्रमः।

ध्वनेरात्माऽङ्गिभावेन भासमानो व्यवस्थितः ॥३॥

रसादिरर्थो हि सहैव वाच्येनावभासते। स चाङ्गित्वेनावभास-मानो ध्वनेरात्मा ॥

EXPOSITION

§ 7. In the present *Kārikā* the *Dhvanikāra* mentions the principal varieties of the असंलक्ष्यक्रमध्वनि. भावध्वनि has been defined by Jagannātha as—विभावादिव्यज्यमानहर्षाद्यनतमत्वं तत्त्वम् (i.e. भावध्वनित्वम्)—"when any one of the thirty-three *vyabhicārins* enumerated by Bharata bcomes manifested by the विभावs and अनुभावs pertaining to it, it is called भावध्वनि (as opposed to रसध्वनि which arises when any one of the eight or nine *sthāyins* is mainly suggested)." For रसाभास and भावाभास compare: 'अनौचित्यप्रवृत्तत्वे आभासो रस-भावयोः'. For the concepts of भावोदय and भावसन्धि as alluded to in the expression 'तत्प्रशान्त्यादिरक्रमः' *see Locana*: 'यद्यपि च रसेनैव सर्वं जीवति काव्यम्, तथापि तस्य रसस्यैकघन-चमत्कारात्मनोऽपि कुतश्चिदंशात् प्रयोजकीभूतादधिकोऽसौ चमत्-

कारो भवति। तत्र यदा कश्चिदुद्रिक्तावस्थां प्रतिपन्नो व्यभिचारी चमत्कारातिशयप्रयोजको भवति, तदा भावध्वनिः। यथा—

तिष्ठेत् कोपवशात् प्रभावपिहिता दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः।
तां हर्त्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्त्तिनीं
सा चात्यन्तमगोचरं नयनयोर्यातेति कोऽयं विधिः॥ [1]

अत्र हि विप्रलम्भरससद्भावेऽपीयति वितर्काख्यव्यभिचारिचमत्क्रियाप्रयुक्त आस्वादातिशयः। व्यभिचारिण उदयस्थित्यपायत्रिधर्मकाः। यदाह—'विविधमाभिमुख्येन चरन्तीति व्यभिचारिणः' इति। तत्रोदयावस्थाप्रयुक्तः कदाचित्। यथा—

याते गोत्रविपर्यये श्रुतिपथं शय्यामनुप्राप्तया
निध्यातं परिवर्त्तनं पुनरपि प्रारब्धुमङ्गीकृतम्।
भूयस्तत् प्रकृतं कृतं च शिथिलक्षिप्तैकदोर्लेखया
तन्वङ्ग्या न तु पारितः स्तनभरः क्रष्टुं प्रियस्योरसः॥

अत्र हि प्रणयकोपस्योज्जिगमिषयैव यदवस्थानं न तु पारित इत्युदयावकाशनिराकरणात्तदेवास्वादजीवितम्।..क्वचित्तु व्यभिचारिणः प्रशमावस्थया प्रयुक्तश्चमत्कारः।..क्वचित्तु व्यभिचारिणः सन्धिरेव चर्वणास्पदम्।...क्वचिद् व्यभिचार्यन्तरशबलतैव विश्रान्तिपदम्। यथा—

क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा।
दोषाणां प्रशमाय मे श्रुतमहो कोपेऽपि कान्तं मुखम्।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा
चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति॥ [2]

अत्र हि वितर्कौत्सुक्ये मतिस्मरणे शङ्कादैन्ये धृतिचिन्तने परस्परं बाध्यबाधकभावेन द्वन्द्वशो भवन्ती पर्यन्ते तु चिन्ताया एव प्रधानतां

1. *Vikrmorvaaśī*, Act IV.
2. *Ibid*, Act IV.

ददती परमास्वादस्थानम् । एवमन्यदप्युत्प्रेक्ष्यम् । एतानि चोदयसन्धि-शबलत्वादिकानि कारिकायामादिग्रहणेन गृहीतानि ॥"—*Op. cit.*, pp. 175-177.

रस, भाव etc. are called अक्रम (i.e. अक्रम-व्यङ्ग्य) as the interval between the cognition of the विभाव's, अनुभावs etc. on the one hand and that of the former, though it actually exists, is so small that it is quite imperceptible and can be easily reckoned as *nonest*. The negative particle (नञ्) in the term अक्रम conveys the idea of *small-ness* (ईषदर्थ). Caṇḍīdāsa in his commentary on Mammaṭa's *Kāvyaprakāśa* notes: "अक्रम इति नञ् ईषदर्थेऽज्ञेयतापरम् ।'—p. 92. The negative particle नञ् has six different senses. Compare; "तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः ॥"—Abhinavagupta here remarks that though रस, भाव etc. are usually known as अक्रम, still that does not exclude them from the category of संलक्ष्यक्रमध्वनि. Under certain circumstances they might be classed with वस्तुध्वनि and अलंकारध्वनि as falling under the latter. Compare: "यो रसादिरर्थः स एवाक्रमो ध्वनेरात्मा न त्वक्रम एव सः । [स]क्रमत्वमपि तस्य कदाचिद् भवति । तदा चार्थशक्त्युद्भवानुस्वानरूपभेदतेति वक्ष्यते ॥—*Op. cit.*, p. 174. Usually as soon as we read a poem we become, as it were, *simultaneously* aware of the *emotions* (रस) etc. That is why they are called अक्रमव्यङ्ग्य. But in cases where there is a perceptible interval between the cognition of the expressed sense of a poem (consisting of such factors as विभाव's, अनुभाव's etc.) and that of the emotions suggested by it, the latter might reasonably be regarded as instances of संलक्ष्यक्रमव्यङ्ग्य.[1]

---

1. Compare: सोऽयं निगदितः सर्वोऽपि रत्यादिलक्षणो व्यङ्ग्यप्रपञ्चः स्फुटे प्रकरणे झटिति प्रतीतेषु विभावानुभावव्यभिचारिषु सहृदयतमेन प्रमात्रा सूक्ष्मेणैव समयेन प्रतीयत इति हेतुहेतुमतोः पौर्वापर्यक्रमस्यालक्षणादलक्ष्यक्रमो

स चाङ्गित्वेन..ध्वनेरात्मा—रस etc. constitute the soul of poetic art, subject to this important *proviso*, viz. that they are *predominant* over all other elements and subservient to none. As Abhinavagupta remarks. ननु किं सर्वदैव रसादिरर्थो ध्वनेः प्रकारः? नेत्याह। किं न यदाऽङ्गित्वेन प्रधानत्वेनावभासमानः। एतच्च सामान्यलक्षणे 'गुणीकृतस्वार्थौ'वित्यत्र यद्यपि निरूपितम्, तथापि रसवदाद्यलंकारप्रकाशनावकाशदानायानूदितम्॥"—*Op. cit.*, pp. 174-75.

TEXT

§ ८। इदानीं रसवदलंकारादलक्ष्यक्रमद्योतनात्मनो ध्वनेर्विभक्तो विषय इति प्रदर्श्यते—

वाच्यवाचकचारुत्वहेतूनां विविधात्मनाम्।
रसादिपरता यत्र स ध्वनेर्विषयो मतः॥४॥

रस-भाव-तदाभास-तत्प्रशमलक्षणं मुख्यमर्थमनुवर्त्तमाना यत्र शब्दार्थालङ्कारा गुणाश्च परस्परं ध्वन्यपेक्षया विभिन्नरूपा व्यवस्थितास्तत्र काव्ये ध्वनिरिति व्यपदेशः॥

EXPOSITION

§ 8. In the preceding *kārikā* it has been hinted at that रस etc. would be regarded as cases of ध्वनि only when they are predominant (अङ्गिन्) and all other elements like the poetic figures (अलंकार's) belonging both to वाच्य and वाचक are subordinate. The present *kārikā* explicitly states what was implicit in the preceding *kārikā* with a view to differentiating a case of रसध्वनि proper which is असंलक्ष्यक्रम from

---

व्यपदिश्यते। यत्र तु विचारवेद्यं प्रकरणम्, उन्नेया वा विभावादयस्तत्र सामग्रीविलम्बाधीनं चमत्कृतेर्मान्थर्य्यमिति संलक्ष्यक्रमोऽप्येष भवति॥—*Rasagangādhara*, p. 129. *See* also *Dhvanyāloka-Vṛtti* on the verse 'एवंवादिनि देवर्षौ—' (*Kumāra*°, VI. 84) and °*Locana* thereon (*Uddyota* II, p. 248).

रसवत् etc. which are no more cases of ध्वनि than such common figures of speech as उपमा, अनुप्रास etc. In instances of रसवत्, प्रेयस्, ऊर्जस्विन् etc. रस, भाव etc. are comprehended no doubt, but all the same they only serve to enhance the beauty of the expressed sense just as poetic figures like अनुप्रास, उपमा etc. beautify the words and ideas to which they belong. But in a case of रसध्वनि (भावध्वनि etc.), it is the aesthetic emotion that occupy all our conscious activities, while the expressed sense and the various figures of speech dwindle into insignificance, and merge their individualities towards the highest end in view—viz. the suggestion of the aesthetic emotion, so that the individual charms of the particular figures of speech are not relished apart from the aesthetic relish, or as in any way surpassing it. This, however, is not the case in instances of रसवत्, प्रेयस् etc., and as such they can never be regarded as रसध्वनि, भावध्वनि, etc. While in the latter रस (भाव etc.) is the soul (अङ्गिन्), in the former it is in the position of a mere constituent element (अङ्ग), and that makes all the difference. Compare : °*Locana* : "ननु अङ्गित्वेनावभासमान इत्युच्यते। तत्राङ्गत्वमपि किमस्ति रसादेर्येन तन्निराकरणाय एतद्विशेषणमित्यभिप्रायेण उपक्रमते—**इदानीम्** इत्यादिना। अङ्गत्वमस्ति रसादीनां रसवत्-प्रेय-ऊर्जस्वि-समाहितालंकाररूपतायामिति भावः। अनया च भङ्ग्या रसवदादिष्वलंकारेषु रसादिध्वनेर्नान्तर्भावः इति सूचयति। पूर्वं हि समासोक्त्यादिषु वस्तुध्वनेर्नान्तर्भाव इति दर्शितम्। वाच्यं च वाचकं च तच्चारुत्वहेतवश्चेति द्वन्द्वः। वृत्तावपि शब्दाश्च अर्थाश्च अलंकाराश्चेति द्वन्द्वः॥"—*Op. cit.*, p. 180. °*Pradīpa* too remarks :—

"एते च गुणीभूता रसादयो रसवदाद्यलंकारव्यपदेशं लभन्ते। ननु गुणीभूतो रसो रसवत्, भावस्तु प्रेयः, रसभावाभासौ ऊर्जस्वि,

भावशान्तिः समाहितः—इत्यस्त्येव पूर्वेषामलंकारव्यवहारः, न पुनर्भावोदयादिषु । तत् कथमेतदुच्यते इति चेत् । यद्यन्यवचनं विना मद्वचसि नादरस्तर्हि कश्चित् प्रेक्षावानवश्यं ब्रूयात् 'रसादिना तुल्यन्यायत्वात्' इति ।"[1]

TEXT

६ । प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः ।
काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः ॥५॥

यद्यपि रसवदलंकारस्यान्यैर्दर्शितो विषयस्तथापि यस्मिन् काव्ये प्रधानतयाऽन्योऽर्थो वाक्यार्थीभूतस्तस्य चाङ्गभूता ये रसादयस्ते रसादेरलंकारस्य विषया इति मामकीनः पक्षः । तद्यथा चाटुषु प्रेयोऽलंकारस्य वाक्यार्थत्वेऽपि रसादयोऽङ्गभूता दृश्यन्ते ॥

EXPOSITION

§ 9. In the present *kārikā* the *Dhvanikara* expresses his own opinion concerning the true nature of the figures of speech रसवत् etc. When रस, भाव etc. are subordinate to some other element in poetry—whether it be वाच्यार्थ or some other व्यङ्ग्यार्थ, we get the figures of speech रसवत् etc., instead of रसध्वनि etc. Thus the figures of speech रसवत् etc. are instances of अपराङ्ग variety of गुणीभूतव्यङ्ग्य just as समासोक्ति पर्यायोक्त etc. have been shown to be the instances of the same category on account of the suggested sense (viz. वस्तु) being subservient to the expressed sense. Compare 'अपरस्य रसादेर्वाच्यस्य वा (वाक्यार्थीभूतस्य) अङ्गं रसादि अनुरणनरूपं वा । ....एते च रसवदाद्यलंकाराः ॥'—*Kāvyaprakāśa*, Chap. V.

यद्यपि रसवदलंकारस्य....मामकीनः पक्ष :—The treatment of

---

1. Compare Rūyyaka's *Alaṁkārasarvasva* : "भावोदयो भावसन्धिर्भावशबलता च पृथगलंकाराः । एते च पृथग् रसवदादिभ्यो भिन्नालंकाराः । एतत्प्रतिपादनं च उद्भटादिभिरेषां पृथगलंकारत्वेन अनिर्दिष्टत्वात् ॥"—*Op. cit.*, pp. 190–91.

the figures of speech रसवत् etc. as found in the works of the *Dhvani* school varies from that as recorded in the works of the earlier authors like Bhāmaha, Udbhaṭa, Daṇḍin and others. रसवत् as defined by the ancients does not in any way differ from रसध्वनि of the followers of the Dhvani school, i.e. according to them in रसवत्, the sentiments like शृङ्गार, करुण etc. are primarily developed which is just the case in रसध्वनि as well. But the view of the Dhvani-theorists does not correspond with this position of the ancients with regard to रसवत् etc. According to the *Dhvanikāra* and his followers *rasa* etc., when primarily developed (अभिव्यक्त), can never be regarded as mere embellishments (अलंकार) and classed in the same rank with the ordinary figures of speech like उपमा, अनुप्रास etc. They are the very *soul* (आत्मा) of poetry, and excel in charm all other poetic elements like गुण, अलंकार, रीति etc. Without *rasa* poetic art is like a human body without a *soul*, howsoever adorned it might be with precious ornaments. But when रस etc. are not primarily relished but made subservient to the *expressed sense* or some other *suggested sense* (व्यङ्ग्यार्थ), they cannot claim to be reckoned as the soul as in the previous variety, but are regarded as mere figures of speech. This change in outlook accounts for the difference between the respective treatments of the ancients and the moderns (viz. the *Dhvanikāra* and his followers) with regard to the figures of speech रसवत्, प्रेय: etc. The view that sentiments like शृङ्गार etc. when primarily developed constitute the soul of a *kāvya* had not yet dawned upon the predecessors of the *Dhvānikara*, and this lack of scientific outlook was responsible for their muddled opinion. Pratīhārendurāja in his commentary on Udbhaṭa's *Kāvyālaṃkāra-Sāra-Saṃgraha* succinctly hints at this problem, without any comments thereon. Compare :—

"रसानां भावानां च काव्यशोभातिशयहेतुत्वात् किं काव्यालंकारत्वम् उत काव्यजीवितत्वम् इति न तावद् विचार्यते ग्रन्थगौरवभयात्। रसभावस्वरूपं चात्र न विवेचितमप्रकृतत्वाद् बहुवक्तव्यत्वाच्च ॥—*Op. cit.*, p. 54.

We might quote however the following extract from the same work as it is highly illuminating and has a good deal of bearing on the present issue :—

"लक्ष्ये तु अलंकाररहितमपि केवलगुणसत्क्रियमाणशब्दार्थशरीरं काव्यं दृश्यते। यथा अमरुकस्य कवेरनिबद्धशृङ्गाररसस्यन्दी श्लोकः—

'कथमपि कृतप्रत्यापत्तौ प्रिये स्खलितोत्तरे—' इति।[1]

न खलु अत्रार्थालंकारः कश्चित् परिदृश्यते। अथ माधुर्यौजोभ्यां परिवृंहितस्य प्रसादस्य विद्यमानत्वात् काव्यरूपता, ननु चात्रापि ईर्ष्याविप्रलम्भ-विरहविप्रलम्भशृंगाराभ्यां स्वतिरोधानेनोपकृतः संभोगशृङ्गारो नायिकानिष्ठो निबद्धस्तद्योगाच्च रसवत्त्वमलंकारो भविष्यति।......तत् कथमत्र निरलंकारता उक्ता। उच्यते। न खलु काव्यस्य रसानां च अलंकार्यालंकारभावः। किं तु आत्मशरीरभावः। रसा हि काव्यस्यात्मत्वेनावस्थिताः, शब्दार्थौ च शरीररूपतया। यथा हि आत्माधिष्ठितं शरीरं जीवतीति व्यपदिश्यते, तथा रसाधिष्ठितस्य काव्यस्य जीवद्रूपतया व्यपदेशः क्रियते। तस्माद् रसानां काव्यशरीरभूतशब्दार्थविषयतयाऽऽत्मत्वेनावस्थानं न त्वलंकारतया। रसाभिव्यक्तिश्च यथायोगं माधुर्यौजोभ्यां तारतम्येनावस्थिताभ्यामुपवृंहितो योऽसौ प्रसादात्मा गुणस्तेन क्रियते। अतोऽत्र विप्रलम्भशृंगारोपकृतस्य संभोगशृंगारस्य सगुणकाव्यात्मत्वेनावस्थानं, न तु काव्यं प्रति अलंकारतयेति युक्तमुक्तम् —"निरलंकारमपि काव्यं सगुणं दृश्यते" इति। एवं रसान्तरेषु भावेषु रसभावाभासेषु च वाच्यम्। तदाहुः—

1. Amaru. v. 75. (NSP. Edn.)

"रसाद्यधिष्ठितं काव्यं जीवद्रूपतया यतः ।
कथ्यते तद्रसादीनां काव्यात्मत्वं व्यवस्थितम् ।।" इति।।
यत्तु रसादीनां पूर्वमलंकारत्वमुक्तं तदेवंविधभेदाविवक्षया ।।—*Op. cit.*, pp. 82-83. Compare Abhinavagupta's commentary: **अन्यत्रे**ति—रसस्वरूपे वस्तुमात्रेऽलंकारतायोग्ये वा । मे मतिरित्यन्यपक्षं दूष्यत्वेन हृदि निधाय अभीष्टत्वात् स्वपक्षं पूर्वं दर्शयति "**तथापी**ति । स हि परदर्शितो विषयो भाविनीत्या नोपपन्न इति भावः । **यस्मिन् काव्ये** इति स्पष्टत्वेनासङ्गतं वाक्यमित्थं योजनीयम् । यस्मिन् काव्ये ते पूर्वोक्ता रसादयोऽङ्गभूता वाक्यार्थीभूतश्चान्योऽर्थः, चशब्दस्तुशब्दस्यार्थे ; तस्य काव्यस्य सम्बन्धिनो ये रसादयोऽङ्गभूतास्ते रसादेरलंकारस्य विषयाः, 'स एवालंकारशब्दवाच्यो भवति योऽङ्गभूतः, न त्वन्य इति यावत् ।।"—*Op. cit*, p. 191.[1]

तद्यथा . . . . . दृश्यन्ते—The construction of this sentence is somewhat involved. Abhinavagupta explains it in two different ways: "अत्रोदाहरणमाह—**तद् यथे**ति । तदित्यङ्गत्वम् । यथाऽत्र वक्ष्यमाणोदाहरणे, तथाऽन्यत्रापीत्यर्थः । भामहाभिप्रायेण चाटुषु प्रेयोऽलंकारस्य वाक्यार्थत्वेऽपि रसादयोऽङ्गभूता दृश्यन्त इतीदमेकं वाक्यम् । भामहेन हि गुरु-देव-नृपति-पुत्र-विषयप्रीतिवर्णनं प्रेयोऽलंकार इत्युक्तम् । तत्र प्रेयानलंकारो यत्र स प्रेयोऽलंकारोऽलंकरणीय इहोक्तः । न तु अलंकारस्य वाक्यार्थत्वं युक्तम् । यदि वा वाक्यार्थत्वं प्रधानत्वं, चमत्कारितेति यावत् । उद्भटमतानुसारिणस्तु भङ्क्त्वा व्याचक्षते । चाटुषु चाटुविषये वाक्यार्थत्वे चाटूनां वाक्यार्थत्वे, प्रेयोऽलंकारस्यापि विषय इति पूवण सबन्धः । उद्भटमते हि

---

1. Compare the following verse quoted by Jayaratha anonymously in his °*Vimarśinī* on Rūyyaka's *Alaṁkārasarvasva*: "यदाहुः—'प्रधानतां यत्र रसादयो गता रसो रसादिध्वनिगोचरो भवेत् । भवन्ति ते यत्र रसादिपोषका रसाद्यलंकारदशा हि सा पृथक् ।। इति ।।"—*Op. cit.*, p. 180.

भावालंकार एव प्रेय इत्युक्तः, प्रेम्णा भावानामुपलक्षणात्। न केवलं रसवदलंकारस्य विषयो यावत् प्रेयःप्रभृतेरपि—इत्यपि-शब्दार्थः। रसवच्छब्देन प्रेयःशब्देन च सर्व एव रसवदाद्यलंकारा उपलक्षिताः। तदेवाह—**रसादयोऽङ्गभूता दृश्यन्ते** इति उक्तविषय इति शेषः ॥''—°*Locana*, p. 192.

TEXT

§१०। स च रसादिरलंकारः शुद्धः सङ्कीर्णो वा। तत्राद्यो यथा—

> किं हास्येन न मे प्रयास्यसि पुनः प्राप्तश्चिराद् दर्शनं
> केयं निष्करुण! प्रवासरुचिता केनासि दूरीकृतः।
> स्वप्नान्तेष्विति ते वदन् प्रियतम-व्यासक्त-कण्ठग्रहो
> बुद्ध्वा रोदिति रिक्तबाहुवलयस्तारं रिपुस्त्रीजनः॥

—इत्यत्र करुण-रसस्य शुद्धस्याङ्गभावात् स्पष्टमेव रसवदलंकारत्वम्। एवमेवंविधे विषये रसान्तराणां स्पष्ट एवाङ्गभावः।

सङ्कीर्णो रसादिरङ्गभूतो यथा—

> क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
> गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण।
> आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
> कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः॥

—इत्यत्र त्रिपुररिपुप्रभावातिशयस्य वाक्यार्थत्वे ईर्ष्याविप्रलम्भस्य श्लेषसहितस्याङ्गभाव इति, एवंविध एव रसवदाद्यलंकारस्य न्याय्यो विषयः। अत एव च ईर्ष्याविप्रलम्भकरुणयोरङ्गत्वेन व्यवस्थानात् समावेशो न दोषः। यत्र हि रसस्य वाक्यार्थीभावस्तत्र कथमलंकारत्वम्? अलंकारो हि चारुत्वहेतुः प्रसिद्धः। न त्वसावात्मैवात्मनश्चारुत्वहेतुः॥

EXPOSITION

§ 10. स च....सङ्कीर्णो वा—Now रस etc. might become

an अलंकार, unmixed (शुद्ध) with other figures of speech, or they might be mixed (सङ्कीर्ण) with other figures of speech or रस's as well. Cf. "शुद्ध इति—रसान्तरेणाङ्गभूतेनालङ्कारान्तरेण वा न मिश्रः, आमिश्रस्तु सङ्कीर्णः"—°*Locana*, p. 193. As an instance of the first variety, Ānandavardhana cites the verse—'किं हास्येन—' etc. Here the poet eulogises the royal patron and depicts the sad plight of the ladies of the rival kings only to bring into bolder relief the glory and valour of his patron. Thus it is a case of चाटु (*praise*) to which करुण-रस (*tragic emotion*) is made subordinate. It is an instance of the शुद्ध variety since there is no other figure of speech besides the रसवत् (i.e. करुणरस as गुणीभूत). The following extract from °*Locana* is very illuminating—"अत्र शोकस्थायिभावेन स्वप्नदर्शनोद्दीपितेन करुणरसेन चर्व्यमाणेन सुन्दरीभूतो नरपतिप्रभावो भातीति करुणः शुद्ध एवालंकारः । न हि त्वया रिपवो हता इति यादृगनलंकृतोऽयं वाक्यार्थस्तादृगयम्, अपि तु सुन्दरतरीभूतोऽत्र वाक्यार्थः, सौन्दर्यं च करुणरसकृतमेवेति । चन्द्रादिना वस्तुना यथा वस्त्वन्तरं वदनाद्यलंक्रियते, तदुपमितत्वेन चारुतयाऽवभासात्, तथा रसेनापि वस्तु वा रसान्तरं वा उपस्कृतं सुन्दरं भाति, इति रसस्यापि वस्तुन इवालंकारत्वे को विरोधः ? ननु रसेन किं कुर्वता प्रकृतोऽर्थोलंक्रियते, तर्हि उपमयाऽपि किं कुर्वत्याऽलंक्रियेत । ननु तयोपमीयते प्रस्तुतोऽर्थः । रसेनापि तर्हि सरसीक्रियते सोऽर्थ इति स्वसंवेद्यमेतत् । तेन यत् केचिदचूचुदन्—'अत्र रसेन विभावादीनां मध्ये किमलङ्क्रियते, इति तदनभ्युपमपराहतम् । प्रस्तुतार्थस्य अलंकार्यत्वेनाभिधानात् ।।"—*Op. cit.*, p. 194.

'क्षिप्तो हस्तावलग्नः....शराग्निः'—This is *Amaruśataka*, v. 2. Here too the poet's primary object is to edify the divine prowess of Śiva, the slayer of the demon Tripura. But he introduces the *erotic emotion* (शृङ्गार) as suggested by the expression कामीवार्द्रापराधः, with a view to rendering the

description more effective. The expressions used here to qualify शराग्नि: and कामी are all paronomastic (श्लिष्ट) and as such yield a double sense, one to be construed with शराग्नि: and the other with कामी. Thus here we have करुण-रस as अङ्ग (subordinate) to त्रिपुररिपुप्रभावातिशय *along with* the figure of speech श्लेषोपमा (i.e. उपमा based on श्लेष). So it is an instance of the सङ्कीर्ण variety. Compare : "**क्षिप्त इति ।** कामिपक्षेऽनादृत:, इतरत्र धुत: । **अवधूत** इति न प्रतीप्सित: प्रत्यालिङ्गनेन. इतरत्र सर्वाङ्गधूननेन विशरारूकृत: । साश्रुत्वमेकत्रेर्ष्यया अन्यत्र निष्प्रत्याशतया । कामीवेत्यनेनोपमानेन श्लेषानुगृहीतेनेर्ष्याविप्रलम्भो य आकृष्टस्तस्य श्लेषोपमासहितस्याङ्गत्वम्, न केवलस्य । यद्यप्यत्र करुणो रसो वास्तवोऽप्यस्ति तथापि स तच्चारुत्वप्रतीत्यै न व्याप्रियते इत्यनेनाभिप्रायेण 'श्लेषसहितस्य'-इत्येतावदेवावोचत्, न तु करुणसहितस्येत्यपि ।।"—*Op. cit.*, pp. 195-96.

अत एव च......न दोष:—Now, it might be contended that as श्रृङ्गार and करुण are mutually antagonistic sentiments, it is an offence against the norms of poetic criticism to introduce them together in the same verse. To this Ānandavardhana replies that this contention would have some force if श्रृङ्गार and करुण had both been equally predominant (तुल्य-प्रधान). But as neither of them is predominant, both being subservient to the poet's devotion towards Śiva (देवविषयक रतिभाव), which is the principal theme of the verse, the antagonism disappears, since it cannot subsist between two subordinates. Compare :—

"विवक्षिते रसे लब्धप्रतिष्ठे तु विरोधिनाम् ।
बाध्यानामङ्गभावं वा प्राप्तानामुक्तिरच्छला ।।"

—*Dhvanyāloka*, III. 20

—on which the *Vṛtti* runs as follows : "इयं चाङ्गभावप्राप्तिरन्या

यदाधिकारिकत्वात् प्रधान एकस्मिन् वाक्यार्थे रसयोर्भावयोर्वा परस्परविरोधिनोर्द्वयोरङ्गभावगमनं तस्यामपि न दोषः। यथोक्तं--'क्षिप्तो हस्तावलग्न' इत्यादौ। कथं तत्राविरोध इति चेत्, द्वयोरपि तयोरन्यपरत्वेन व्यवस्थानात्। अन्यपरत्वेऽपि विरोधिनोः कथं विरोधनिवृत्तिरिति चेत्, उच्यते—विधौ विरुद्धसमावेशस्य दुष्टत्वं नानुवादे। यथा—

"एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर।
एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः॥"

—इत्यादौ।[1] अत्र हि विधिप्रतिषेधयोरनूद्यमानत्वेन समावेशे न विरोधस्तथेहापि भविष्यति। श्लोके ह्यस्मिन् ईर्ष्याविप्रलम्भशृङ्गारकरुणवस्तुनोर्न विधीयमानत्वम्। त्रिपुररिपुप्रभावातिशयस्य वाक्यार्थत्वात् तदङ्गत्वेन च तयोर्व्यवस्थानात्॥"—*Op. cit.*, pp 369-71.

TEXT

§ ११। **तथा चायमत्र संक्षेपः—**

रसभावादितात्पर्यमाश्रित्य विनिवेशनम्।
अलंकृतीनां सर्वासामलंकारत्वसाधनम्॥

तस्माद् यत्र रसादयो वाक्यार्थीभूताः स सर्वः न रसादेरलंकारस्य विषयः; स ध्वनेः प्रभेदः, तस्योपमादयोऽलंकाराः। यत्र तु प्राधान्येनार्थान्तरस्य वाक्यार्थीभावे रसादिभिश्चारुत्वनिष्पत्तिः क्रियते, स रसादेरलंकारताया विषयः॥

1. Compare °*Locana* : "क्रीडाङ्गत्वेन ह्यत्र विरुद्धानामर्थानामभिधानमिति राजनिकटव्यवस्थापिताततायिद्वयन्यायेन विरुद्धानामपि अन्यमुखप्रेक्षितापरतन्त्रीकृतानां श्रौतेन क्रमेण स्वात्मपरामर्शेऽप्यविश्राम्यताम् का कथा परस्परूपचिन्तायामिति येन विरोधः स्यात्"—*loc. cit.* Govinda Ṭhakkura in his °*Pradīpa* too makes use of a similar maxim in a similar context: "अत्र चाटुके या राजविषया रतिस्तत्र करुणशृङ्गारावुभावपि साक्षादङ्गमिति तन्निर्वाहणैकव्याकुलयोरेव राजकार्योद्यतयोरिव भटयोः सहजतो विरोधोऽपि न दोषाय॥—*Op. cit.*, p. 272.

EXPOSITION

§ 11. An *alaṁkāra* can be properly so called, when it is introduced with a view to enhancing the ultimate aesthetic relish As ordinary figures of speech like उपमा etc. ultimately serve to render more effective the aesthetic charm (रसास्वाद) which is the *soul*, they can be properly regarded as *alaṁkāras* (अलंक्रियते अनेन इति अलंकारः). So, too, judging by the same standard, when a particular *sentiment* (रस) is introduced in such a way that it heightens the beauty of the principal element – whether it be वस्तु or रस, it can be properly recognised as one of the many figures of speech. Compare °*Locana* :—"अयं भावः—उपमादीनामलंकारत्वे यादृशी वार्त्ता तादृश्येव रसादीनाम्। तदवश्यमन्येनालंकार्येण भवितव्यम्। तच्च यद्यपि वस्तुमात्रमपि **भवति**, तथापि तस्य पुनरपि विभावादि-रूपतापर्यवसानाद् रसादितात्पर्यमस्त्येव इति सर्वत्र रसध्वनेरेवात्म-भावः। तदुक्तं—**रसभावादितात्पर्यमिति**। **तस्येति**। प्रधानस्यात्म-भूतस्य। एतदुक्तं भवति—उपमया यद्यपि वाच्योऽर्थोऽलंक्रियते, तथापि तस्य तदेवालंकरणं यद् व्यङ्ग्यार्थाभिव्यञ्जनसामर्थ्याधानम् इति वस्तुतो ध्वन्यात्मैवालंकार्यः। कटक-केयूरादिभिरपि हि शरीरसमवायिभिश्चेतन आत्मैव तत्तच्चित्तवृत्तिविशेषौचित्यसूचनात्म-तयालंक्रियते। तथाहि—अचेतनं शवशरीरं कुण्डलाद्युपेतमपि न भाति, अलंकार्यस्याभावात्। यतिशरीरं कटकादियुक्तं हास्यावहं भवति, अलंकार्यस्यानौचित्यात्। न हि देहस्य किञ्चिदनौचित्यम् इति वस्तुत आत्मैवालंकार्यः, अहमलंकृत इत्यभिमानात्॥"—*Op. cit.*, pp. 197-98.

तस्माद् यत्र....रसादेरलंकारताया विषयः—In this passage the *Vṛttikāra* sums up all that has been stated in the preceding sections with regard to the difference between रसध्वनि etc. on the one hand and रस etc. as figures of speech

(अलंकार) on the other. Cf: "रसादेरलंकारताया इति व्यधिकरणषष्ठी। रसादेर्याऽलंकारता तस्याः स एव विषयः। एतदनुसारेणैव पूर्वत्रापि वाक्ये योज्यम्, रसादिकर्तृकस्यालंकरणक्रियात्मनो विषय इति।"—*loc. cit.*

TEXT

§ १२। एवं ध्वनेरुपमादीनां रसवदलंकारस्य च विभक्तविषयता भवति। यदि तु चेतनानां वाक्यार्थीभावो रसाद्यलंकारस्य विषय इत्युच्यते, तर्हि उपमादीनां प्रविरलविषयता निर्विषयता वाऽभिहिता स्यात्। यस्मादचेतनवस्तुवृत्ते वाक्यार्थीभूते पुनश्चेतनवस्तुवृत्तान्तयोजनया यथाकथंचिद्भवितव्यम्। अथ सत्यामपि तस्यां यत्राचेतनानां वाक्यार्थीभावो नासौ रसवदलंकारस्य विषय इत्युच्यते, तन्महतः काव्यप्रबन्धस्य रसनिधानभूतस्य नीरसत्वमभिहितं स्यात्। यथा—

तरङ्गभ्रूभङ्गा क्षुभितविहगश्रेणि-रसना
विकर्षन्ती फेनं वसनमिव संरम्भशिथिलम्।
यथाविद्धं याति स्खलितमभिसंधाय बहुशो
नदीरूपेणेयं ध्रुवमसहना सा परिणता॥

यथा वा—

तन्वी मेघजलार्द्रपल्लवतया धौताधरेवाश्रुभिः
शून्येवाभरणैः स्वकालविरहाद्विश्रान्तपुष्पोद्गमा।
चिन्तामौनमिवाश्रिता मधुकृतां शब्दैर्विना लक्ष्यते
चण्डी मामवधूय पादपतितं जातानुतापेव सा॥

यथा वा—

तेषां गोपवधूविलाससुहृदां राधारहःसाक्षिणां
क्षेमं भद्र कलिन्दशैलतनयातीरे लतावेश्मनाम्।
विच्छिन्ने स्मरतल्पकल्पनमृदुच्छेदोपयोगेऽधुना
ते जाने जरठाभवन्ति विगलन्नीलत्विषः पल्लवाः॥

—इत्येवमादौ विषयेऽचेतनानां वाक्यार्थीभावेऽपि चेतनवस्तु-वृत्तान्तयोजनाऽस्त्येव। अथ यत्र चेतनवस्तुवृत्तान्तयोजनाऽस्ति तत्र रसादिरलंकारः। तदेवं सति उपमादयो निर्विषयाः प्रविरलविषया वा स्युः। यस्मान्नास्त्येवासौ अचेतनवस्तु-वृत्तान्तो यत्र चेतनवस्तुवृत्तान्तयोजना नास्ति, अन्ततो विभाव-त्वेन। तस्मादङ्गत्वेन च रसादीनामलंकारता। यः पुनरङ्गी रसो भावो वा सर्वाकारमलंकार्यः स ध्वनेरात्मेति॥

EXPOSITION

§ 12. If the view of the *Dhvani*-theorists, as stated above, regarding the characteristics of the figures of speech etc. be accepted, we are able to properly demarcate the respective spheres of ध्वनि—where रस etc. are *predominantly* suggested and primarily developed, of the figures of speech like उपमा etc., and lastly of रसवत्, प्रेय: etc. If, however, following the ancients we do not differentiate रसध्वनि proper (viz. where the aesthetic emotion is principally developed) from रसवत्, where the emotion is subordinate to the expressed sense or some other suggested sense, and bring them both under the same head रसवत्, it becomes difficult to find out independent instances of उपमा etc. For, in every instance, उपमा etc. would be found to be mixed up with रसवत् etc., in which case a new figure of speech, viz. संसृष्टि or संकर would arise as a result of the commixture. (*Vide Uddyota* 1. Sec. § 36), and would thus rob उपमा etc. of their independent existence. Compare °*Locana*: 'एवमिति। अस्मदुक्तेन विषय-विभागेनेत्यर्थः। उपमादीनामिति। यत्र रसस्यालंकार्यता रसान्तरं चाङ्गभूतं नास्ति, तत्र शुद्धा एवोपमादयः। तेन संसृष्टया नोपमा-दीनां विषयापहार इति भावः॥'—*Op. cit.*, p. 198.

यदि तु....भवितव्यम्—In this passage the author refutes

the position of the opponents of the *Dhvani*-school whose views had been covertly hinted at in the *Kārikā* in the expression 'मे मतिः'—'मे मतिरित्यनेन यत् परमतं सूचितं तद्दूषणमुपन्यस्यति—यद्गीत्यादिना ।'—°*Locana.* The opponents might argue that the contention of the Dhvani-theorists—viz. that there would be no exclusive sphere left for figures of speech like उपमा etc. if रसवत् etc. are not explained in the way already shown above is groundless. For, not every case of उपमा is mixed up with रसवत्, as the Dhvani-theorists would have it, so that संसृष्टि would be inevitable. The foremost condition of रसवत्, as conceived by the ancients, is that *permanent feelings* like रति etc. alone, when properly developed, become aesthetic emotions. Now, where inanimate objects like *rivers, mountains,* or *forests* etc. are primarily described (वाक्यार्थीभूत), there cannot be any possibility of the figure of speech रसवत्, since रति etc. cannot inhere in inanimate things, as they are exclusive attributes of conscious and living organisms. Such cases can be reasonably regarded as instances of pure उपमा etc. if there be any, the possibility of संसृष्टि or commixture being ruled out *ipso facto* as रसवत् is psychologically as well as logically absurd on the above grounds. Compare : "परस्य चायमाशयः—अचेतनानां चित्तवृत्तिरूपरसाद्यसम्भवात् तद्वर्णने रसवदलंकारस्य अनाशङ्क्यत्वात् विभक्त एव उपमादीनां विषय इति ।।" —°*Locana.* The author refutes this contention as follows : True, that inane objects like *hills* and *rivers* are devoid of conscious activities and *permanent mental states* consequent thereupon, and as such *apparently* there can be no possibility of the figures of speech रसवत् etc. when they are primarily described. Yet, in almost all such cases, if properly analysed, we would be able to detect at least some touch of human and conscious elements brought in through the aid of one or other of the numerous figures of speech, and as a

result we would be again led perforce to recognise the existence of the figure of speech रसवत्, so that the final result would be संसृष्टि due to the commixture of रसवत् etc. with the figures of speech like उपमा etc.

अथ सत्यामपि........अभिहितं स्यात्—If, again, to save the position the existence of रसवत् as an अलंकार be denied even though there be the apprehension of *human elements*, we must have to admit that most of the poetic creations, describing as they do natural phenomena which are *per se* utterly devoid of the capacity of aesthetic relish, would have to be regarded as नीरस. But such a contingency cannot arise if the position of the Dhvani theorists be accepted. For, the absence of the रसवत् अलंकार does not render a poetic art नीरस, but the lack of the capability of suggesting *emotions* (रसध्वनि) in the reader's mind makes a poem नीरस. And, as in the instances under consideration there is रसध्वनि, there can be no disadvantage in the way of regarding them as सरस. Compare: "**नीरसत्व**मिति—यत्र हि रसस्तत्रावश्यं रसवदलंकार इति परमतम्। ततो न रसवदलंकारश्चेत् नूनं तत्र रसो नास्तीति परमताभिप्रायात् नीरसत्वमुक्तम्। न त्वस्माकं रसवदलंकाराभावे नीरसत्वम्, अपि तु ध्वन्यात्मभूतरसाभावे, तादृक् च रसोऽत्रास्त्येव ॥"—*Locana*, pp. 200-201.

इत्येवमादौ......अस्त्येव—In the illustrations cited though inanimate objects are primarily described by the poet, the human element is still in the background. 'बहुभिरुदाहरणैर्महतो भूयसः प्रबन्धस्येति यदुक्तं तत्सूचितम्'—*Locana*. अथ.... अन्ततो विभावत्वेन—If, to avoid such a contingency it be argued that when human elements are present there will be रसवत् अलंकार even though inanimate objects are primarily described, the other problem would remain unsolved as the sphere of उपमा etc. would be completely encroached upon by संसृष्टि.

For, in every work of art there must be some human element present, however predominantly descriptive it might be of unconscious phenomena of nature. Compare :— "अथेत्यादि—नीरसत्वमत्र मा भूदित्यभिप्रायेणेति शेषः। ननु यत्र चेतनवृत्तस्य सर्वथा नानुप्रवेशः स उपमादेर्विषयो भविष्यतीत्याशङ्क्याह—यस्मादित्यादि। अन्तत इति। स्तम्भपुलकाद्यचेतनमपि वर्ण्यमानमनुभावत्वाच्चेतनमाक्षिपत्येव तावत्, किमत्रोच्यते। अतिजडोऽपि चन्द्रोद्यानप्रभृतिः स्वविश्रान्तोऽपि वर्ण्यमानोऽवश्यं चित्तवृत्तिविभावतां त्यक्त्वा काव्येऽनाख्येय एव स्यात्, शास्त्रेतिहासयोरपि वा॥"—°*Locana*, pp. 203-204. Compare on this point the following verse from Dhanañjaya'a *Daśarūpaka* : "रम्यं जुगुप्सितमुदारमथापि नीचमुग्रं प्रसादि गहनं विकृतं च वस्तु। यद्वाऽप्यवस्तु कविभावकभाव्यमानं तन्नास्ति यन्न रसभावमुपैति लोके॥"—*Op. cit.*, IV. 85. The following extract from Rūyyaka's *Alaṁkārasarvasva* should be consulted in this connexion as it clearly brings out the difference between the respective positions of the ancients and the moderns with regard to the figures of speech रसवत्, प्रेयस् etc. —

रस भाव-तदाभास-तत्प्रशमानां निबन्धेन रसवत्-प्रेय-ऊर्जस्वि-समाहितानि॥ [उदात्ते महापुरुषचरितस्य चित्तवृत्तिरूपत्वात् चित्तवृत्ति-विशेष-स्वभावत्वाच्च रसादीनामिह तदलंकाराणां प्रस्तावः। अत एव चत्वारोऽलंकारा युगपत् लक्षिताः। तत्र विभावानुभावव्यभिचारिभिः प्रकाशितो रत्यादिश्चित्तवृत्तिविशेषो रसः। भावो विभावानुभावाभ्यां सूचितो निर्वेदादिस्त्रयस्त्रिंशद्भेदाः। देवादिविषयश्च रत्यादिर्भावः। तदाभासो भावाभासश्च। आभासत्वमविषयप्रवृत्त्याऽनौचित्यम्। तत्प्रशम उक्तप्रकाराभ्यां निवर्त्तमानत्वेन प्रशाम्यदवस्था। तत्रापि रसस्य परविश्रान्तिरूपत्वात् सा न संभवति इति परिशिष्टभेदविषयो द्रष्टव्यः। एषामुपनिबन्धक्रमेण रसवदादयोऽलंकाराः। रसो विद्यते यत्र निबन्धे व्यापारात्मनि तत् रसवत्।

प्रियतरं प्रेयो निबन्धनमेव द्रष्टव्यम् । एवम् ऊर्जो बलं विद्यते यत्र तदपि निबन्धनमेव । अनौचित्यप्रवृत्तत्वादत्र बलयोगः । समाहितं परिहारः । स च प्रकृतत्वादुक्तभेदविषयः प्रशमापरपर्यायः ।] तत्र यस्मिन् दर्शने[1] वाक्यार्थीभूता रसादयो रसवदलंकारः, तत्राङ्गभूत-रसादिविषये रसवदाद्यलंकारः द्वितीय उदात्तालंकारः । यन्मते तु अङ्गभूतरसादिविषये रसवदाद्यलंकाराः, अन्यस्य रसादिध्वनिना व्याप्तत्वात्, तत्र उदात्तालंकारस्य विषयो नावशिष्यते, तद्विषयस्य रसवदादिना व्याप्तत्वम् ॥—*Op. cit.*, pp. 182-86.

Kuntaka, in his *Vakroktijīvita*, does not regard रसवत् as a separate figure of speech at all, and criticises his predecessors including even the *Dhvanikāra* for holding such a view. According to him the designation रसवत् is quite a misnomer inasmuch as the possessive suffix मतुप् is unmeaning and misleading even. We quote below selected portions of the *Vṛtti* on *Vakroktijīvita* for the convenience of readers :—

"..इदानीं रसात्मनः प्रधानचेतनपरिस्पन्दवर्ण्यमानवृत्तेरलंकार-कारान्तराभिमतामलंकारतां निराकरोति—

"अलंकारो न रसवत् परस्याप्रतिभासनात् ।
स्वरूपादतिरिक्तस्य शब्दार्थासङ्गतेरपि ॥

..तदिदमत्र तात्पर्यम्—यत् सर्वेषामेवालंकृतीनां सत्कविवाक्याना-मिदमलंकार्यमिदमलंकरणम् इत्यपोद्धारविहितो विविक्तभावः सर्वस्य कस्यचित् प्रमातुश्चेतसि परिस्फुरति । रसवदलंकारवत् इति वाक्ये पुनरवहितचेतसोऽपि न किंचिदे(तदे)व बुध्यामहे । तथा च—यदि शृङ्गारादिरेव प्राधान्येन वर्ण्यमानोऽलंकार्यस्तदन्येन केनचित् अलं-करणेन भवितव्यम् । यदि वा तत्स्वरूपमेव तद्विदाह्लादनिबन्धन-त्वादलंकरणमित्युच्यते, तथापि तद्व्यतिरिक्तमन्यदलंकार्यतया प्रकाश-

1. ध्वन्यभाववादिनां मते इत्यर्थः—Jayaratha's *Vimarśinī* thereon.

नीयम् । तदेवंविधो न कश्चिदपि विवेकश्चिरन्तनालंकारकाराभिमते रसवदलंकारलक्षणोदाहरणमार्गे मनागपि विभाव्यते । ..अत्रैव ..उपक्रमते—शब्दार्थासङ्गतेरपि । शब्दार्थयोरभिधानाभिधेययोरसमन्वयाच्च रसवदलंकारोपपत्तिर्नास्ति । अत्र च रसो विद्यते तिष्ठति यस्येति मतुप्रत्ययविहिते तस्यालंकार इति षष्ठीसमासः क्रियते, रसवांश्चासौ अलंकारश्चेति विशेषणसमासो वा । तत्र पूर्वस्मिन् पक्षे—रसव्यतिरिक्तमन्यत् पदार्थान्तरं विद्यते यस्यासौ अलंकारः । काव्यमेवेति चेत्, तत्रापि तद्व्यतिरिक्तः कोऽसौ पदार्थो यत्र रसवदलंकारव्यपदेशः सावकाशतां प्रतिपद्यते ? विशेषातिरिक्तः (?) पदार्थो न कश्चित् परिदृश्यते यस्तवानलंकार इति व्यवस्थितिमासादयति । तदेवमुक्तलक्षणे मार्गे रसवदलंकारस्य शब्दार्थसङ्गतिर्न कदाचिदस्ति । ......अथवा चेतनपदार्थगोचरतया रसवदलंकारस्य, निश्चेतनवस्तुविषयत्वेन चोपमादीनां विषयविभागो व्यवस्थाप्यते, तदपि न विद्वज्जनावर्जनं विदधाति । यस्माद् अचेतनानामपि रसोद्दीपनसामर्थ्यसमुचितसत्कविसमुल्लिखितसौकुमार्यसरसत्वादुपमादीनां प्रविरलविषयता निर्विषयत्वं वा स्यादिति शृङ्गारादिनिष्यन्दसुन्दरस्य सत्कविप्रवाहस्य च नीरसत्वं प्रसज्यते इति प्रतिपादितमेव पूर्वसूरिभिः । यदि वा वैचित्र्यान्तरमनोहारितया रसवदलंकारः प्रतिपाद्यते, यथाभियुक्तैस्तरेवाभ्यधायि—

> प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः ।
> काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः ।। इति ।।

यत्रान्यो वाक्यार्थः प्राधान्यादलंकार्यतया व्यवस्थितस्तस्मिन् तदङ्गतया विनिबध्यमानः शृङ्गारादिरलंकारतां प्रतिपद्यते । यस्माद् गुणप्रधानभावाभिव्यक्तिपूर्वमेवंविधविषये विभूष्यते भूषणविवेकव्यक्तिरुज्जृम्भते ।....

....किं च, 'काव्ये तस्मिन्नलंकारो रसादिः' इति रस एवालंकारः केवलः, न तु रसवदिति मतुप्रत्ययस्य जीवितं किञ्चिदभिहितं

स्यात् ।।—*Op. cit.*, pp. 156-166.

TEXT

§ १३ । किञ्च—

तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः ।
अङ्गाश्रितास्त्वलंकारा मन्तव्याः कटकादिवत् ।।६।।

ये तमर्थं रसादिलक्षणमङ्गिनं सन्तमवलम्बन्ते ते गुणाः शौर्यादिवत् । वाच्य-वाचकलक्षणान्यङ्गानि । ये पुनस्तदाश्रितास्तेऽलंकारा मन्तव्याः कटकादिवत् ।।

EXPOSITION

§ 13. We have noted that Daṇḍin and, following him, Udbhaṭa in his lost *Bhāmaha-vivaraṇa* took up their position in favour of the identity of the *guṇas* and *alaṃkāras*. (I.*Sec.* §3) It was Vāmana who first endeavoured to draw a line of demarcation between these two categories, but he differed essentially from the *Dhvani* school in so far as he posited *rīti* as the soul of poetic art, while according to the latter it is the *suggested sense* (*dhvani*), that constitutes the very essence of poetry. Another important point of difference between Vāmana and Dhvanikāra is that while the former is a follower of Daṇḍin with regard to the number of *guṇas* and posit *ten* such properties—both belonging to शब्द and अर्थ, the latter following Bhāmaha recognises only *three*—viz., माधुर्य, ओजः and प्रसाद.[1] The following extract from the *Kāmadhenu* on Vāmana's *Kāvyālaṁkāra-sūtra-vṛtti* is very illumi-

---

1. Compare the following couplet occurring in the *Sāhityacūḍāmaṇi* of Bhaṭṭagopāla—

"राजा भोजो गुणानाह विंशतिं चतुरश्च यान् । वामनो दश तत्सारानाह त्रीनेव भामहः ।।"—*Ibid*, vol. II., p. 190 (*Trivandrum Sanskrit Series Edn.*)

nating as it brings out clearly the difference between the respective view-points of the two schools :—

"वस्तुतो रीतिधर्मत्वेऽपि गुणानामात्मलाभस्य शब्दार्थाधीनत्वात् तस्य निरूप्यत्वाच्च शब्दार्थधर्मत्वमुपचारादुक्तम् ।....एवञ्च सति उपक्रमोपसंहारलिङ्गैराचार्यतात्पर्यपर्यालोचनायामात्मभूतरीतिनिष्ठा गुणास्तच्छरीरभूतशब्दार्थनिष्ठाः पुनरलंकारा इति निश्चीयते । अतो मन्यामहे गुणत्वादोजःप्रभृतीनामात्मनि समवायवृत्त्या स्थिति-रलंकारत्वाद् यमकोपमादीनां शरीरे संयोगवृत्त्या स्थितिरिति ग्रन्थकारस्याभिमतम् इति । न ह्यविपश्चिदपि कश्चिदभिजानीयाद-भिवदेद् वा न गुणानामात्मनि रीताविवालंकाराणां शरीरभूते शब्दार्थयुगले समवायवृत्त्या स्थितिरिति । एवञ्च गुणालंकाराणामु-भयेषामपि समवायवृत्त्या स्थितिरित्यभिमन्यमानैर्भेदाभिधानं गड्डरिका-प्रवाहनयेनेति यदुक्तं तन्निरस्तम् ।....अत एव ओजःप्रसादादादीनां गुणत्वं यमकोपमादीनामलंकारत्वमिति च व्यपदेशभेदोऽप्युपपद्यते । एवञ्च सति पूर्वे नित्या इति सूत्रे गुणानां नित्यत्वमलंकाराणाम-नित्यत्वम् इति सूत्रयता सूत्रकृता गुणानां काव्यव्यवहारप्रयोजकत्व-मुक्तं भवति। तथा च परमते व्यङ्ग्यस्य प्राधान्ये ध्वनिरुत्तमं काव्यम् , गुणीभावे गुणीभूतव्यङ्ग्यं मध्यमं काव्यम् , सम्भावनामात्रे चित्रमवरं काव्यम्, इति काव्यभेदाः कथिताः। तथात्रापि गुणसामग्र्ये वैदर्भी, अविरोधगुणान्तरानिरोधेन ओजःकान्ति-भूयिष्ठत्वे गौडीया, माधुर्य-सौकुमार्यप्राचुर्ये पाञ्चालीति काव्यभेदाः कथ्यन्ते। रीति-ध्वनिवादमतयोरियांस्तु भेदः। ध्वनिरात्मा काव्यस्य, स एव तद्व्यवहार-प्रयोजक इत्युभयत्रापि आत्मनिष्ठा गुणाः। शब्दार्थयुगलं शरीरं तन्निष्ठा अलंकारा इति च सर्वमवि-शिष्टम् ।।—*Op. cit.*, pp. 71–72. (*Benares Sans. Series*).

All later writers on Poetics have systematically followed this distinction between गुण's and अलंकार's as shown by the

Dhvanikāra with the one prominent exception of Jagannātha. The *guṇas* are the exclusive attributes of रस—the soul of poetry, and reside therein through the relation of *inherence* (समवाय), while the अलकार's belong to शब्द and अर्थ through the relation of *conjunction* (संयोग), though in the last analysis they serve to highten the emotional effect. It is but a direct corollary of this theory that whereas the *alaṃkāras* are susceptible of removal and substitution, without any commensurate deficiency of the aesthetic effect, the गुण's cannot be removed without causing the very death of the soul itself. Thus while गुण's are *essential* to the very existence of a *Kāvya*, the *alaṁkāras* are merely external appendages. Govinda in his °*Pradīpa* admirably brings out the distinction between the two categories: एवं च रसस्योत्कर्षहेतुत्वे सति रसधर्मत्वम् , तथात्वे सति रसाव्यभिचारिस्थितित्वम्, अयोगव्यवच्छेदेन रसोपकारकत्वं चेति लक्षणत्रयं गुणानां द्रष्टव्यम् ।....तथा च रसोपकारकत्वे सति तदवृत्तित्वं, तथात्वे सति रसव्यभिचारित्वं, अनियमेन रसोपकारकत्वं चेति सामान्यलक्षणत्रयम् अलंकाराणाम् ॥" —*Op. cit.*, pp. 174-75. For Jagannātha's *critique* of this definition of गुण's as the exclusive attributes of *rasa*, see *supra*.

TEXT

§ १४। तथा च—

श्रृङ्गार एव मधुरः परः प्रह्लादनो रसः ।
तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति ॥७॥

श्रृङ्गार एव रसान्तरापेक्षया मधुरः प्रह्लादहेतुत्वात्। तत्प्रकाशनपरशब्दार्थतया काव्यस्य स माधुर्यलक्षणो गुणः। श्रव्यत्वं पुनरोजसोऽपि साधारणमिति॥

EXPOSITION

§ 14. माधुर्य is the property of the sentiment शृङ्गार, but, even though it resides in शृङ्गार-रस, still it is commonly used to qualify शब्द and अर्थ, constituting the body of poetic art, as they serve to *suggest* the attribute of माधुर्य. Thus usages like मधुरः शब्दः, मधुरः अर्थः etc. are only *secondarily* justified on the basis of *superimposition* (उपचार) or *transference.* Compare : आत्मन एव हि यथा शौर्यादयो नाकारस्य, तथा रसस्यैव माधुर्यादयो गुणा न वर्णानाम् । क्वचित् तु शौर्यादि-समुचितस्य आकारमहत्त्वादेर्दर्शनात् आकार एवास्य शूर इत्यादे-र्व्यवहारादन्यत्र अशूरेऽपि विततकृतित्वमात्रेण शूर इति, क्वापि शूरेऽपि मूर्त्तिलाघवमात्रेणाशूर इति अविश्रान्तप्रतीतयो यथा व्यवहरन्ति, तद्वत् मधुरादि-व्यञ्जक-सुकुमारादिवर्णानां मधुरादि-व्यवहारप्रवृत्तेरमधुरादिरसाङ्गानां वर्णानां सौकुमार्यादिमात्रेण माधुर्यादि, मधुरादिरसोपकरणानां तेषामसौकुमार्यादेरमाधुर्यादि, रसपर्यन्तविश्रान्तप्रतीतिबन्ध्या व्यवहरन्ति । अत एव माधुर्यादयो रसधर्माः समुचितैर्वर्णैर्व्यज्यन्ते, न तु वर्णमात्राश्रयाः ॥—*Kāvya-prakāśa*, Chapter VIII.

Abhinavagupta thus explains the significance of the restrictive particle एव in the *kārikā* : "....शृङ्गार एव इत्येवकारः किमर्थः ? उच्यते—नानेन रसान्तरं व्यवच्छिद्यते, अपि तु आत्मभूतस्य रसस्यैव परमार्थतो गुणा माधुर्यादयः, उपचारेण तु शब्दार्थयोरित्येव-कारेण द्योत्यते"—*Op. cit.*, p. 208. But Jagannātha contends that this position of the Dhvani-school is untenable. The attributes like माधुर्य etc. that are posited to be the exclusive properties of रस, have no *objective* reality, and their existence can be proved neither on the strength of Perception (प्रत्यक्ष-प्रमाण) nor by Inference (अनुमान). They are solely ideal constructions consequent upon the abstractional faculties of

our mind. So there cannot be any logic behind the argument of the Dhvani-theorists, and even शब्द, अर्थ, वर्ण, रचना, रीति etc. can be as much qualified by माधुर्य etc. as रस itself, on the basis of the *causal relation* subsisting between the former and the latter which are practically indistinguishable from the final aesthetic relish (रसचर्वणा) or the effects thereof—viz. द्रुति, दीप्ति and विकास, without resorting to *lakṣaṇā* as in the former view. These arguments are certainly formidable and illuminating. We quote below the full text from *Rasagaṅgādhara* bearing on this issue :—

"गुणानां चैषां द्रुति-दीप्ति-विकासाख्यास्तिस्रश्चित्तवृत्तयः क्रमेण प्रयोज्याः। तत्तद्गुणविशिष्टरस-चर्वणाजन्या इति यावत्। एवमेतेषु गुणेषु रसमात्रधर्मेषु व्यवसितेषु मधुरा रचना, ओजस्वी बन्ध इत्यादयो व्यवहारा आकारोऽस्य शूर इत्यादिव्यवहारवदौपचारिका इति मम्मटभट्टादयः॥ येऽमी माधुर्यौजःप्रसादा रसमात्रधर्मतयोक्तास्तेषां रसधर्मत्वे किं मानम्? प्रत्यक्षमेवेति चेत्, न। दाहादेः कार्यादनलगतस्य उष्णस्पर्शस्य यथा भिन्नतयाऽनुभवस्तथा। द्रुत्यादिचित्तवृत्तिभ्यो रसकार्येभ्योऽन्येषां रसगतगुणानामननुभवात्। तादृशगुणविशिष्टरसानां द्रुत्यादिकारणत्वात् कारणतावच्छेदकतया गुणानामनुमानमिति चेत्। प्रातिस्विकरूपेणैव रसानां कारणतोपपत्तौ गुणकल्पने गौरवात्। शृङ्गार-करुण-शान्तानां माधुर्यवत्त्वेन द्रुतिकारणत्वं, प्रातिस्विकरूपेण कारणत्वकल्पनापेक्षया लघुभूतमिति तु न वाच्यम्। परेण मधुरतरादिगुणानां पृथग्द्रुततरत्वादिकार्यतारतम्यप्रयोजकतयाऽभ्युपगमेन, माधुर्यवत्त्वेन कारणताया गड्भूतत्वात्। इत्थं च प्रातिस्विकरूपेणैव कारणत्वे लाघवम्। किं च आत्मनो निर्गुणतयाऽऽत्मरूपरसगुणत्वं माधुर्यादीनामनुपपन्नम्। एवं तदुपाधि-रत्यादिगुणत्वमपि मानाभावात्, पररीत्या गुणे गुणान्तरस्यानौचित्याच्च। अथ 'शृङ्गारो मधुर'-इत्यादिव्यवहारः कथमिति चेत्। एवं तर्हि द्रुत्यादिचित्त-

वृत्तिप्रयोजकत्वम् । प्रयोजकतासंबन्धेन द्रुत्यादिकमेव वा माधुर्यादिकममस्तु ।[1] व्यवहारस्तु 'वाजिगन्धा उष्णा' इति व्यवहारवदक्षतः । प्रयोजकत्वं चादृष्टादिविलक्षणं शब्दार्थ-रस-रचनागतमेव ग्राह्यम् । अतो न व्यवहारातिप्रसक्तिः । तथा च शब्दार्थयोरपि माधुर्यादेरीदृशस्य सत्त्वात् उपचारो नैव कल्प्य इति तु मादृशाः ।।"
—*Op. cit.*, pp. 66-68 (NSP. Edn,).

श्रव्यत्वं पुनः....साधारणम्—Here the author covertly refers to the definition of माधुर्य as furnished by Bhāmaha-viz. "श्रव्यं नातिसमस्तार्थशब्दं मधुरमिष्यते" (*Kāvyālaṃkāra*, II. 3). In the printed texts the reading is—"श्रव्यं नातिसमस्तार्थं काव्यं मधुरमिष्यते." *See* Rūcaka's *Kāvyaprakāśa-saṃketa* (edited by Prof. Siva Prasad Bhattacharya in the *Calcutta Oriental Journal* Vol. II. No. 7-8), pp. 55., fn. 5. According to Ānandavardhana श्रव्यत्व is not the uncommon characteristic of माधुर्य, as it is equally possible in the case of ओजस् as well.

---

1. It is intersting to note that Viśvanātha also equates माधुर्य etc. with द्रुति, and criticises Mammaṭa who holds that the former are the *cause* of the latter and consequently distinguishes them from each other. Compare: चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते ।। यत्तु केनचिदुक्तम्—'माधुर्यं द्रुतिकारणम्' इति, तन्न । द्रवीभावस्य आस्वादस्वरूपाह्लादाभिन्नत्वेन कार्यत्वाभावात्'—*Sāhityadarpaṇa*, VIII. 2 and *vṛtti* thereon. *See* also Rāmacaraṇa's comments; आह्लादातिरिक्तस्य द्रवीभावस्य निर्वक्तुमशक्यतया आह्लाद एव पर्यवसानम् । एवमाह्लादजनकत्वापेक्षया लघुन आह्लादत्वस्यैव माधुर्यपदशक्यतावच्छेदकत्वमुचितमित्याह्लाद एव माधुर्यपदार्थ इति भावः ।—*loc. cit.* Abhinavagupta too appears to hold the same view. "..एवं माधुर्यौजःप्रसादा एव त्रयो गुणा उपपन्ना भामहाभिप्रायेण । ते च प्रतिपत्त्रास्वादमया मुख्यतया तत्र आस्वाद्य उपचरिता रसे ततस्तद्व्यञ्जकयोः शब्दार्थयोरिति तात्पर्यम्"—*Locana*, p. 213.

TEXT

§ १५ । शृङ्गारे विप्रलम्भाख्ये करुणे च प्रकर्षवत् ।
माधुर्यमार्द्रतां याति यतस्तत्राधिकं मनः ॥८॥

विप्रलम्भशृङ्गार-करुणयोस्तु माधुर्यमेव प्रकर्षवत् । सहृदय-हृदयावर्जनातिशय-निमित्तत्वाद् इति ॥

EXPOSITION

§ 15. It has been stated in the previous *Kārikā* that माधुर्य is the attribute of शृङ्गार. The present *Kārikā* states that विप्रलम्भशृङ्गार and करुण possess that quality of माधुर्य in a higher degree, because as a result of the realisation of the last two emotions the heart is *more* softened (द्रवीभूत) than in the first case. Others again hold that there is some difference in the degree of माधुर्य in the case of विप्रलम्भ and करुण too, the latter excelling the former, which on its part again is excelled by शान्त. Compare *Rasagaṅgādhara* : "रसेषु चैतेषु निगदितेषु माधुर्यौजःप्रसादाख्यांस्त्रीन् गुणानाहुः । तत्र 'शृङ्गारे संयोगाख्ये यन्माधुर्यं ततोऽतिशयितं करुणे, ताभ्यां विप्रलम्भे, तेभ्योऽपि शान्ते । उत्तरोत्तरमतिशयितायाश्चित्तद्रुतेर्जनना'दिति केचित् । 'संयोगशृङ्गारात् करुण-शान्तयोस्ताभ्यामपि विप्रलम्भे'— इत्यपरे । 'संयोगशृङ्गारात् करुण-विप्रलम्भ-शान्तेषु अतिशयितमेव न पुनस्तत्रापि तारतम्यम्' इत्यन्ये । तत्र प्रथम-चरमयोर्मतयोः 'करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्' इति प्राचां सूत्रमनुकूलम् ।[1] तस्योत्तरसूत्रगतस्य क्रमेणेति पदस्यापकर्षानपकर्षाभ्यां व्याख्याद्वयस्य संभवात् । मध्यस्थे तु मते करुणशान्ताभ्यां विप्रलम्भस्य माधुर्यातिशये यदि सहृदयानामनुभवोऽस्ति साक्षी, तदा स प्रमाणम्...."— p. 66.

---

1. *Kāvyaprakāśa,* VIII. 48.

TEXT

§ १६। रौद्रादयो रसा दीप्त्या
लक्ष्यन्ते काव्यवर्तिनः।
तद्व्यक्तिहेतू शब्दार्था-
वाश्रित्योजो व्यवस्थितम् ॥९॥

रौद्रादयो हि रसाः परां दीप्तिमुज्ज्वलतां जनयन्तीति लक्षणया त एव दीप्तिरित्युच्यते। तत्प्रकाशनपरः शब्दो दीर्घ-समासरचनालंकृतं वाक्यम्। यथा—

चञ्चद्भुजभ्रमितचण्डगदाभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानावबद्धघनशोणितशोणपाणि-
रुत्तंसयिष्यति कचांस्तव देवि! भीमः॥

तत्प्रकाशनपरश्चार्थोऽनपेक्षितदीर्घसमासरचनः प्रसन्नवाचका-भिधेयः। यथा—

यो यः शस्त्रं बिभर्त्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा।
यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमपि जगतामन्तकस्यान्तकोऽहम्॥

—इत्यादौ द्वयोरोजस्त्वम्॥

EXPOSITION

§ 16. दीप्ति (a particular state of mind like 'kindling up') is caused by the emotions like रौद्र etc. and this दीप्ति is primarily denoted by ओजः. As Abhinavagupta explains: "दीप्तिः प्रतिपत्तुर्हृदये विकास-विस्तार-प्रज्वलनस्वभावा। सा च मुख्यतया ओजःशब्दवाच्या"—Thus, though ओजस् is identical with दीप्ति, it is used as an attribute of emotions like रौद्र, वीर and अद्भुत *by transference*, and consequently such usages

as ओजस्वी रस: are justified. Again, by a second process of transference, it is used to signify शब्द, अर्थ etc. that suggest those emotions, and we get ओजस्वी शब्द:, ओजस्वी अर्थ: etc. Compare *°Locana* : "......तया दीप्त्या आस्वादविशेषात्मिकया कार्यरूपया लक्ष्यन्ते रसान्तरात् पृथक्तया। तेन कारणे कार्योपचारात् रौद्रादिरेव ओज:शब्दवाच्य:। ततो लक्षित-लक्षणया तत्-प्रकाशनपर: शब्दो दीर्घसमास-रचनावाक्यरूपोऽपि दीप्तिरुच्यते। यथा 'चञ्चद्'-इत्यादि। तत्प्रकाशनपरश्चार्थ: प्रसन्नैर्गमक-वाचकैरभिधीयमान: समासानपेक्ष्यपि दीप्तिरित्युच्यते। यथा—'यो य:—' इत्यादि।"—pp. 210-211.

तत्प्रकाशन......वाक्यम्—*Words* that suggest ओजस् should be components of long compounds. Mammaṭa enumerates the *formal elements* that are suggestive of ओजस् thus :—

"योग आद्यतृतीयाभ्यामन्त्ययो रेण तुल्ययो:।
टादि: शषौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि॥"

वर्ग-प्रथमतृतीयाभ्यामन्त्ययो: द्वितीयचतुर्थयो रेफेण अध उपरि उभयत्र वा यस्य कस्यचित् तुल्ययो: तेन तस्यैव संबन्ध: टवर्गोऽर्थात् णकारवर्ज: शकार-षकारौ दीर्घसमास: विकटा संघटना: ओजस:। उदाहरणम्—'मूर्ध्नामुद्वृत्तकृत्त"-त्यादि।—*Kāvyaprakāśam*, Chapter VIII. Compare also :—"नैकटचेन द्वितीय-चतुर्थवर्ग-वर्णटवर्ग-जिह्वामूलीयोपध्मानीयविसर्ग-सकारबहुलैर्वर्णैर्घटितो झय्-रेफान्यतर-घटितसंयोगपरह्रस्वैश्च नैकटचेन प्रयुक्तैरालिङ्गितो दीर्घवृत्त्यात्मा गुम्फ ओजस:"—*Rasagaṅgādhara*, p. 80.

Ānandavardhana cites 'चञ्चद्भुज—' (*Veṇīsaṃhāra*, Act. I. 21) to illustrate how harsh letters, conjunct consonants of which रेफ and महाप्राण are components, and long compounds can suggest the quality called ओजस्, irrespective of the sense conveyed.

तत्प्रकाशनपरश्चार्थ......भिधेय:—The suggestiveness of

the meaning does not require long compounds and depends on the theme being of a heroic import.

यो यः............अहम्—This is *Veṇīsaṁhāra*, III. 32. Here, there are no long compounds, and yet there is sufficient apprehension of ओजस्, on account of the judicious selection of words that convey a sense full of heroic grandeur. Cp. °*Locana* : "अत्र पृथग्भूतैरेव क्रमाद् विमृश्यमानैरर्थैः पदात् पदं क्रोधः परां धारामाश्रित इत्यसमस्ततैव दीप्तिनिबन्धनम् ।"—*loc. cit.* Abhinavagupta admirably points out how माधुर्य and ओजस् are mixed together in definite proportions in the emotions like भयानक, हास्य, शान्त etc.—"हास्यस्य शृङ्गाराङ्गतया माधुर्यं प्रकृष्टं विकासधर्मतया चौजोऽपि प्रकृष्टमिति साम्यं द्वयोः । भयानकस्य मग्नचित्तवृत्तिस्वभावत्वेऽपि विभावस्य दीप्ततया ओजः प्रकृष्टं माधुर्यमल्पम् । बीभत्सेऽप्येवम् । शान्ते तु विभाववचित्र्यात् कदाचिदोजः प्रकृष्टं कदाचिन्माधुर्यमिति विभागः"—°*Locana*, p. 212.

TEXT

§ १७। समर्पकत्वं काव्यस्य यत्तु सर्वरसान् प्रति ।
स प्रसादो गुणो ज्ञेयः सर्वसाधारणक्रियः ॥
१०॥

प्रसादस्तु स्वच्छता शब्दार्थयोः। स च सर्वरससाधारणो गुणः सर्वरचनासाधारणश्च व्यङ्ग्यार्थापेक्षयैव मुख्यतया व्यवस्थितो मन्तव्यः ॥

EXPOSITION

§ 17. The attribute called प्रसाद (*Perspecuity*) is common to all the emotions and is not the exclusive property of any particular sentiment. It consists in the *transparence* of words and meanings. The words must be such that the readers may

not have any difficulty in grasping their sense *immediately*, without any contemplation.[1] So also the theme or import must not be obscure and must have a universal appeal. Consequently the presence of प्रसाद renders the realisation of an aesthetic emotion quick and devoid of any impediment. Compare Abhinavagupta's comments : समर्पकत्वं सम्यगर्पकत्वं हृदयसंवादेन प्रतिपत्तॄन् प्रति स्वात्मावेशेन व्यापारकत्वं झटिति शुष्ककाष्ठाग्निदृष्टान्तेन। अकलुषोदकदृष्टान्तेन च। तदकालुष्यं प्रसन्नत्वं नाम सर्वरसानां गुणः। उपचारात्तु तथाविधे व्यङ्ग्येऽर्थे यच्छब्दार्थयोः समर्पकत्वं तदपि प्रसादः।—*°Locana*. Mammaṭa in his definition of प्रसाद makes use of the two metaphors employed by Abhinavagupta in the above extract :

'शुष्केन्धनाग्निवत् स्वच्छजलवत् सहसैव यः।
व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहितस्थितिः॥'

—*Kāvyaprakāśa*, Chap. VIII.

Thus, the Dhvani-theorists posit three *guṇas* only. The twenty *guṇas*, belonging to शब्द and अर्थ, of the ancients like Daṇḍin, Vāmana etc. can be comprehended within these three. Moreover, not all of them can be reasonably regarded as positive excellences, some of these being indifferent, while a few again turn out to be defects under certain circumstances and it is a misnomer to call them *guṇas* indiscriminately. Compare :

केचिदन्तर्भवन्त्येषु दोषत्यागात् परे श्रिताः।
अन्ये भजन्ति दोषत्वं कुत्रचित् न ततो दश॥

---

1. As Mammaṭa states :

श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत्।
साधारणः समग्राणां स प्रसादो गुणो मतः॥

—*Op. cit.*, Chapter VIII.

Also Jagannātha : श्रुतमात्रा वाक्यार्थं करतलबदरमिव निवेदयन्ती घटना प्रसादस्य—*Rasagaṅgādhara*. p. 80.

—*Kāvyaprakāśa*, VIII. 7 and *vṛtti* thereon. For an elaborate discussion of the views of the ancients and moderns on the number of *guṇas*, *see Rasagaṅgādhara*, pp. 66 ff.

TEXT

§ १८। श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः।
ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः ॥
११॥

अनित्या दोषाश्च ये श्रुतिदुष्टादयः सूचितास्तेऽपि न वाच्ये अर्थमात्रे, न च व्यङ्ग्ये शृङ्गारव्यतिरेकिणि शृङ्गारे वा ध्वनेरनात्मभूते। किं तर्हि ? ध्वन्यात्मन्येव शृङ्गारेऽङ्गितया व्यङ्ग्ये ते हेया इत्युदाहृताः। अन्यथा हि तेषामनित्यदोषतैव न स्यात्। एवमयमसंलक्ष्यक्रमद्योतो ध्वनेरात्मा प्रदर्शितः सामान्येन ॥

EXPOSITION

§ 18. It has been a common practice among the authors on Poetics to classify the defects into two groups, according as they are *universally* so (नित्यदोष) or not (अनित्यदोष). Thus, the second group comprises such defects as श्रुतिदुष्टत्व, अप्रतीतत्व, पुनरुक्तत्व etc., while the rest like च्युतसंस्कार, क्लिष्टत्व etc. would be classed as belonging to the first group. According to this classification श्रुतिदुष्टत्व would not be a defect in the case of emotions like रौद्र, वीर and भयानक where it would be regarded rather as a positive excellence, enhancing as it does the effect of the aesthetic relish. As Viśvanātha states :—

"वक्तरि क्रोधसंयुक्ते तथा वाच्ये समुद्धते।
रौद्रादौ तु रसेऽत्यन्तं दुःश्रवत्वं गुणो भवेत् ॥"

—*Sāhityadarpaṇa*, VII. 16.

But in the case of शृङ्गार, the use of harsh letters has to be

studiedly eschewed. As Jagannātha observes : "अथ विशेषतो वर्जनीयाः ।........मधुररसेषु दीर्घसमासं झय्घटितसंयोगपरह्रस्वस्य विसर्जनीयादेश-सकार-जिह्वामूलीयोपध्मानीयानां रेफहकारान्यतरघटित-संयोगस्य ह्लां ल-म-न-भिन्नानां स्वात्मना संयोगस्य झय्द्वयघटित-संयोगस्य चासकृत्-प्रयोगं नैकटचेन वर्जयेत् । सवर्ण-झय्द्वय-घटित-संयोगस्य शर्भिन्न-महाप्राण-घटितसंयोगस्य सकृदपीति संक्षेपः ॥"—*Rasagangādhara*, pp. 84–85.

This twofold classification of defects is justifiable if we posit the existence of *a soul*, viz. रस, as distinct from the body (शरीर) of poetry which is composed of शब्द and अर्थ.[1] The defects become only so, if they mar the beauty of the soul, though we usually refer to them as belonging to शब्द and अर्थ. Such usages are only *secondary*. श्रुतिदुष्टत्व is not a universal defect, because it does not mar the beauty of the soul (viz. रस) in *every* case. It mars the beauty of शृङ्गार, but not of रौद्र. If this be not regarded as the criterion of the above classification, श्रुतिदुष्टत्व would also be counted as a variety of नित्यदोष, for the letters would remain harsh irrespective of any consideration of the nature of the emotion to which they might be related. Compare Mammaṭa :—

1. As Abhinavagupta observes : "एवमस्मत्पक्ष एव गुणालंकार-व्यवहारो विभागेनोपपद्यत इति प्रदर्श्य नित्यानित्यदोषविभागोऽप्यस्मत्पक्ष एव संगच्छते इति दर्शयितुमाह—श्रुतिदुष्टादय इत्यादि ॥"—Mammaṭa observes that this division of defects into two classes proves beyond doubt the existence of the *suggested sense* apart from the expressed sense : "यदि च वाच्यवाचकत्वव्यतिरेकेण व्यङ्ग्य-व्यञ्जकभावो नाभ्युपेयते तदाऽसाधुत्वादीनां नित्यदोषत्वं कष्टत्वादीनामनित्य-दोषत्वमिति विभागकरणमनुपपन्नं स्यात् । न चानुपपन्नं, सर्वस्यैव विभक्ततया प्रतिभासात् । वाच्य-वाचकभावव्यतिरेकेण व्यङ्ग्यव्यञ्जकमात्राश्रयणे तु व्यङ्ग्यस्य बहुविधत्वात् क्वचिदेव कस्यचिदेवौचित्येन उपपद्यत एव विभाग-व्यवस्था ॥"—*Kāvyaprakāśa*, Chapter V.

"मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद् वाच्यः ।
उभयोपयोगिनः स्युः शब्दास्तेन तेष्वपि सः ॥"
—*Kāvyaprakāśa*, VII. 1.

The following extract from Hemacandra's *Kāvyānuśāsana* is very explicit on this point :—रसस्योत्कर्षापकर्षहेतू गुण-दोषौ भक्त्या शब्दार्थयोः ॥ रसो वक्ष्यमाणस्वरूपस्तस्योत्कर्षहेतवो गुणाः, अपकर्ष-हेतवस्तु दोषाः । ते च रसस्यैव धर्माः, उपचारेण तु तदुपकारिणोः शब्दार्थयोरुच्यन्ते । रसाश्रयत्वं च गुणदोषयोरन्वयव्यतिरेकानुविधानात् । तथाहि यत्रैव दोषास्तत्रैव गुणाः, रसविशेषे च दोषा न तु शब्दार्थयोः । यदि हि तयोः स्युस्तर्हि बीभत्सादौ कष्टत्वादयो गुणा न भवेयुः हास्यादौ चाश्लीलत्वादयः । अनित्याश्चैते दोषाः । यतो यस्याङ्गिनस्ते दोषास्तदभावे न दोषास्तद्भावे तु दोषा इत्यन्वयव्यतिरेकाभ्यां गुणदोषयो रस एवाश्रयः ॥—*Op. cit.*, p. 16.

Abhinavagupta explains श्रुतिदुष्टादि in the *kārikā* as referring to the defects mentioned by Bhāmaha in the couplet :

"श्रुतिदुष्टार्थदुष्टे च कल्पनादुष्टमित्यपि ।
श्रुतिकष्टं तथैवाहुर्वाचां दोषं चतुर्विधम् ॥"—I. 47.

As he comments : "श्रुतिदुष्टादय इत्यादि । वान्तादयोऽसभ्यस्मृति-हेतवः श्रुतिदुष्टाः । अर्थदुष्टाः वाक्यार्थबलादश्लीलार्थप्रतिपत्तिकारिणः । यथा—'छिद्रान्वेषी महांस्तब्धो घातायैवोपसर्पति' इति । कल्पना-दुष्टास्तु द्वयोः पदयोः कल्पनया । यथा—'कुरु रुचिम्' इत्यत्र क्रमव्यत्यासे । श्रुतिकष्टस्तु 'अधाक्षीत्', 'अक्षोत्सीत्' 'तृणेढि' इत्यादि । शृङ्गार इत्युचितरसोपलक्षणार्थम् । वीर-शान्ताद्भुतादावपि तेषां वर्जनात् ।"—°*Locana*. Abhinavagupta finally observes that Bhāmaha himself did not at all classify the defects in the way stated above, nor did he show that श्रुतिदुष्ट etc. can at all be regarded as गुण's in cases of emotions other than शृङ्गार. All this has been done by the authors of the

Dhvani school for the first time. This is implied by the word सूचिताः in the *vṛtti*. Compare: सूचिता इति। न त्वेषां विषयविभागप्रदर्शनेन अनित्यत्वं भिन्नवृत्तादिदोषेभ्यो विविक्तत्वं प्रदर्शितम्। बीभत्स-हास्य-रौद्रादौ त्वेषामस्माभिरभ्युपगमात्, शृङ्गारादौ च वर्जनात् अनित्यत्वं च दोषत्वं च समर्थितमेवेति भावः।।—°*Lacana*, pp. 214-215.

TEXT

§ १६। तस्याङ्गानां प्रभेदा ये प्रभेदाः स्वगताश्च ये।
तेषामानन्त्यमन्योन्यसम्बन्धपरिकल्पने ।।१२।।

अङ्गितया व्यङ्ग्यो रसादिर्विवक्षितान्यपरवाच्यस्य ध्वनेरेक आत्मा य उक्तस्तस्याङ्गानां वाच्य-वाचकानुपातिनामलंकाराणां ये प्रभेदा निरवधयो ये च स्वगतास्तस्याङ्गिनोऽर्थस्य रस-भाव-तदाभास-तत्प्रशमलक्षणा विभावानुभाव-व्यभिचारिप्रतिपादन-सहिता अनन्ताः स्वाश्रयापेक्षया निःसीमानो विशेषाः तेषामन्योन्य-सम्बन्धपरिकल्पने क्रियमाणे कस्यचिदन्यतमस्यापि रसस्य प्रकाराः परिसंख्यातुं न शक्यन्ते किमुत सर्वेषाम्। तथाहि शृङ्गारस्याङ्गिनस्तावदाद्यौ द्वौ भेदौ—संभोगो विप्रलम्भश्च। संभोगस्य च परस्परप्रेमदर्शनसुरतविहरणादिलक्षणाः प्रकाराः। विप्रलम्भ-स्यापि अभिलाषेर्ष्याविरहप्रवासविप्रलम्भादयः। तेषां च प्रत्येकं विभावानुभावव्यभिचारिभेदः। तेषां च देशकालाद्याश्रयावस्था-भेद इति स्वगतभेदापेक्षया एकस्य तस्यापरिमेयत्वम्, किं पुनरङ्ग-प्रभेदकल्पनायाम्। ते ह्यङ्गप्रभेदाः प्रत्येकमङ्गिप्रभेद-संबन्धपरि-कल्पने क्रियमाणे सत्यानन्त्यमेवोपयान्ति ।।

EXPOSITION

§ 19. In the preceding sections the *Dhvanikāra* has considered the nature of अलक्ष्यक्रमव्यङ्ग्य—viz. रस, भाव etc. Now

he observes that it is not possible to enumerate the different varieties of the principal emotions (रस) or of elements like विभाव, अनुभाव etc., that are subservient (अङ्ग) to them. So also it is not possible to compute precisely the ways in which the numerous figures of speech belonging to शब्द and अर्थ can be brought into relation with the different varieties of अलक्ष्यक्रमव्यङ्ग्य, as also the mutual relations in which the latter themselves can stand to each other. There would arise endless varieties by permutation and combination, which it is impossible to enumerate severally. But if we leave out the details, we might classify all the different varieties of रस, भाव etc. under one single category—viz. असंलक्ष्यक्रमध्वनि, since they possess one element in common-viz. the property of being suggested without any perceptible sequence intervening between the cognition of the वाच्यार्थ on the one hand and the final aesthetic relish on the other. As Mammaṭa, too, notes: "अन्योन्ययोगादेवं स्याद् भेदसंख्याऽतिभूयसी ।। एवमनेन प्रकारेण अवान्तरभेदगणनेऽतिप्रभूततरा गणना । तथाहि—शृङ्गारस्यैव भेदप्रभेदगणनायामानन्त्यं का गणना तु सर्वेषाम् ।।"—*Op. cit*,. Chap. V.

TEXT

§२० । दिङ्मात्रं तूच्यते येन व्युत्पन्नानां सचेतसाम् ।
बुद्धिरासादितालोका सर्वत्रैव भविष्यति ॥१३॥

दिङ्मात्रकथनेन हि व्युत्पन्नानां सहृदयानामेकत्रापि रसभेदे सहालंकारैरङ्गाङ्गिभावपरिज्ञानाद् आसादितालोका बुद्धिः सर्वत्रैव भविष्यति ।। तत्र—

शृङ्गारस्याङ्गिनो यत्नादेकरूपानुबन्धवान् ।
सर्वेष्वेव प्रभेदेषु नानुप्रासः प्रकाशकः ॥१४॥

अङ्गिनो हि शृङ्गारस्य ये उक्ताः प्रभेदास्तेषु सर्वेषु एकप्रकारानुबन्धितया प्रबन्धेन प्रवृत्तोऽनुप्रासो न व्यञ्जकः। अङ्गिन इत्यनेन अङ्गभूतस्य शृङ्गारस्य एकरूपानुबन्ध्यनुप्रासनिबन्धने कामचारमाह ॥

EXPOSITION

§ 20. In the present section the Dhvanikāra proposes to show in brief how the various figures of speech can be consistently brought into relation with रसध्वनि. He takes up शृङ्गार as the specimen and lays down certain principles that must be observed in introducing poetic figures in general in a *dhvani-kāvya,* so that the aesthetic effect may be the highest.

शृङ्गारस्य....प्रकाशक:—In all the five varieties of शृङ्गार where they are primarily developed (अङ्गिन्) and not subordinate, it might be laid down as a universal law that the figure of speech अनुप्रास (*alliteration*) based on the repetition of the same sound-group (i.e. if too much hackneyed) is apt to be an impediment in the way of the proper development of the emotion, detracting as it does from the charm of the aesthetic relish. Thus, in the case of शृङ्गार, long *alliterations* based on the repetition of the same letters or group of letters, must be carefully avoided. But, short *alliterations* based on the repetition of varying groups of letters that do not unduly offend the sense of consistency and having some freshness in them, may be introduced without violating the norm laid down above. As Abhinavagupta notes : एकरूपं त्वनुबन्धं त्यक्त्वा विचित्रोऽनुप्रासो निबध्यमानो न दोषाय इत्येकरूपग्रहणम् ।[1]—Thus अनुप्रास generally is not a figure that can fit in happily with शृङ्गार.

---

1. Kuntaka in his *Vakroktijīvita* makes similar observations regarding अनुप्रास, यमक and other poetic figures :—

TEXT

§२१ । ध्वन्यात्मभूते शृङ्गारे यमकादिनिबन्धनम् ।
शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः ॥१५॥

ध्वनेरात्मभूतः शृङ्गारस्तात्पर्येण वाच्य-वाचकाभ्यां प्रकाश्यमानस्तस्मिन् यमकादीनां यमकप्रकाराणां निबन्धनं दुष्कर-शब्द-भङ्गश्लेषादीनां शक्तावपि प्रमादित्वम् । प्रमादित्वमित्यनेन एतद् दर्श्यते—काकतालीयेन कदाचित् कस्यचिदेकस्य यमकादेर्निष्पत्तावपि भूम्नाऽलङ्कारान्तरवद् रसाङ्गत्वेन निबन्धो न कर्त्तव्य इति । 'विप्रलम्भे विशेषतः' इत्यनेन विप्रलम्भे सौकुमार्यातिशयः ख्याप्यते । तस्मिन् द्योत्ये यमकादेरङ्गस्य निबन्धो नियमान्न कर्त्तव्य इति ॥

EXPOSITION

§ 21. In the poem where the emotion of शृंगार is preeminent, the poet is advised to carefully eschew such figures of speech as यमक, चक्रबन्ध, भङ्गश्लेष, etc. howsoever gifted he might be. प्रमादित्वं......न कर्त्तव्य इति—Ānandavardhana here observes that solitary cases of यमक etc., if they come out spontaneously, are not ruled out hereby. The poet should only restrain his natural propensity towards introducing such difficult and obscure figures *in abundance* with a view to make a display of his own craftsmanship.

"नातिनिर्बन्धविहिता नाप्यपेशलभूषिता ।
पूर्ववृत्तपरित्यागनूतनावर्त्तनोज्ज्वला ॥"—II. 1.

which has been explained in the *vṛtti* as follows :—निर्बन्धशब्दोऽत्र व्यसनितायां वर्त्तते । तेन अतिनिर्बन्धे पुनः पुनरावर्त्तनव्यसनितया विहिता, अप्रयत्नविरचितेत्यर्थः । व्यसनितया प्रयत्नविरचने हि प्रस्तुतौचित्य-परिहाणेः वाच्यवाचकयोः परस्परस्पर्धित्वलक्षणसाहित्यविरहः स्यात् ।.... पूर्वमावृत्तानां....पुनःपुनर्विरचितानां परित्यागेन प्रहाणेन नूतनानामभिनवानां वर्णानामावर्त्तनेन पुनः पुनः परिग्रहेण च तदेवमुभाभ्यां प्रकाराभ्यामुज्ज्वला भ्राजिष्णुः ।—*Op. cit.*, p. 84.

विप्रलम्भे........न कर्त्तव्यः—This principle has to be more rigidly observed in the case of विप्रलम्भश्रृङ्गार, for it is the tenderest of all emotions, and any such obscure and difficult figure of speech as यमक etc. is sure to mar the sentiment completely. "दुष्कर—मुरज-चक्रबन्धादि। शब्दश्लेष इति। अर्थश्लेषो न दोषाय 'रक्तस्त्व'मित्यादौ। शब्दभङ्गोऽपि क्लिष्ट एव दुष्टः, न त्वशोकादौ"—°*Locana.* The following extract from the *Rasagaṅgādhara* should be compared in this connexion :—

"........एवं त्वप्रत्ययं यङन्तानि यङ्‌लुगन्तानि अन्यानि च शाब्दिकप्रियाण्यपि मधुररसे न प्रयुञ्जीत। एवं व्यङ्ग्यचर्वणातिरिक्तयोजनाविशेषापेक्षानापातोऽधिकचमत्कारिणोऽनुप्रासनिचयान् यमकादींश्च संभवतोऽपि कविर्न निबध्नीयात्। यतो हि ते रसचर्वणायामनन्तर्भवन्तः सहृदय-हृदयं स्वाभिमुखं विदधाना रसपराङ्मुखं विदधीरन्। विप्रलम्भे तु सुतराम्। यतो मधुरतमत्वेनास्य निर्मलसितानिर्मित-पानकरसस्येव तनीयानपि स्वातन्त्र्यमावहन् पदार्थः सहृदयहृदयारुन्तुदतया न सर्वथैव सामानाधिकरण्यमर्हति। यदाहुः—'ध्वन्यात्मभूते श्रृङ्गारे'—इत्यादि। ये तु पुनरक्लिष्टतयाऽनुन्नतस्कन्धतया च न पृथग्भावनामपेक्षन्ते, किं तु रसचर्वणायामेव सुसुखं गोचरीकर्त्तुं शक्याः, न तेषामनुप्रासादीनां त्यागो युक्तः ॥"—*Op. cit.*, pp. 88-89. Hemacandra in his *Kāvyānuśāsana* quotes the following *āryās* from a lost work of Bhaṭṭa-Lollaṭa which read just like a commentary on the present *Kārikā*:—

"यस्तु सरिदद्रिसागर-नग-तुरग-पुरादिवर्णने यत्नः।
कविशक्तिख्यातिफलो विततधियां नो मतः प्रबन्धेषु ॥
यमकानुलोम-तदितर-चक्रादिभिदोऽतिरसविरोधिन्यः।
अभिमानमात्रमेतद् गड्डरिकादिप्रवाहो वा ॥इति॥[1]

—*Op. cit.*, p. 215.

---

1. Namisādhu the commentator of Rudraṭa's *Kāvyālaṁkāra*

TEXT

§२२। अत्र युक्तिरभिधीयते—

रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत्।
अपृथग्यत्न-निर्वर्त्यः सोऽलंकारो ध्वनौ मतः ॥१६॥

निष्पत्तौ आश्चर्यभूतोऽपि यस्यालंकारस्य रसाक्षिप्ततयैव बन्धः शक्यक्रियो भवेत् सोऽस्मिन् अलक्ष्यक्रमव्यङ्ग्ये ध्वनौ अलंकारो मतः। तस्यैव रसाङ्गत्वं मुख्यमित्यर्थः। यथा—

> कपोले पत्राली करतलनिरोधेन मृदिता
> निपीतो निःश्वासैरयममृतहृद्योऽधररसः।
> मुहुः कण्ठे लग्नस्तरलयति वाष्प स्तनतटीं
> प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयम् ॥

रसाङ्गत्वे च तस्य लक्षणमपृथग्यत्ननिर्वर्त्यत्वम् इति यो रसं बन्धुमध्यवसितस्य कवेरलंकारस्तां वासनामत्यूह्य यत्नान्तरमास्थितस्य निष्पद्यते, स न रसाङ्गमिति। यमके च प्रबन्धेन बुद्धिपूर्वकं क्रियमाणे नियमेनैव यत्नान्तरपरिग्रह आपतति, शब्दविशेषान्वेषणरूपः। अलंकारान्तरेष्वपि तत् तुल्यमिति चेत्, नैवम्। अलंकारान्तराणि हि निरूप्यमाणदुर्घटनान्यपि रससमाहितचेतसः प्रतिभानवतः कवेरहम्पूर्विकया परापतन्ति। यथा कादम्बर्यां कादम्बरीदर्शनावसरे। यथा च मायारामशिरोदर्शनेन विह्वलायां

---

cites the second *āryā* under III. 59, which runs as follows: "इति यमकमशेषं सम्यगालोचयद्भिः सुकविभिरभियुक्तैर्वस्तु चौचित्यवद्भिः। सुविहितपदभङ्गं सुप्रसिद्धाभिधानं तदनु विरचनीयं सर्गबन्धेषु भूम्ना ॥"—यमक-श्लेष-चित्राणि हि सरसे काव्ये क्रियमाणानि रसखण्डनां कुर्युः। विशेषतस्तु शृगार-करुणयोः। कवेः किलैतानि शक्तिमात्रं पोषयन्ति, न तु रसवत्ताम्। यदुक्तम्—'यमकानुलोम—' इति। प्रयोगस्तु तेषां खण्डकाव्येषु देवतास्तुतिषु रणवर्णनेषु च ॥'

सीतादेव्यां सेतौ।[1] युक्तं चैतत्। यतो रसा वाच्यविशेषैरेवाक्षेप्तव्याः। तत्प्रतिपादकैश्च शब्दैस्तत्प्रकाशिनो वाच्यविशेषा एव रूपकादयोऽलङ्काराः। तस्मान्न तेषां बहिरङ्गत्वं रसाभिव्यक्तौ। यमक-दुष्करमार्गेषु तु तत् स्थितमेव। यत्तु रसवन्ति कानिचिद् यमकादीनि दृश्यन्ते, तत्र रसादीनामङ्गता यमकादीनां त्वङ्गितैव। रसाभासे चाङ्गत्वमप्यविरुद्धम्। अङ्गितया तु व्यङ्ग्ये रसे नाङ्गत्वं, पृथक् प्रयत्ननिर्वर्त्यत्वाद् यमकादेः ॥

EXPOSITION

§ 22. The Dhvanikāra here lays down the criterion as to which अलंकार should be properly regarded as instrumental (अङ्ग) towards the development of the intended emotion. A poetic figure for the improvisation (निष्पत्ति) of which no additional effort is required on the part of the poet besides what is unavoidably necessary for the proper suggestion of the sentiment, which is the only end of his creative urge, can be truly regarded as *organically related* with the poetic art. Anything that cannot stand this test must be brushed aside as mere external appendages (बहिरङ्ग). Thus यमक, मुरजबन्ध, सभङ्गश्लेष etc. can be improvised by the poet only after a good deal of contemplation and search after suitable words and meanings, which for the time being distracts his mind from the final aim in view—viz. the suggestion of the requisite emotion

1. References are to Candrāpīḍa's first meeting with the Princess Kādambarī in Bāṇa's prose romance (*see* Peterson's Edn. of *Kādambarī*, pp. 186-189) and to Pravarasena's *Setubandha*, *Āśvāsa* XI (NSP. Edn.), where Sītā swoons away at the sight of Rāma's severed head falsely presented by Rāvaṇa to convince Sītā of her lord's sad end.

(रसाभिव्यक्ति).[1] Thus, they should be discarded as extraneous elements, as far as possible. Abhinavagupta states that though it has been observed in the previous *kārikā* that यमक etc. are to be carefully avoided in the case of शृङ्गार alone, yet it is not the whole truth. They must be *universally* avoided irrespective of the nature of the emotion to be suggested. Compare : '**रसेति**—रस-समवधानेन विभावादिघटनामेव कुर्वंस्तन्नान्तरीयकतया यमासादयति, स एवात्रालंकारो रसमार्गे, नान्यः। तेन वीराद्भुतादिरसेष्वपि यमकादि कवेः प्रतिपत्तुश्च रसविघ्नकार्येव सर्वत्र। गड्डुरिकाप्रवाहोपहृतसहृदयधुराधिरोहणविहीनलोकावर्जनाभिप्रायेण तु मया शृङ्गारे विप्रलम्भे च विशेषत इत्युक्तमिति भावः। तथा च 'रसेऽङ्गत्वं तस्मादेषां न विद्यते' इति सामान्येन वक्ष्यति।'—*Op. cit.*, pp. 219–20. Note also the following *kārikās* from Mahimabhaṭṭa's *Vyaktiviveka*, as they express the same idea as the present *kārikā* of the *Dhvanyāloka*—

"न चालंकारनिष्पत्त्यै रसबन्धोद्यतः कविः।
यतते ते हि तत्सिद्धिनान्तरीयकसिद्धयः॥
यतः—रसस्याङ्गं विभावाद्याः साक्षान्निष्पादकत्वतः।
तद्वैचित्र्यचोवितवपुषोऽलकारास्तु तदाश्रयाः॥"—*Op. cit.*, *Vimarśa*, II. 75–76.

कपोले पत्राली..न तु वयम्—Comp. °*Locana* : करकिसलयन्यस्तवदना श्वासतान्ताधरा प्रवर्तमानबाष्पनिरुद्धकण्ठी अविच्छिन्नरुदितचञ्चत्कुचतटा रोषमपरित्यजन्ती चाटूक्त्या यावत् प्रसाद्यते

---

1. Compare : 'रसस्य परिपन्थित्वान्नालंकारः प्रहेलिका।
उक्तिवैचित्र्यमात्रं सा च्युतदत्ताक्षरादिका॥—
Sāhityadarpaṇa, X. 13.

Also—"एवं खड्गबन्धादिकमप्यूह्यम्। काव्यान्तर्गड्डुभूततया तु नेह प्रपञ्च्यते।"—*loc. cit.*

तावदीर्ष्याविप्रलम्भगतानुभावचर्वणावहितचेतस एव वक्तुः श्लेष-रूपक-व्यतिरेकाद्या अयत्ननिष्पन्नाश्चर्वयितुरपि न रसचर्वणाविघ्नमादधतीति ॥—*Op. cit.*, p. 220.

'रसाङ्गत्वे....न, रसाङ्गम्'—The criterion as to whether a particular अलंकार is रसाङ्ग (conducive to the suggestion of the desired aesthetic emotion) or not, is whether it is produced by the same effort that is called forth for the suggestion of the emotion proper or not.

अलंकारान्तरेष्वपि....तत्स्थितमेव—One might, however, contend that poetic figures like समासोक्ति, अप्रस्तुत-प्रशंसा etc., are no less difficult and intricate than यमक, सभङ्ग-श्लेष etc., and they require as much contemplation and effort on the part of the poet for their proper insertion in a *kāvya* as the latter, that have been categorically tabooed from the scheme of aesthetic realisation. So there can be no reasonable basis to be found for this discriminatory treatment. To this Ānandavardhana replies : True, the said figures are as much difficult and intricate as यमक, मुरजबन्ध etc. Still, the former group differs from the latter in one important respect—viz. while the former spring spontaneously in ceaseless succession from the fountain-head of the poet's imagination as he is absorbed in the contemplation of the emotion in question, it is not so with the latter. The figures of speech like रूपक, समासोक्ति. अप्रस्तुतप्रशंसा etc., are nothing but turns of expression that convey the requisite meanings consisting of proper विभाव's, अनुभाव's, etc., that alone suggest the aesthetic emotion. ('तत्' in तत्प्रतिपादकैश्च शब्दैः refers to the वाच्यविशेष, viz. विभाव's, अनुभाव's etc.. that constitute the particular import of words constituting a poetic expression or अलंकार ; while the second तत्° in तत्प्रकाशिनः refers to रसाः in the preceding sentence.) Thus, they can no more be regarded as external appendages than the very thought itself of the poet. The

poet's idea itself gushes forth couched spontaneously in those peculiar modes of expression which are called poetic figures or अलंकार's, and cannot be divested of the latter without being completely metamorphosed in the process. Change the poetic figure and you make the poet say something quite different from what was originally intended by him. Kuntaka admirably expresses this idea in the following extract from his *Vakroktijīvita* :—

"अलंकृतिरलंकार्यमपोद्धृत्य विविच्यते ।
तदुपायतया तत्त्वं सालंकारस्य काव्यता ॥

—अलंकृतिरलंकरणम्, अलंक्रियते ययेति विगृह्य । सा विविच्यते विचार्यते । यच्चालंकार्यमलंकरणीयं वाचकरूपं वाच्यरूपं च तदपि विविच्यते । तयोः सामान्यविशेषलक्षणद्वारेण स्वरूपनिरूपणं क्रियते । कथम्—अपोद्धृत्य । निष्कृष्य पृथक् पृथगवस्थाप्य, यत्र समुदायरूपे तयोरन्तर्भावस्तस्माद् विभज्य । केन हेतुना—तदुपायतया । तदिति काव्यं परामृश्यते । तस्योपायस्तदुपायः तस्य भावस्तदुपायता तया हेतुभूतया । तस्मादेवंविधो विवेकः काव्यव्युत्पत्त्युपायतां प्रतिपद्यते । दृश्यते च समुदायान्तःपातिनामसत्यभूतानामपि व्युत्पत्तिनिमित्तम् अपोद्धृत्य विवेचनम् । यथा—पदान्तर्भूतयोः प्रकृति-प्रत्यययोः वाक्यान्तर्भूतानां पदानां चेति । यद्यवम् असत्यभूतोऽप्यपोद्धारस्तदुपायतया क्रियते तत् किं पुनः सत्यम्-इत्याह । 'तत्त्वं सालंकारस्य काव्यता' । अयमत्र परमार्थः—सालंकारस्य अलंकरण-सहितस्य सकलस्य निरस्तावयवस्य सतः समुदायस्य काव्यता कविकर्मत्वम् । तेनालंकृतस्य काव्यत्वमिति स्थितिः, न पुनः काव्यस्यालंकारयोगः ॥"—*Op. cit.*, pp. 6-7. Compare also the following *kārikās* from the same work of Kuntaka :—

प्रतिभा-प्रथमोद्भेदसमये यत्र वक्रता ।
शब्दाभिधेययोरन्तः स्फुरतीव विभाव्यते ॥[1]

---

1. Compare *Vṛtti* : तदयमत्र परमार्थः—यत् कविप्रयत्ननिरपेक्षयारेव

अलंकारस्य कवयो यत्रालंकरणान्तरम् ।
असन्तुष्टा निबध्नन्ति हारादेर्मणिबन्धवत् ।।
रत्न-रश्मिच्छटोत्सेकभासुरैर्भूषणैर्यथा ।
कान्ताशरीरमाच्छाद्य भूषायै परिकल्प्यते ।।
यत्र तद्वदलंकारैर्भ्राजमानैर्निजात्मना ।
स्वशोभातिशयान्तःस्थम अलङ्कार्यं प्रकाश्यते ।
सोऽतिदुःसञ्चरो येन विदग्धकवयो गताः ।
खड्गधारापथेनेव सुभटानां मनोरथाः ।।—*Op. cit.*, I. 34-37 & 43.

यत्तु रसवन्ति....अविरुद्धम्—There are, however, poetic compositions, rare though, where यमक, अनुप्रास etc., are met with and yet there is no appreciable loss of aesthetic charm. Compare, for instance, *Raghu-vaṃśa,* Canto IX.[1] In Ānanda-vardhana's opinion, here, too it is the sound-effect due to यमक that is really more attractive and as such predominant (अङ्गिन्), while the emotion plays a subordinate rôle (अङ्ग). In the case of रसाभास, however, the introduction of यमक etc. is not barred.

अङ्गितया तु ....यमकादेः—But where the element of emotion is pre-eminent, the poet should be well advised to totally avoid these figures of sound, that are detrimental to the successful development of sentiments in general.

TEXT

§ २३ । अस्यैवार्थस्य संग्रहश्लोकाः—

शब्दार्थयोः स्वाभाविकः कोऽपि वक्रताप्रकारः परिस्फुरन् परिदृश्यते ।—*loc. cit.*

1. Compare :—'उदाहरणान्यत्र शिशुपालवधे चतुर्थे सर्गे समपकाणि कानिचिदेव यमकानि रघुवंशे वा वसन्तवर्णने'—Kuntaka's *Vakroktijīvita, Vṛtti* on II. 6-7.

रसवन्ति हि वस्तूनि सालंकाराणि कानिचित् ।
एकेनैव प्रयत्नेन निर्वर्त्यन्ते महाकवेः ॥
यमकादिनिबन्धे तु पृथग्यत्नोऽस्य जायते ।
शक्तस्यापि रसेऽङ्गत्वं तस्मादेषां न विद्यते ॥
रसाभासाङ्गभावस्तु यमकादेर्न वार्यते ।
ध्वन्यात्मभूते शृङ्गारे त्वङ्गता नोपपद्यते ॥

EXPOSITION

§ 23. Ānandavardhana sums up the theme of the preceding sections in these mnemonic verses of his own.

TEXT

§२४ । इदानीं ध्वन्यात्मभूतस्य शृङ्गारस्य व्यञ्जकोऽलंकारवर्ग आख्यायते—

ध्वन्यात्मभूते शृङ्गारे समीक्ष्य विनिवेशितः ।
रूपकादिरलंकारवर्ग एति यथार्थताम् ॥१७॥

अलंकारो हि बाह्यालंकारसाम्यादङ्गिनश्चारुत्वहेतुरुच्यते । वाच्यालंकारवर्गश्च रूपकादिर्यावानुक्तो वक्ष्यते च कैश्चित्, अलंकाराणामनन्तत्वात्, स सर्वोऽपि यदि समीक्ष्य विनिवेश्यते, तदलक्ष्यक्रमव्यङ्ग्यस्य ध्वनेरङ्गिनः सर्वस्यैव चारुत्वहेतुर्निष्पद्यते ॥

EXPOSITION

§ 24. If poetic figures like रूपक etc. which have already been noticed and defined by ancient writers like Bharata, Bhāmaha, Daṇḍin etc., as also others that might be improvised by future authors (वक्ष्यते च कैश्चित्), can become auxiliary (अङ्ग) towards the suggestion of the sentiment of love (शृङ्गार), if they are introduced after due reflection (समीक्षा) as to their appropriateness. True, that Daṇḍin in his *Kāvyādarśa*

remarks that all *alamkāras* in general can add emotional grace to a piece of poetic composition ('कामं सर्वोऽप्यलंकारो रसमर्थ निषिञ्चति'), yet his conception of *rasa* was widely divergent from the Dhvanikāra's. Moreover, he did not lay down any definite rules as regards the judicious introduction of poetic figures on particular occasions, as has been attempted by the Dhvanikāra here.

TEXT

§ २५ । एषा चास्य विनिवेशने समीक्षा—

विवक्षा तत्परत्वेन नाङ्गित्वेन कदाचन ।
काले च ग्रहण-त्यागौ नातिनिर्वहणैषिता ॥१८॥
निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणम् ।
रूपकादेरलंकारवर्गस्याङ्गत्वसाधनम् ॥१९॥

रसबन्धेष्वत्यादृतमनाः कविर्यमलंकारं तदङ्गतया विवक्षति ।
यथा—

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ।
करौ व्याधून्वत्याः पिबसि रतिसर्वस्वमधरम्
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती ॥

अत्र हि भ्रमर-स्वभावोक्तिरलंकारो रसानुगुणः ॥

EXPOSITION

§ 25. Ānandavardhana in this section lays down certain principles that must be rightly kept in view by an aspiring poet if he desires to keep in tact the emotional effect. The first of these principles is : विवक्षा तत्परत्वेन नाङ्गित्वेन

कदाचन—The *alaṃkāra* must not be allowed to rival or transcend the charm of the aesthetic relish, and must always be kept subordinate to the latter, which is the very soul of a poetic composition. To illustrate this, Ānandavardhana cites the verse 'चलापाङ्गां दृष्टिम्' etc. The poetic figure here is स्वभावोक्ति, as Duṣyanta, who is the speaker, vividly describes the movements of the bee that hums and buzzes round Śakuntalā's beautiful lotus-like face under the guise of a lover as it were.

The poetic figure is quite in unison with the sentiment depicted here (viz. संभोग-शृङ्गार) that is predominantly suggested, and as such can be truly called an *alaṃkāra* and not through courtesy alone. As Abhinavagupta notes : हे मधुकर, वयमेवं त्रिधाभिलाषचाटुप्रवणा अपि तत्त्वान्वेषणात् वस्तुवृत्तेऽन्विष्यमाणे हता आयासमात्रपात्रीभूता जाताः । त्वं खलु इति निपातेन अयत्नसिद्धं तत्रैव चरितार्थत्वमिति शकुन्तलां प्रत्यभिलाषिणो दुष्यन्तस्येयमुक्तिः । तथाहि कथमेतदीयकटाक्षगोचरा भूयास्म, कथमेषा अस्मदभिप्रायव्यञ्जकं रहोवचनमाकर्ण्यात्, कथं तु हठादनिच्छन्त्या अपि परिचुम्बनं विधेयास्मेति यदस्माकं मनोराज्यपदवीमधिशेते तत्तवायत्नसिद्धम् । भ्रमरो नीलोत्पलधिया तदाशङ्काकरीं दृष्टिं पुनः पुनः स्पृशति । श्रवणावकाशपर्यन्तत्वाच्च नेत्रयोरुत्पलशङ्कानपगमात तत्रैव दन्ध्वन्यमान आस्ते । सहज-सौकुमार्य-त्रास-कातरायाश्च रतिनिधानभूतं विकसितारविन्दकुवलयामोदमधुरमधरं पिबतीति भ्रमरस्वभावोक्तिरलंकारोऽङ्गतामेव प्रकृतरसस्योपगतः । अन्ये तु भ्रमरस्वभावे उक्तिर्यस्य इति भ्रमरस्वभावोक्तिरत्र रूपकव्यतिरेक इत्याहुः ॥—°*Locana*, pp. 224-225.

TEXT

§ २६ । 'नाङ्गित्वेने'ति न प्राधान्येन । कदाचिद्‌ रसादितात-

पर्येण विवक्षितोऽपि ह्यलङ्कारः कश्चिदङ्गित्वेन विवक्षितो दृश्यते। यथा—

चक्राभिघातप्रसभाज्ञयैव[1] चकार यो राहुवधूजनस्य।
आलिङ्गनोद्दामविलासवन्ध्यं रतोत्सवं चुम्बनमात्रशेषम्॥

अत्र हि पर्यायोक्तस्य अङ्गित्वेन विवक्षा रसादितात्पर्ये सत्यपीति॥

EXPOSITION

§ 26. In this verse. the figure of speech is पर्यायोक्त (*see* notes on *Uddyota* I § 35), since the effect which has been *expressed* in words and the cause *implied* therefrom are both contextual (प्राकरणिक). Comp. "'चक्राभिघाते'ति प्राचीनपद्य राहुशिरश्छेदकारीति व्यङ्ग्यं राहुवधूजनसंबन्धि चुम्बनमात्रावशिष्टरतोत्सवनिर्मातृत्वेन रूपेण प्रकारान्तरेणाभिधीयते इत्यस्यापि विवेचने क्रियमाणे राहुशिरश्छेदकर्तृत्वरूपो धर्मः स्वसमानाधिकरणेन तादृशरूपान्तरेण साक्षादुपात्तेन गम्यत इत्येव पर्यवस्यति।" —*Rasagaṅgādhara*, p. 547. The poet intends to convey in this verse the divine prowess of Vāsudeva, who cut off the head of the demon Rāhu with his disc. But it is the mode of expression that is more striking here.

---

1. The original reading in Meṇṭha's *Hayagrīvavadha*, a lost epic, from which the present verse is quoted, was एकाभिघात° and not चक्राभिघात° which is merely an emendation based on misconception. This is distinctly noticed by Rūyyaka in his commentary on Mahimabhaṭṭa's *Vyaktiviveka*. Compare: 'एकाभिघात'-इति हयग्रीववधे पाठः स्थितः, सुदर्शनस्य पुंलिङ्गस्य प्रकान्तत्वात् 'य' इत्यनेन परामशात्। तत्तु अनवबुध्य 'चक्रं' यदि परामृश्यते, तदा यच्छब्दस्य नपुंसकता स्यात्। तन्मुरारिरेवात्र परामृश्यते इत्याशयेन 'चक्राभिघाते'ति पठन्ति। न त्वयं तत्र प्रस्तावः॥— p. 272.

As Ānandavardhana states: अत्र हि पर्यायोक्तस्य....सत्य-पीति. Compare °*Locana*: अत्राह कश्चित्—'पर्यायोक्तमेवात्र कवेः प्राधान्येन विवक्षितम्, न तु रसादि। तत् कथमुच्यते रसादितात्पर्ये सत्यपी'ति। मैवम्; वासुदेव-प्रतापो ह्यत्र विवक्षितः। स चात्र चारुत्वहेतुतया न चकास्ति, अपि तु पर्यायोक्तमेव ॥—*Op. cit.*, p. 225.

TEXT

§ २७। अङ्गत्वेन विवक्षितमपि यमवसरे गृह्णाति, नानवसरे। अवसरे गृहीतिर्यथा—

उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणा-
दायासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः।
अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं
पश्यन् कोप-विपाटलद्युति मुखं देव्याः करिष्याम्यहम् ॥

—इत्यत्र उपमा-श्लेषस्य।

गृहीतमपि च यमवसरे त्यजति तद्रसानुगुणतयाऽलंकारान्तरा-पेक्षया। यथा—

रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणै-
स्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्तास्तथा मामपि।
कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः
सर्वं तुल्यमशोक! केवलमहं धात्रा सशोकः कृतः ॥

—अत्र हि प्रबन्धप्रवृत्तोऽपि श्लेषो व्यतिरेकविवक्षया त्यज्यमानो रसविशेषं पुष्णाति ॥

EXPOSITION

§ 27. In this section Ānandavardhana explains the portion 'काले च ग्रहण-त्यागौ' in the *Kārikā* 18. The poet should retain (ग्रहण) or reject (त्याग) a particular अलंकार according as it enhances or deters the development of the

principal emotion. Ānandavardhana illustrates the first variety in the verse 'उद्दामोत्कलिकाम्—' (*Ratnāvalī*). Here the figure is उपमा-श्लेष (i.e. *Simile* based on *double entendre*) and the occasion of the employment of this figure is in keeping with the sentiment of ईर्ष्याविप्रलम्भ which it is the object of the poet to suggest. Compare °*Locana* : उद्दामा उद्गताः कलिका यस्याः। उत्कलिकाश्च रुहरुहिकाः। क्षणात् तस्मिन्नेवावसरे प्रारब्धा जृम्भा विकासो यया। जृम्भा च मन्मथकृतोऽङ्गमर्दः। श्वसनोद्गमवसन्तमारुतोल्लासैरात्मनो लतालक्षणस्य आयासमायासनमान्दोलनयत्नमातन्वतीम्। निःश्वासपरम्पराभिश्च आत्मन आयासं हृदयस्थितं सन्तापमातन्वतीं प्रकटीकुर्वाणाम्। सह मदनाख्येन वृक्षविशेषेण, मदनेन कामेन च। अत्र उपमाश्लेष ईर्ष्याविप्रलम्भस्य भाविनो मार्गपरिशोधकत्वेन स्थितस्तच्चर्वणाभिमुख्यं कुर्वन् अवसरे रसस्य प्रमुखीभावादशायां पुरःसरायमाणो गृहीतः— इति भावः॥—*Op. cit.*, p. 226. As an example of rejection (त्याग) according to the exigency of the occasion Ānandavardhana cites 'रक्तस्त्वं नवपल्लवैः'.[1] 'अत्र हि....पुष्णाति'—In the first three feet of the verse the figure is हेतुश्लेष (i.e. काव्यहेतु based on श्लेष), but in the last hemistich, this figure has been abandoned by the poet in favour of the figure of speech व्यतिरेक, which is more capable of suggesting the mood of विप्रलम्भश्रृङ्गार than the former. Compare °*Locana* : रक्ता लोहितः। अहमपि प्रवृद्धानुरागः। अत्र च प्रबोधको विभावः

---

1. 'सीतावियोगोपनतविसंस्थुलावस्थस्य दाशरथेरियमुक्तिः'—Hemcandra's °*Viveka* on his *Kāvyānuśāsana*. "मामाहुः पृथिवीभुजामधिपतिं नागाधिराजो भवान्, अव्युच्छिन्नपृथुप्रवृत्ति भवतो दानं ममाप्यर्थिषु। स्त्रीरत्नेषु ममोर्वशी प्रियतमा यूथे तवेयं वशा, सर्वं मामनु ते प्रियाविरहजां त्वं तु व्यथां मानुभूः॥" —*Vikramorvaśī*, Act IV, is a close parallel of the verse cited in the *Vṛtti*.

तदीयपल्लवराग इति मन्तव्यम्। एवं प्रतिपादमाद्योऽर्थो विभावत्वेन व्याख्येयः। अत एव हेतुश्लेषोऽयम्। सहोक्त्युपमाहेत्वलंकाराणां हि भूयसा श्लेषानुग्राहकत्वम्। अनेनैवाभिप्रायेण भामहो न्यरूपयत्—'तत्सहोक्त्युपमाहेतुनिदशात् त्रिविधम्'--इत्युक्त्या, न तु अन्यालंकारानुग्रहनिराचिकीर्षया। **रसविशेषमिति** विप्रलम्भम्। सशोकशब्देन व्यतिरेकमानयता शोकसहभूतानां निवदचिन्तादीनां व्यभिचारिणां विप्रलम्भपरिपोषकाणामवकाशो दत्तः ॥—*Op. cit.*, pp. 227-238. The verse has been quoted by Jágannātha in his *Rasagaṅgādhara* under the section on व्यतिरेक. He criticises Appayya Dīkṣita, who in his *Kuvalayānanda*, refers to the Dhvanikāra's remarks on this verse (as recorded in this section), which seem to have been much misrepresented by him in the heat of the controversy. Compare :—

"यदपि कुवलयानन्दकृताऽलंकारसर्वस्वोक्तार्थानुवादकेन न्यूनतायामुदाहृतम्—"रक्तस्त्वं नव-पल्लवैरहमपि श्लाघ्यैः प्रियाया गुणैः—" इत्यत्र सशोकत्वेन अशोकापेक्षयाऽपकर्षः पर्यवस्यति-इति, तदपि चिन्त्यम्। रत्याद्यनुकूलतया कुतश्चिदङ्गाद् भूषणापसारणं यथा शोभाविशेषाय भवति, एवं प्रकृते उपमालंकारदूरीकरणमात्रमेव रसानुगुणतया रमणीयम्, न व्यतिरेकः। अत एव असमालंकारं प्राञ्चो न मन्यन्ते, अन्यथा तवालंकारान्तरतया तत्स्वीकारापत्तेः। ....अत एव ध्वनिकृता सहृदयधुरन्धरेण 'सुकविषु रसानुसारेण क्वचिदलंकारसंयोगं क्वचिदलंकारवियोगं च कुर्याद्' इत्युक्त्वा 'रक्तस्त्वम्' इति पद्यं सादृश्यदूरीकरणे उदाजह्रे।...."—*Op. cit.*, pp. 475-76.[1]

---

1. But compare Nāgoji Bhaṭṭa's arguments in defence of Appayya Dīkṣita's view: "अत्रेदं चिन्त्यम्—उपमानादि उपमेय वर्ण्यमानं वैलक्षण्यमेव गुणाधिक्यकृतं व्यतिरेकः। तच्च क्वचिदुपमेयस्योत्कर्षपर्य-

TEXT

§ २८। नात्रालंकारद्वयसन्निपातः। किं तर्हि ? अलंकारान्तरमेव श्लेष-व्यतिरेकलक्षणं नरसिंहवद् इति चेत्, न। तस्य प्रकारान्तरेण व्यवस्थापनात्। यत्र हि श्लेषविषय एव शब्दे प्रकारान्तरेण व्यतिरेक-प्रतीतिर्जायते, स तस्य-विषयः। यथा— 'स हरिर्नाम्ना देवः सहरिर्वरतुरगनिवहेन'-इत्यादौ। अत्र हि अन्य एव शब्दः श्लेषस्य विषयोऽन्यश्च व्यतिरेकस्य। यदि चैवंविधे विषयेऽलंकारान्तरत्वकल्पना क्रियते, तत् संसृष्टेर्विषयापहार एव स्यात्। श्लेषमुखेनैवात्र व्यतिरेकस्यात्मलाभ इति नायं संसृष्टेर्विषय इति चेत्, न। व्यतिरेकस्य प्रकारान्तरेणापि दर्शनात्। यथा—

> नो कल्पापायवायोरदयरयदलत्क्ष्माधरस्यापि शम्या
> गाढोद्गीर्णोज्ज्वलश्रीरहनि न रहिता नो तमःकज्जलेन।
> प्राप्तोत्पत्तिः पतङ्गात् न पुनरुपगता मोषमुष्णत्विषो नो
> वर्त्तिः सैवान्यरूपा सुखयतु निखिलद्वीपदीपस्य दीप्तिः॥

नात्र श्लेषमात्राच्चारुत्वप्रतीतिरस्तीति श्लेषस्य व्यतिरेकाङ्गत्वेनैव

वसायि, क्वचित्तदपकर्षपर्यवसायि, क्वचित्तादनुभयपर्यवसायि। आधिक्य-न्यूनत्व-शब्दावपि उत्कर्षापकर्षपरौ एव। तत्र अपकर्षपर्यवसायि रक्तस्त्वमित्यत्र। अत्र उपमेये सशोकत्वादिगम्यचेतनत्व-सहृदयत्वादिभिः शोकरहितत्व-शोकसहितत्वाभ्यां च तत्ताद्गुणाधिक्यप्रतीतावपि शोकस्य स्वरूपेणापकृष्टत्वात् विरहिवाक्यत्वाच्च वरमचेतनत्वमेव सम्यक् न पुनः प्रियावियोगादिजन्यशोकास्पदचैतन्यादि-इति प्रतीतिपर्यवसानात् विरहानुगुणकविनिबद्धतात्पर्यविषयकोऽपकर्षः पर्यवस्यति। अत एव प्रियावियोगाद्यपि तुल्यम् इत्यर्थकमावयोः सर्वं तुल्यम् इति वाक्यं चरितार्थम्। एतेन रत्याद्यनुकूलेत्यादि उदाजह्रे-इत्यन्तमपास्तम्। सशोकत्ववर्णनेऽपि रक्तत्वादिधर्मैः सादृश्यस्य विप्रलम्भपरिपोषकतया चमत्कारिणः सम्भवेन तदपह्नवस्य कर्तुमशक्यत्वात्॥—*loc. cit.*

विवक्षितत्वात् न स्वतोऽलंकारता इत्यपि न वाच्यम्। यत एवंविधे विषये साम्यमात्रादपि सुप्रतिपादिताच्चारुत्वं दृश्यत एव। यथा—

आक्रन्दाः स्तनितैर्विलोचनजलान्यश्रान्तधाराम्बुभि-
स्तद्विच्छेदभुवश्च शोकशिखिनस्तुल्यास्तडिद्विभ्रमैः।
अन्तर्मे दयितामुखं तव शशी वृत्तिः समैवावयो-
स्तत् किं मामनिशं सखे जलधर! त्वं दग्धुमेवोद्यतः॥

—इत्यादौ॥

EXPOSITION

§ 28. नात्रालंकार....चेत—Now it might be argued that in the verse 'रक्तस्त्वम्—', there are *not two* independent figures, viz. श्लेष *and* व्यतिरेक, as shown presently, but there is only *one* figure of speech which is श्लेष-व्यतिरेक (संकर), quite different from the former. So it cannot be stated that श्लेष has been rejected in favour of व्यतिरेक, for it presupposes the existence of two independent figures, a false assumption. Compare °*Locana*—"किं तर्हीति। सङ्करालंकार एवायम्; तत्र किं वा त्यक्तं किं वा गृहीतमिति परस्याभिप्रायः॥"

न....इत्यादौ—Ānandhavardana now defines the scope of संकर proper, and distinguishes it from a case where श्लेष *and* व्यतिरेक are both independent figures. When both श्लेष and व्यतिरेक coinhere in the same substratum (*word-unit*), then and then only can there be a genuine case of संकर. But when the substrata of the two figures are different, they should be regarded as two independent figures and not the constituents of a *tertium quid*-viz. संकर. For example, 'सहरिः....निवहेन' is an instance of श्लेषव्यतिरेक (संकर), since the expression सहरिः which is श्लिष्ट is the substratum

of व्यतिरेक too. Comp. °*Locana* : तस्येति संकरस्य । एकत्र हि विषयेऽलंकारद्वयप्रतिभोल्लासः संकरः । सहरिशब्द एको विषयः । सः हरिः, यदि वा सह हरिभिः सहरिरिति ।।"—p. 228. Thus it is really an example of एक-वाचकानुप्रवेशसंकर.[1]

अत्र हि....व्यतिरेकस्य—But in the instance cited in the *Vrtti* —viz. 'रक्तस्त्वम्—' etc., the two figures श्लेष and व्यतिरेक do not coinhere in the same substratum. Thus श्लेष belongs to such words as रक्त, शिलीमुख etc., while the apprehension of व्यतिरेक is given rise to by the terms अशोक and सशोक. So it cannot be called a case of एकवाचकानुप्रवेशसंकर. "अत्र हीति । हिशब्दस्तुशब्दस्यार्थे । 'रक्तस्त्वम्-' इत्यत्रेत्यर्थः । अन्य इति—रक्त इत्यादिः । अन्यश्च अशोक-सशोकादिः ।'—°*Locana.* यदि च.... स्यात्—Now, it might be contended that if the whole verse constituting a sentence be taken as *one single unit* instead of such discrete words as रक्त, सशोक etc., both श्लेष and व्यतिरेक can be looked upon as coinhering in the same substratum, and the verse 'रक्तस्त्वम्—' would be an instance of श्लेष-व्यतिरेक संकर. Ānandavardhana argues that such a contention would leave no scope for संसृष्टि where two or more figures come together independent of one another, for all such cases would be comprehended under संकर.[2] As °*Locana* observes : "नत्वेकं वाक्यात्मकं विषयमाश्रित्य एकविषयत्वाद् अस्तु संकरः-इत्याशङ्क्याह-यदीति । एवंविधे वाक्यलक्षणे विषये । विषय इत्येकत्वं विवक्षितं बोध्यम् । एकवाक्यापेक्षया यद्येकविषयत्वमुच्यते, तत्र क्वचित् संसृष्टिः स्यात्, संकरेण व्याप्तत्वात् ।।"—p. 229.

---

1. Compare : स्फुटमेकत्र विषये शब्दार्थालंकृतिद्वयम् । व्यवस्थितं च'—*Kāvyaprakāśa*, X. 141.

2. For the diference between संकर and संसृष्टि *see* our notes on *Uddyota* I, Sec. §36.

श्लेषमुखेनैवात्र......दर्शनात्.—Having refuted the view that 'रक्तस्त्वम्—' is an instance of एकवाचकानुप्रवेसंकर, Ānandavardhana proceeds to confute the view that it is an illustration of अनुग्राह्यानुग्राहकभावसंकर. Others might argue that the figure of speech व्यतिरेक is based on उपमा, and as in the present verse the व्यतिरेक in the last foot is *based* on श्लेषोपमा, the latter is the cause of the former, and the relation of अङ्गाङ्गिभाव or अनुग्राह्यानुग्राहकभाव subsists between them. So it is a case of श्लेष-व्यतिरेक-संकर of the अङ्गाङ्गिभाव variety. Ānandavardhana replies that this argument is not reasonable For, though व्यतिरेक must be based on उपमा, still there is no hard and fast rule that the *similarity* must be explicitly stated in so many words. It might as well be implied and hidden in the background.[1] So, though in the verse cited in the *Vṛtti* उपमा based on श्लेष is expressed in the opening lines, yet that particular उपमा should not be regarded as forming the basis of the व्यतिरेक of the last line. Compare *Locana*: ननूपमागर्भो व्यतिरेकः, उपमा च श्लेषमुखेनैवायातेति श्लेषोऽत्र व्यतिरेकस्यानुग्राहक इति सङ्करस्यैष विषयः। यत्र तु अनुग्राह्यानुग्राहक-भावो नास्ति तत्र एकवाक्यगामित्वेऽपि संसृष्टिरेव। तदेतदाह—किं सर्वत्र उपमायाः स्वशब्देनाभिधाने व्यतिरेको भवति, उत गम्यमानत्वे। तत्राद्यं पक्षं दूषयति—प्रकारान्तरेणेति। उपमाभिधानेन विनापि-इत्यर्थः॥—*Op. cit.*, p. 229. Ānandavardhana illustrates this by citing the verse 'नो कल्पापायवायोः—' (Mayūra's *Sūryaśataka*). Here he contrasts the flickering flame of an ordinary lamp with the luminous and inextinguishable blaze of the solar orb. It is an instance of व्यतिरेक, but no similarity is *expressed* at all.

---

1. Compare : शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयोः।
तत्र यद् भेदकथनं व्यतिरेकः स उच्यते॥

As Ānandavardhana notes: अत्र हि....दर्शितः. Compare °*Locana* : शम्या शमयितुं शक्या इत्यर्थः । दीपवर्त्तिस्तु वायुमात्रेण शमयितुं शक्यते। तम एव कज्जलं तेन। न नो रहिता अपितु रहितैव। दीपवर्त्तिस्तु तमसाऽपि युक्ता भवति, अत्यन्तमप्रकटत्वात् कज्जलेन च उपरिचरेण। पतङ्गात् अर्कात्। दीपवर्त्तिः पुनः शलभाद् ध्वंसते, नोत्पद्यते। साम्येति। साम्यस्य उपमायाः प्रपञ्चेन प्रबन्धेन यत् प्रतिपादनं स्व-शब्देन तेन विनापीत्यर्थः। एतदुक्तं भवति—प्रतीयमानैव उपमा व्यतिरेकस्य अनुग्राहिणी भवन्ती नाभिधानं स्वकण्ठेनापेक्षते। तस्मान्न श्लेषोपमा व्यतिरेकस्य अनुग्राहित्वेन उपात्ता ।।—p. 230.

नात्र....दृश्यत एव—But, inspite of all that has been said in favour of श्लेष being an independent figure, the opponents might persist that though in other cases श्लेषोपमा might be considered in detachment from व्यतिरेक, yet in the present case श्लेषोपमा is the अङ्ग (being the cause) of व्यतिरेक, as there is no charm due to the former and consequently it would be a case of अङ्गाङ्गिभावसंकर. Ānandavardhana demurs that श्लेषोपमा has its own beauty, and should be regarded as an *independent* figure and not merely a constituent element of व्यतिरेक. He quotes the verse—'आक्रन्दाः स्तनितैः—' to illustrate that in the case of व्यतिरेक, उपमा alone (without any touch of श्लेष) can enhance the beauty of a poem ; and there is no gainsaying the fact that उपमा based on श्लेष would bc more charming still. Compare °*Locana* : "यद्यप्यन्यत्र नैवं, तथापीह तत्प्रावण्येनैव सोपात्ता ; तदप्रावण्ये स्वयं चारुत्वहेतुत्वाभावात्—इति श्लेषोपमाऽत्र पृथगलंकारभावमेव न भजते। तदाह-नात्रेति। एतदसिद्धं स्व-संवेदनबाधितत्वादिति हृदये गृहीत्वा स्वसंवेदनमपह्नुवानं परं श्लेषं विना उपमामात्रेण चारुत्वसंपन्नमुदाहरणान्तरं दर्शयन् निरुत्तरीकरोति—यत् इत्यादिना।" —p. 231.

TEXT

§ २९ । रसनिर्वहणैकतानहृदयो यं च नात्यन्तं निर्वोढु-मिच्छति । यथा—

कोपात् कोमललोलबाहुलतिकापाशेन बद्ध्वा दृढं
नीत्वा वासनिकेतनं दयितया सायं सखीनां पुरः ।
भूयो नैवमिति स्खलत्कलगिरा संसूच्य दुश्चेष्टितं
धन्यो हन्यत एव निह्नुतिपरः प्रेयान् रुदत्या हसन् ॥

अत्र हि रूपकमाक्षिप्तमनिर्व्यूढं च परं रसपुष्टये ॥

EXPOSITION

§ 29, Ānandavardhana now explains the hemistich 'नातिनिर्वहणैषिता' : "एवं ग्रहणत्यागौ समर्थ्य 'नातिनिर्वहणैषिता' इति भागं व्याचष्टे—रसेति ."—°*Locana.* The poet should not carry a particular figure to its logical extreme (निर्वहण), if the emotional effect be hampered thereby. Thus, in the verse quoted the slender arm has been likened to 'a creeper' ; but the poet has stopped there, without availing himself of the implications of that super-imposition, which if worked out logically in all its details would have demanded the further superimposition of व्याधवधू on दयिता, of कारागारपञ्जर on वासगृह, a process contrary to the dictates of all good sense and propriety. Thus, the रूपक has been *arrested,* in conformity with the prevailing sentiment of शृङ्गार. Compare : "बाहुलतिकायाः बन्धनीयपाशत्वेन रूपणं यदि निर्वाहयेत्, दयिता व्याधवधूः, वासगृहं कारागार-पञ्जरादीति परमनौचित्यं स्यात्"—°*Locana.* p. 232.

TEXT

§ ३० । निर्वोढुमिष्टमपि यं यत्नादङ्गत्वेन प्रत्यवेक्षते । यथा—

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
गण्डच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवोचिषु भ्रूविलासान्
हन्तैकस्थं क्वचिदपि न ते भीरु ! सादृश्यमस्ति ।।

स एवमुपनिबध्यमानोऽलंकारो रसाभिव्यक्तिहेतुः कवेर्भवति । उक्तप्रकारातिक्रमे तु नियमेनैव रसभङ्गहेतुः सम्पद्यते । लक्ष्यं च तथाविधं महाकविप्रबन्धेष दृश्यते बहुशः । तत्तु सूक्तिसहस्रद्योतितात्मनां महात्मनां दोषोद्घोषणम् आत्मन एव दूषणं भवतीति न विभज्य दर्शितम् । किं तु रूपकादेरलंकारवर्गस्य येयं व्यञ्जकत्वे रसादिविषये लक्षणदिग् दर्शिता तामनुसरन् स्वयं चान्यत् लक्षणमुत्प्रेक्षमाणो यद्यलक्ष्यक्रमप्रतिभमनन्तरोक्तमेवं ध्वनेरात्मानमुपनिबध्नाति सुकविः समाहितचेतास्तदा तस्यात्मलाभो भवति महीयानिति ।।

EXPOSITION

§ 30. In this section Ānandavardhana explains the *Kārikā*-portion 'निर्व्यूढावपि....वेक्षणम्'—The *alaṃkāra*, even though carried out to its logical extreme, must be subordinate to the principal sentiment. In the verse 'श्यामास्वङ्गं—'(*Meghadūta*, 109), the figure of speech उत्प्रेक्षा has been effectively carried out to the very end by the poet and yet that does not run counter to the prevailing mood (i.e विप्रलम्भ-शृङ्गार). Compare *Locana* : '**निर्वोढुमिति** । निःशेषेण परिसमापयितुमित्यर्थः । **श्यामासु** सुगन्धि-प्रिय लतासु पाण्डिम्ना तनिम्ना कण्टकितत्वेन च योगात् । **शशिनि** इति पाण्डुरत्वात् । **उत्पश्यामि** यत्नेनोत्प्रेक्षे । जीवितसंधारणायेत्यर्थः । **हन्तेति** कष्टम् । एकस्थसादृश्याभावे हि दोलायमानोऽहं सर्वत्र स्थितो न कुत्रचित् एकस्य धृतिं लभे इति भावः । **भीरु** इति । यो हि कातरहृदयो भवति नासौ सर्वस्व-

मेकस्थं धारयतीत्यर्थः। अत्र हि उत्प्रेक्षायास्तदभावाध्यारोपरूपाया अनुप्राणकं सादृश्यं यथोपक्रान्तं तथा निर्वाहितमपि विप्रलम्भ-रस-पोषकमेव जातम् ॥—*Op. cit.*, p. 233.

स एवम्....दर्शितम्—If the principles formulated above be properly observed by a poet, the poetic figures would uniformly turn out to be important accessories towards the development of the sentiments in view. Otherwise, the *alaṁkāras* do only mar the charm of the aesthetic relish. There are numerous instances in the works of great poets, that can serve as illustrations of the breach of these poetic norms. But Ānandavardhana, out of intrinsic modesty and respect for genius, desists from citing the counter-examples (प्रत्युदाहरण). As he remarks: 'तत्तु सूक्ति....दूषणं भवति'.[1] Hemacandra, the great Jaina teacher, however, records in his *Kāvyānuśāsana* instances to illustrate the violation of these principles. The relevant extracts are given below from that treatise :—

"तत्र रसोपकारप्रकारानाह—

तत्परत्वे काले ग्रहत्यागत्योः नातिनिर्वाहेऽप्यङ्गत्वे रसोपकारिणः॥

अलंकारा इति वर्तते। तत्परत्वं रसोपकारकत्वेनालंकारस्य प्रवेशः, न बाधकत्वेन, नापि ताटस्थ्येन। यथा—'चलापाङ्गा'-मित्यादि।....बाधकत्वेन यथा—

'स्रस्तः स्रग्दामशोभां त्यजति विरचितामाकुलः केशपाशः
क्षीवाया नूपुरौ च द्विगुणतरमिमौ क्रन्दतः पादलग्नौ।
व्यस्तः कम्पानुबन्धादनवरतमुरो हन्ति हारोऽयमस्याः
क्रीडन्त्याः पीडयेव स्तनभरविनमन्मध्यभङ्गानपेक्षम् ॥'

1. Cp. न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक् ॥—*Kumārasambhava*, Canto V.

—अत्र पीडयेवेत्युत्प्रेक्षालंकारोऽङ्गी सन् तदनुग्राहकश्चार्थश्लेषः करुणोचितान् विभावानुभावान् संपादयन् बाधकत्वेन भातीति न प्रकृतरसोपकारी ॥ ताटस्थ्येन यथा—

'लीलावधूतपद्मा कथयन्ती पक्षपातमधिकं नः ।
मानसमुपैति केयं चित्रगता राजहंसीव ॥'

पुलहक-लिखित-सागरिका-प्रतिबिम्बदर्शनाभिजाताभिलाषस्य वत्सराजस्येयमुक्तिः तटस्थस्येव कविनोपरचितेति श्लेषानुगृहीतोपमालंकारप्राधान्येन प्रस्तुतो रसो गुणीकृतोऽपरिजिघटिषया ॥

अङ्गत्वेऽपि कालेऽवसरे ग्रहणं यथा—'उद्दामोत्कलिकाम्—' इति ।....न त्वेवं यथा—

'वाताहारतया जगद्विषधरैराश्वास्य निःशेषितं
ते ग्रस्ताः पुनरभ्रतोयकणिका तीव्रव्रतैर्बर्हिभिः ।
तेऽपि क्रूरचमूरुचर्मवसनैर्नीताः क्षयं लुब्धकै-
र्दम्भस्य स्फुरितं विदन्नपि जनो जाल्मो गुणानीहते ॥'

अत्र वाताहारत्वं पश्चाद् वाच्यमपि आदौ उक्तम् इत्यतिशयोक्तिरनवसरे गृहीता । तथाहि प्रथमत एव प्रथमपादे हेतूत्प्रेक्षया यदतिशयोक्तेरुपादानं, न तत् प्रकृतस्य दम्भप्रकर्षप्रभावतिरस्कृतगुणगणानुशोचनमयस्य निर्वेदस्य अङ्गतामेति । नहि वाताहारादधिको दम्भस्तोयकणव्रतं, नापि ततोऽधिकं दम्भनत्वं मृगाजिनवसनमिति ॥ गृहीतस्यावसरे त्यागो यथा— 'रक्तस्त्व'-मिति ॥ न त्वेवं यथा—

आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं
भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी ।
उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग् वरो लभ्यते
स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः ॥

अत्र 'न रावण'-इत्यस्मादेव त्यागो युक्तः । तथाहि रावण इत्येतज् जगदाक्रन्दकारित्वाद्यर्थान्तरं प्रतिपादयज्जनकस्य धर्मवीरं प्रत्यनुभावतां

प्रतिपाद्यते । ऐश्वर्यं पाण्डित्यं परमेशभक्तिर्देशविशेषोऽभिजन-इत्येतत् सर्वं लोकमपबाधमानस्य अधर्म्मपरस्य नार्थक्रियाकारकमिति तावतोऽर्थस्य तिरस्कारकत्वेनैव रावणचेष्टितं निर्वाहणीयम् । यत्तु अन्यदुपात्तं 'क्व नु पुन'-रिति तद्यदि ससंदेहत्वेन योज्यतेऽथाक्षेपत्वेन अथापि 'नेदृग्वरो लभ्यते' इत्यर्थान्यरन्यासत्वेन तथापि प्रकृतस्य धर्मवीरस्य न कथंचित् निर्वाहः ।।

नात्यन्तं निर्वाहो यथा –

'कोपात् कोमले'ति ।....न त्वेवं यथा--

'सञ्चितपक्ष्मकपाटं नयनद्वारं स्वरूपताडनेन ।
उद्घाट्य सा प्रविष्टा देहगृहं सा-हृदयचौरी ।।'

—अत्र नयनद्वारमित्येतावदेव सुन्दरं शृङ्गारानुगुणं, नत्वन्यद्रूपणम् ।।

निर्वाहेऽप्यङ्गत्वं यथा—'श्यामास्वङ्गमिति' ।....नत्वेवं यथा—

'न्यञ्चत् कुञ्चितमुत्सुकं हसितवत् साकूतमाकेकरं
व्यावृत्तं प्रसरत् प्रसादि मुकुलं सप्रम कम्प्रं स्थिरम् ।
उद्भ्रु भ्रान्तमपाङ्गवृत्ति विकचं मज्जत्तरङ्गोत्तरं
चक्षुः साश्रु च वर्त्तते रसवशादेकैकमन्यक्रियम् ।।'

अत्र रावणस्य दृग्विंशतौ वैचित्र्येण स्वभावोक्तिर्निर्वाहिताऽपि रसस्य अङ्गत्वेन न योजितेति ।।—*Op. cit.*, pp. 17-22.

TEXT

§ ३१ । क्रमेण प्रतिभात्यात्मा योऽस्यानुस्वान-संनिभः ।
शब्दार्थशक्तिमूलत्वात् सोऽपि द्वेधा व्यवस्थितः ।।१०।।

अस्य विवक्षितान्यपरवाच्यस्य ध्वनेः संलक्ष्यक्रमव्यङ्ग्यत्वादनुरणनप्रख्यो य आत्मा सोऽपि शब्दशक्तिमूलोऽर्थशक्तिमूलश्चेति द्विप्रकारः ।।

EXPOSITION

§31. Having thus discussed the nature of असंलक्ष्य-क्रम ध्वनि in all its details, Ānandavardhana proposes to deal with the other variety of विवक्षितान्यपरवाच्यध्वनि—viz. संलक्ष्यक्रमध्वनि, also called अनुस्वान-संनिभ-ध्वनि. The name is significant in so far as the sequence between the apprehension of the expressed and the suggested senses is distinctly noticeable, just as the sequence between the first sound and the vibrations thereof is noticeable, when a bell is rung. This संलक्ष्यक्रम-ध्वनि again has two main divisions, according as it is based on *formal suggestiveness* (शब्दशक्तिमूल°) or *material suggestiveness* (अर्थशक्तिमूल°). Compare °*Locana* :—

"एवं विवक्षितान्यपरवाच्यध्वनेः प्रथमं भेदमलक्ष्यक्रमं विचार्य द्वितीयं भेदं विभक्तुमाह—क्रमेणेत्यादि। प्रथमपादोऽनुवादभागो हेतुत्वेनोपात्तः। घण्टाया अनुरणनमभिघातजशब्दापेक्षया क्रमेणैव भाति। सोऽपीति। न केवलं मूलतो ध्वनिर्द्विविधः। नापि केवलं विवक्षितान्यपरवाच्यो द्विविधः। अयमपि द्विविध एवेत्यपिशब्दार्थः॥"
Op. cit., pp. 234-35.

TEXT

§ ३२। ननु शब्दशक्त्या यत्रार्थान्तरं प्रकाशते स यदि ध्वनेः प्रकार उच्यते, तदिदानीं श्लेषस्य विषय एवापहृतः स्यात्। नापहृत इत्याह—

आक्षिप्त एवालंकारः शब्दशक्त्या प्रकाशते।
यस्मिन्ननुक्तः शब्देन शब्दशक्त्युद्भवो हि सः॥२१॥

यस्मादलंकारो न वस्तुमात्रं यस्मिन् काव्ये शब्दशक्त्या प्रकाशते, स शब्दशक्त्युद्भवो ध्वनिरित्यस्माकं विवक्षितम्। वस्तुद्वये च शब्दशक्त्या प्रकाशमाने श्लेषः। यथा—

येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो
यश्चोद्वृत्तभुजङ्गहारवलयो गङ्गां च योऽधारयत् ।
यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः
पायात् स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः ॥

EXPOSITION

§ 32. When a homonymous word (अनेकार्थशब्द) is used to denote more than one sense—one of which is प्रकृत (i.e. contextual) and the other अप्रकृत, the former alone is conveyed through the primary function or *Denotation* (अभिधाव्यापार), while the latter is comprehended through suggestion (व्यञ्जना). The अप्रकृत sense cannot be conveyed through the self-same function of *denotation*, because the *context* (प्रकरण) is one of the restrictive factors enumerated by Bhartṛhari, that delimit the scope of *denotation* to the field of *the contextual sense* alone, where the conventional meanings (शब्दार्थ) are many and consequently *indeterminable* (अनवच्छेद). In such cases the word-element is the most important factor, since the substitution of any other synonymous word for that particular word in question will fail to give rise to the cognition of the अप्रकृत sense. Now, it might be asked : 'What is the difference between श्लेष and शब्द-शक्तिमूलध्वनि ? In both the cases we have homonymous words (अनेकार्थशब्द), and the apprehension of more than one sense therefrom. So what is the reason for differentiating them as two distinct categories ? What more, if in such cases we posit शब्दशक्तिमूलध्वनि instead of श्लेष, there would be left no exclusive scope for the latter. As Ānandavardhana puts it : 'ननु....अनाहृतः स्यात्—'. The Dhvanikāra has answered this contention in the present *kārikā* : 'आक्षिप्तः....हि सः'—True, that in शब्दशक्तिमूलध्वनि, as in श्लेष, we have the apprehen-

sion of more than one sense. But, while in the former we have, in addition, the apprehension of an unexpressed *poetic figure* (अलंकार) *quâ* some definite relation like सादृश्य etc. subsisting between the two senses (*viz.* the primary and the suggested), in the latter no such relation is cognised. And this constitutes the essential difference between the two categories (viz. श्लेष and शब्दशक्तिमूलध्वनि). In श्लेष two or more senses are realised—*minus* that *unexpressed* relation that constitutes the link between the two discrete meanings. As Ānandavardhana observes : यस्मादलंकारो....श्लेषः—As an illustration of श्लेष, when two unrelated facts alone are comprehended, he cites the verse : 'येन ध्वस्तमनोभवेन—'. This is an adoration to Śiva and Viṣṇu simultaneously. Compare °*Locana* : येन ध्वस्तं बालक्रीड़ायामात्मनः शकटम् । अभवेन अजेन सता । वलिनो दानवान् यो जयति तादृग् येन कायो वपुः पुराऽमृत-हरणकाले स्त्रीत्वं प्रापितः । यश्चोद्वृत्तं समदं कालियाख्यं भुजङ्गं हतवान् । रवे शब्दे लयो यस्य । 'अकारो विष्णुः'—इत्युक्तेः । यश्चागं गोवर्धनपर्वतं गां च भूमिं पातालगताम् अधारयत । यस्य च नाम स्तुत्यमृषय आहुः । किं तत् ? शशिनं मथ्नाति इति क्विप्—राहुः, तस्य शिरोहरो मूर्धापहारक इति । स त्वां माधवो विष्णुः सर्वदः पायात् । कीदृक् ? अन्धकनाम्नां जनानां येन क्षयो निवासो द्वारकायां कृतः । यदि वा मौषले इषीकाभिस्तेषां क्षयो विनाशो येन कृतः ॥ द्वितीयोऽर्थः—येन ध्वस्त-कामेन सता बलिजितो विष्णोः सम्बन्धी कायः पुरा त्रिपुर-निर्दहनावसरेऽस्त्रीकृतः, शरत्वं नीतः । उद्वृत्ता भुजङ्गा एव हारा वलयाश्च यस्य, मन्दाकिनीं च योऽधारयत् । यस्य च ऋषयः शशिमत् चन्द्रयुक्तं शिर आहुः । हर इति च यस्य नाम स्तुत्यमाहुः । स भगवान् स्वयमेव अन्धकासुरस्य विनाशकारी त्वां सर्वदा सर्वकालम् उमाया धवो वल्लभः पायादिति । अत्र वस्तुमात्रं द्वितीयं प्रतीतं नालंकार इति श्लेषस्यैव विषयः ॥—*Op. cit.*,

pp. 235-36.

This view of Ānandavardhana—*viz.* that in शब्दशक्तिमूल-ध्वनि there must *necessarily* be an apprehension of the *unexpressed relation* to link the two apparently discrete ideas, seems to be contrary to the opinion of later authors like Mammaṭa etc., who state that mere वस्तु (fact) might also be suggested in a case of शब्दशक्तिमूलध्वनि. As Mammaṭa observes :—

अलंकारोऽथ वस्त्वेव शब्दाद् यत्रावभासते ।
प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा ॥

—*Kāvyaprakāśa*, IV.38.

As an example of शब्दशक्तिमूलवस्तुध्वनि, Mammaṭa cites the verse :—

'पन्थिअ ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे ।
उण्णअपओहरं पेक्खिउण जइ वससि ता वससु ॥'—and notes :
"अत्र यद्युपभोगक्षमोऽसि तदाऽऽस्स्वेति व्यज्यते ॥'—Rūyyaka, in his commentary called काव्यप्रकाशसंकेत on Mammaṭa's work, criticises Mammaṭa for regarding वस्तुध्वनि as a variety of शब्दशक्तिमूलध्वनि, though he himself justifies शब्दशक्तिमुलवस्तुध्वनि in his *Alaṃkāra-Sarvasva.* Compare : "....यत्र तु प्रस्तुताभिधेयपरत्वेऽपि वाक्यस्य श्लिष्टपदमहिम्ना वक्ष्यमाणार्थनिष्ठमुपक्षेपापराभिधानं सूचकत्वं तत्र किं श्लेष उत शब्दशक्तिमूलध्वनिरिति विचार्यते । तत्र न तावत् श्लेषः । अर्थद्वयस्य अन्वितत्वेन अभिधेयतया वक्तुमनिष्टेः । नापि ध्वनिः । उपक्षेप्यस्य अर्थस्य असंबद्धत्वाभावात् तेन सह उपमानोपमेयत्वस्य अविवक्षणात् । न चान्या गतिरस्ति । तदत्र किं कर्त्तव्यम् । उच्यते—श्लेषस्य उक्तनयेन अप्रवृत्तेर्ध्वनेरेवायं विषय इति निश्चयः । तथाहि—शब्दशक्तिमूले ध्वनौ अर्थान्तरस्य **असंबद्धत्वात् सम्बन्धार्थमौपम्यं**

कल्प्यते । स च संबन्धः प्रकारान्तरेण औपम्यपरिहारेण यद्यप्युपपादयितुं शक्यः स्यात्, तत् कोऽयमभिनिवेशस्तत्र उपमाध्वनौ । वस्तुध्वनिरपि सम्बन्धान्तरेण तत्र समीचीनः स्यात् । अत एव—

'अलंकारोऽथ वस्त्वेव शब्दाद् यत्रावभासते।
प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा ॥'—

इति न्यायभवनवन्धेन (?) द्विधा शब्दशक्त्युद्भव उक्तः । एवं प्रकृतेऽपि यत्र सूचनाव्यापारोऽस्ति तत्र शब्दशक्तिमूलो वस्तुध्वनिर्बोद्धव्यः। यथा—

'सद्यः कौशिकदिग्विजृम्भणवशादाकाशराष्ट्रं रसात्
त्यक्त्वा धूसरकान्तिवल्कलधरो राजास्तशैलं ययौ।
तत्कान्ताऽप्यथ सान्त्वयन्त्यलिकुलध्वानैः समुल्लासिभिः
क्रन्दन्तं कुमुदाकरं सुतमिव क्षिप्रं प्रतस्थे निशा ॥' इति।

हरिश्चन्द्रचरितेऽत्र प्रभातवर्णनानुगुण्येन राजशब्दाभिधेयेऽस्तमुपेयुषि चन्द्रे रोहिताश्वाख्यतनयसहितया उशीनर्या वध्वा युक्तस्य हरिश्चन्द्रस्य राज्ञो विश्वामित्रसंपादितोपद्रववशात् प्रातः स्वराष्ट्रं त्यक्त्वा वाराणसीं प्रति गमनं सूचितं स्यात् । तथा च कौशिकशब्दः प्रकृते इन्द्रोलूकयोर्वर्त्तते । सूचनीयार्थविषयत्वेन तु विश्वामित्रवृत्तिः । वल्कलसुताभ्यां त्वौपम्यं सूचनीयार्थनैरपेक्ष्येण सादृश्यसंभवमात्रेण संभवनीयम् । अतश्च प्रकृतेन सूचनीयस्य संबन्धात् शब्दशक्तिमूलो वस्तुध्वनिरयम् ॥[1] —*Op. cit.*, pp. 101-103. Jayaratha remarks that this incongruen-

---

1. It is really an instance of शब्दार्थोभयशक्तिमूलध्वनि as Jayaratha observes in his commentary : "अत्र च यद्यपि सुतादिरूपार्थशक्तिरप्यस्ति इति वस्तुध्वनेरुभयशक्तिमूलत्वमेव तथापि शब्दशक्तिरत्र स्फुटा स्थितेति तन्मूलत्वमेव ग्रन्थकृताऽस्योक्तम् ॥—*Ibid.* We might justify Rūyyaka by referring to the maxim : 'यो हि उभयोः स्थाने भवति लभतेऽसावन्यतरव्यपदेशम्' as he has himself done in a similar context in defending the *Dhvanikāra*.

cy between the two views of Rūyyaka as stated in two different places is only apparent and can be easily reconciled. For the criticism in his *Kāvyayrakāśa-Saṁketa* should be construed as having reference to the particular illustration and not to वस्तुध्वनि as such. As he notes :—

"....यत्तु काव्यप्रकाशसंकेते ग्रन्थकृता वस्तुध्वनेः शब्दशक्तिमूलत्वं चिन्त्यमुक्तम्, तदुदाहरणाभिप्रायेणैवोन्नेयम्। तत्र हि 'पन्थिअ ण इत्थ सत्थरं—' इत्याद्युदाहरणम् उभयशक्तिमूलं शब्दशक्तिमूलस्य वस्तुध्वनेः श्रीमम्मटेनोपात्तम् ॥'"[1]—*Vimarśinī. loc. cit.* Jagannātha, too, in his *Rasagaṅgādhara* upholds this twofold classification of शब्दशक्तिमूलध्वनि. The following extract dealing with वस्तु-ध्वनि should be carefully noted :—

"शब्दशक्तिमूलवस्तुध्वनिर्यथा—

'राज्ञो मत्प्रतिकूलान्मे महद् भयमुपस्थितम्।
बाले वारय पान्थस्य वासदानविधानतः ॥'

अत्रोपभोगं देहीति वस्तु राजशब्दशक्तिमूलानुरणनविषयः। राजपदात् चन्द्रोपस्थितावेव चन्द्रजनितभयवारणकारणत्वेन उपभोगस्याभिव्यक्तेः। न चात्र नृप-चन्द्रयोरुपमानोपमेयभावः, भेदापोहरूपं रूपकं वा तथाऽस्तु इति वाच्यम्। इह नृपरूपस्यार्थस्य चन्द्ररूपार्थगोपनमात्रार्थमुपात्तत्वेन युगपदुल्लसितोपमानोपमेयकयोरुपमारूपकयोस्तात्पर्यविषयताया अयोगात्। न चासंसृष्टार्थद्वयबोधने वाक्यभेद- इति वाच्यम्। तुल्यकक्षतया द्वयोरसंसृष्टयोरर्थयोः प्रतिपिपादयिषितत्व एव तस्याभ्युपगमात्। इह तु आच्छादकप्रतीतिसमये आच्छाद्या-

---

1. But this defence does not appear very satisfactory in view of the fact that Rūyyaka in his *Kāvyaprakāśasaṃketa* categorically denies शब्दशक्तिमूलवस्तुध्वनि.

प्रतीतिः, आच्छाद्यप्रतीतौ च आच्छादक-न्यग्भाव एवेति नास्ति तुल्यकक्षता ॥—*Op. cit.* p. 162.[1] Thus, on the showing of Rūyyaka, Viśvanātha and Jagannātha alike, it becomes evident that when out of two senses apprehended through *homonymous words* one is intended to be merely covertly hinted at (आच्छाद्य) instead of being plainly stated, and the other serves as a cloak (आच्छादक) to hide the former in the first instance, it is a case of वस्तुध्वनि pure and simple, the former being conveyed through *suggestion* (व्यङ्ग्य) and the latter through *Denotation* (अभिधेय).

Appayya Dīkṣita's view regarding शब्दशक्तिमूलध्वनि is somewhat different, however. According to him, when from a particular *homonym* (अनेकार्थ शब्द), प्रकृत and अप्रकृत senses are cognised, both of them are *equally* conveyed by Denotation (अभिधाव्यापार), the restrictive force of factors like संयोग, विप्रयोग etc. as enumerated by Bhartṛhari, being logically unjustifiable. The अप्रकृत sense is not *suggested*, as the followers of Mammaṭa would have it. But the apprehension of the relation (सम्बन्ध) that would link these two apparently isolated senses is caused by the function of suggestion (व्यञ्जनाव्यापार) and thus we have शब्दशक्तिमूलालंकारध्वनि in such cases. As he states : ननु च यत्र अनेकत्र प्रकरणाद्यविशिष्टम्, तत्र भवतु अनेकत्राप्यभिधाव्यापारः । यत्र

1 Compare also :

सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः ।
निपतन्ति धार्त्तराष्ट्राः कालवशान्मेदिनीपृष्ठे ॥'—(वेणी० १।६)

—अत्र शरद्वर्णनया प्रकरणेन धार्त्तराष्ट्रादिशब्दानां हंसाद्यर्थाभिधाने नियमनात् दुर्योधनादिरूपोऽर्थः शब्दशक्तिमूलो वस्तुध्वनिः । इह च प्रकृतप्रबन्धाभिधेयस्य द्वितीयार्थस्य मुख्यतयैव विवक्षितत्वात् उपमानोपमेयभावो न विवक्षित इति नोपमाध्वनिर्न च श्लेष इति सर्वमवदातम् ॥—*Sāhitya-Darpaṇa*, Chap. X.

प्रकरणस्य क्वचिदर्थेऽवस्थितत्वेऽपि अप्राकरणिकं शक्यान्तरं प्रतीयते, तत्र का गतिः ? यथा—

'असावुदयमारूढः कान्तिमान् रक्तमण्डलः ।
राजा हरति लोकस्य हृदयं मृदुभिः करैः ॥'—इति चन्द्रोदयवर्णनप्रस्तावे । अत्र हि अप्राकरणिको भूपतिरभ्युदयादिविशिष्टः प्रतीयते । अत्र प्राञ्चः—'तत्र शब्दशक्तिमूलो व्यञ्जनाव्यापार एव शरणम्, गत्यन्तराभावात् । न हि तस्य तत्राभिधा संभवति, तस्याः प्रकरणेन नियन्त्रितत्वात् । नापि लक्षणा, मुख्यार्थबाधाद्यभावात् । न चाभिधाया इव व्यञ्जनस्यापि प्रकरणेन नियन्त्रणे, तेनापि न तन्निर्वाह इति वाच्यम्, तस्य धर्मिग्राहकमानेन तदनियम्यतयैव सिद्धेः ॥....वयं तु ब्रूमः—'असावुदयमारूढः—' इत्यादौ प्राकरणिकेऽर्थे प्राकरणिकवत् अप्राकरणिकेऽपि 'राज-कर-मण्डलादिशब्दानां परस्परान्वय-योग्य-नृपति-तद्ग्राह्यधनदेशादिवाचकानां समभिव्याहार-रूपमभिधानियामकमस्तीत्यर्थद्वयस्यापि प्राकरणिकत्वे इव प्राकरणिकाप्रकारणिकरूपत्वेऽपि उभयत्र अभिधैव व्यापारः, यथोक्तसमभिव्याहारस्यापि शब्दान्तरसंनिधिरूपत्वेन प्रकरणवदभिधानियामकत्वात् ।.. तथाहि—प्रकरणादिकमुल्लङ्घ्य व्यञ्जनाव्यापारेणापि अर्थान्तरप्रत्ययो न सर्वत्र वक्तुं शक्यते, प्रकरणादीनामभिधानियामकत्वकल्पनस्यैव व्यर्थत्वापत्तेः ॥ तद्धि नादृष्टार्थम्, 'किं तु 'सैन्धवमानय' इत्यादौ एकार्थमात्रपर-नानार्थशब्दस्थले अर्थविशेषस्मृतिव्यवस्थार्थं तत् । यदि तत्रापि व्यञ्जनव्यापारेणार्थान्तरप्रत्ययः स्यात्, तदा कथमेषा सिध्येत् । न हि अभिमतानभिमतक्षेत्रसाधारणस्य जलाशयस्य अभिमतक्षेत्रगामिनीमेकां कुल्यां विधाय अनभिमतक्षेत्रगामिनः कुल्यान्तरस्यापि कल्पने जलस्याभिमतक्षेत्रैकगामित्व-व्यवस्था कृता भवति । तथाच यत्र कवयितुश्चमत्काराय अप्राकरणिकेऽप्यर्थे तात्पर्यम्, यत्र वाऽश्लील-दोषः, तत्रैव व्यञ्जनाव्यापारोन्मेषः, न सर्वत्र इति तद्व्यवस्थासिद्धये तत्र तत्र नियामकानि अस्मदुक्तानि अन्यादृशानि वा अवश्यमादत्त-

व्यानि, तेषां च अभिधानियामकत्वमेव वक्तुं शक्यमिति व्यर्थस्तत्र व्यक्तिकल्पनापरिश्रमः, दुर्वारश्च तत्र व्यक्तिवादिमतेऽपि अभिधा-व्यापारः ।....तस्मात् प्रस्तुताप्रस्तुतोभयपरेऽपि प्रस्तुताप्रस्तुतोभय-वाच्यार्थेऽभिधैव वृत्तिः । तदुपस्थितेषु च पदार्थेषु आकाङ्क्षादि-सहकारिवशाद् उभयविधवाक्यार्थप्रत्ययः—इत्यप्रस्तुतविषये न पदार्थ-प्रतीतये नापि वाक्यार्थप्रतीतये व्यक्तिरुपगन्तव्या ।। यत्तु प्राचाम-प्रस्तुते शक्तिमूलव्यञ्जनवृत्त्यभिधानम्, तदप्रस्तुतार्थप्रतीतिमूलके यथा 'उदयमारूढः—' इत्यादिविशेषणविशिष्टः पृथिवीपतिः स्वल्पै-र्ग्राह्यैर्धनैः लोकस्य हृदयं रञ्जयति, एवं तथाभूतश्चन्द्रमाः मृदुलैः किरणैरित्यादिरूपेण प्रतीयमाने उपमाद्यर्थालंकारे तदवश्यम्भाव-दृढीकरणाभिप्रायेण । न तु तत्रापि वस्तुतो व्यञ्जनव्यापारा-स्तित्वाभिप्रायेण ।।—*Vṛttivārttika*, pp. 11-16.

Now, it might be contended against this interpretation of शब्दशक्तिमूलध्वनि, that there would be no scope for वस्तुध्वनि based on शब्दशक्ति and the traditional two-fold division would fall down. For, in the above view the अप्र-स्तुत fact would also be conveyed through *denotation* (अभिधा), and there being no *implied relation* to be communicated in this case, as in the former, the aid of suggestion would not be required here at all. Appayya Dīkṣita's arguments are ingenious though somewhat strained : "नन्वेवम्—शब्दशक्ति-मूलस्यालंकारध्वनेः 'आच्छादितायतदिगम्बरम्—' इत्याद्युदा-हरणसत्त्वेऽपि तन्मूलो वस्तुध्वनिर्लुप्येत, निरलंकारेऽप्रस्तुतार्थ एव वस्तुध्वनेरुदाहरणीयत्वात् तत्र च त्वयाऽभिधाङ्गीकारात्—इति चेत्, न । यत्र अप्रस्तुतेऽर्थेऽभिधयैव प्रतिपाद्यमाने तन्मूलमनभिधेयं वस्तु प्रतीयते, तत्र तदङ्गीकारात् इति । यथा—

'शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र ! यस्मै त्वम् ।' —इति । अत्र हि 'अशनि'-शब्देन प्रस्तुताद् वज्रादन्यस्मिन् समभि-

व्याहृत-शनिविरुद्धरूपेऽप्यर्थं अभिधयैव प्रतिपाद्यमाने 'विरुद्धावपि त्वदनुवर्त्तनार्थमेक कार्यं कुरुतः' इत्युपश्लोक्यस्य प्रभावातिशयः प्रतीयते। इत्थमेव प्राचीनैरपि शब्दशक्तिमूलो वस्तुध्वनिरुदाहृतः ॥"
—*Op cit*., pp. 16-17.

Jagannātha's distinction between श्लेष, समासोक्ति on the one hand and शब्दशक्तिमूलध्वनि on the other is more logical and precise :—

'श्रुत्यैकयाऽनेकार्थप्रतिपादनं श्लेषः॥ तच्च द्वेधा। अनेकधर्मपुरस्कारेण, एकधर्मपुरस्कारेण च। आद्यं द्वेधा। अनेकशब्दप्रतिभानद्वारा, एकशब्दप्रतिभानद्वारा चेति त्रिविधः श्लेषः। तत्राद्यः सभङ्गो द्वितीयो ह्यभङ्ग इति वदन्ति। तृतीयस्तु शुद्धः। एवं त्रिविधोऽप्ययं प्रकृतमात्राप्रकृतमात्र प्रकृताप्रकृतोभयाश्रितत्वेन पुनस्त्रिविधः। अत्राद्ये भेदे द्वितीये च विशेष्यस्य श्लिष्टतायां कामचारः। तृतीयभेदे तु विशेषणवाचकस्यैव श्लिष्टत्वं न विशेष्यवाचकस्य। तथात्वे तु शब्दशक्तिमूलध्वनेरुच्छेद एव स्यात्। विशेषणमात्रश्लिष्टतायामपि प्रकृताप्रकृतधर्मिणोरुपादान एव श्लेषः। प्रकृतधर्मिमात्रस्य उपादाने तु समासोक्तेरेव विषयः। ..यत्र तु प्रकृताप्रकृतोभयविशेष्ययोरपि श्लिष्टपदोपात्तत्वं स तु ध्वनेर्विषय इत्युक्तम्। स च यथा—

'अविरल-विगलद्दानोदक-धारासारसिक्तधरणितलः।
धनदाग्रमहितमूर्त्तिर्जयतितरां सार्वभौमोऽयम्॥'

—अत्र राजनि प्रस्तुते उदग्दिग्गजोऽप्रस्तुतोऽपि व्यञ्जनमर्यादया प्रतीयते। तत्र अप्रस्तुताभिधानं मा प्रसाङ्क्षीत् इति प्रस्तुताप्रस्तुतयोरुपमानोपमेयभावे तात्पर्यं कल्प्यते। इमं च शब्दशक्तिमूलानुरणनरूपं ध्वनिमाहुः॥"—*Rasagaṅgādhara*, pp. 522-23 & 529.

TEXT

§ ३१. ननु अलंकारान्तरप्रतिभायामपि श्लेषव्यपदेशो भवतीति दर्शितं भट्टोद्भटेन. तत् पुनरपि शब्दशक्तिमूलो ध्वनि-

निरवकाश इत्याशङ्क्येदमुक्तम्—'आक्षिप्त'-इति। तदयमर्थः—यत्र शब्दशक्त्या साक्षादलंकारान्तरं वाच्यं सत् प्रतिभासते, स सर्वः श्लेषविषयः। यत्र तु शब्दशक्त्या सामर्थ्याक्षिप्तं वाच्यव्यतिरिक्तं व्यङ्ग्यमेवालंकारान्तरं प्रकाशते, स ध्वनेर्विषयः। शब्दशक्त्या साक्षादलंकारान्तरप्रतिभा यथा—

तस्या विनापि हारेण निसर्गादेव हारिणौ।
जनयामासतुः कस्य विस्मयं न पयोधरौ॥

अत्र शृङ्गारव्यभिचारी विस्मयाख्यो भावः साक्षाद्विरोधालंकारश्च प्रतिभासत इति विरोधच्छायानुग्राहिणः श्लेषस्यायं विषयः, न त्वनुस्वानोपमस्य ध्वनेः। अलक्ष्यक्रमव्यङ्ग्यस्य तु ध्वनेर्वाच्येन श्लेषेण विरोधेन वा व्यञ्जितस्य विषय एव। यथा ममैव—

श्लाघ्याशेषतनुं सुदर्शन-करः सर्वाङ्गलीलाजित-
त्रैलोक्यां चरणारविन्दललितेनाक्रान्तलोको हरिः।
बिभ्राणां मुखमिन्दुरूपमखिलं चन्द्रात्मचक्षुर्दधत्
स्थाने यां स्वतनोरपश्यदधिकां सा रुक्मिणी वोऽवतात्॥

अत्र वाच्यतयैव व्यतिरेकच्छायानुग्राही श्लेषः प्रतीयते। यथा च—

भ्रमिमरतिमलसहृदयतां प्रलयं मूर्च्छां तमः शरीरसादम्।
मरणं च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम्॥

यथा वा—

चमहिअमाणसकञ्चणपङ्कजणिम्महिअपरिमला जस्स।
अखण्डिअ-दाण-पसारा बाहुप्पलिहा च्चिअ गइन्दा॥

अत्र रूपकच्छायानुग्राही श्लेषो वाच्यतयैवावभासते॥

EXPOSITION

§ 33. In this section Ānandavardhana brings out the significance of the qualifying adjunct 'आक्षिप्तः' (*implied*.

suggested). 'आक्षिप्त-शब्दस्य कारिकागतस्य व्यवच्छेद्यं दर्शयितुं चोद्येनोपक्रमते—नन्वलंकारेत्यादिना ।'—°*Locana.*

ननु....ध्वनेर्विषय इति—The opponents might raise an objection to the above distinction between श्लेष and शब्दशक्तिमूलध्वनि as being unsatisfactory and illogical. For, Udbhaṭa has elaborately shown in his *Kāvyālaṁkāra-Sāra-Saṃgraha* that in the case of श्लेष too there is the comprehension of other poetic figures like उपमा, विरोध, रूपक etc., though in such cases श्लेष *alone* is the principal figure of speech, the apprehension of the latter being of a fleeting sort and thus momentary in existence. Consequently श्लेष is the *real* figure (वास्तव) and others only apparent (प्रतिभासिक). As he states :—

'एकप्रयत्नोच्चार्याणां तच्छायां चैव बिभ्रताम् ।
स्वरितादिगुणैर्भिन्नैर्बन्धः श्लिष्टमिहोच्यते ॥
अलंकारान्तरगतां प्रतिभां जनयत् पदैः ।
द्विविधैरर्थशब्दोक्तिविशिष्टं तत् प्रतीयताम् ॥'[1]

—*Op. cit.*, IV. 9-10.

---

1. The following exposition of Udbhaṭa's views on श्लेष and its relation to other figures in the event of their co-existence is very lucid :—

"अत्र विचार्यते—अयं चालंकारः (viz. श्लेषः) प्रायेणालंकारान्तरस्य विषयमभिनिविशते । तत्र किमस्य बाधकत्वम्, आहोस्वित् संकीर्णत्वम्, उताहो बाध्यत्वम् इति । अत्राहुरुद्भटाचार्याः—'येन नाप्राप्ते य आरभ्यते स तस्य बाधकः'—इति न्यायेन अलंकारान्तरविषय एवायमारभ्यमाणोऽलंकारान्तरं बाधते । न चास्य विविक्तः कश्चिदस्ति विषयो यत्र सावकाशो नान्यं बाधेत । तथाहि अप्रकृतमात्रयोः प्रकृतमात्रयोर्वा तावत् तुल्ययोगितैव जागर्त्ति । प्रकृताप्रकृतयोस्तु दीपकम् । तदनुमोदिताः उपमादयश्च । न च—'देव ! त्वमेव पातालमाशानां त्वं निबन्धनम् । त्वं चामरमरुद्भूमिरेको लोकत्रयात्मकः ॥' —इत्यादि-काव्यप्रकाशोक्तो विविक्तो विषय इति वाच्यम् । रूपकस्यैवात्र

Thus, there is no real difference between श्लेष and शब्दशक्ति-मूलध्वनि, and the latter can be easily comprehended under the former, and as such need **not** be regarded as a separate category **at all.** The word 'आक्षिप्तः' has been used in the *kārikā* as a **guard** against such a possible contention. Though in Udbhaṭa's view there is the apprehension of other poetic figures in the cases of श्लेष, still that other figure is *expressed in words* and not suggested. But in the case of शब्दशक्तिमूलध्वनि the cognition of the poetic figure (in the nature of a distinct relation between the प्रस्तुत and अप्रस्तुत ideas) is generated through the power of *suggestion* and not of *denotation.* And this makes all the difference between the two categories. Thus the word 'आक्षिप्तः' as qualifying 'अलंकारः' in the above *kārikā* is significant. Ānandavardhana cites some instances of श्लेष where other अलंकार's are *explicitly stated.* These are certainly not cases of शब्दशक्तिमूलध्वनि, where the poetic figure *must be suggested.*

'तया....पयोधरौ'—It is an instance of श्लेष and विरोध where the latter is *expressed* in so many words.

अत्र....ध्वनेः—Just as 'Wonder' (विस्मय), the व्यभिचारि-भाव pertaining to शृङ्गार, is *expressed* by the term 'विस्मय' itself, so too the particle अपि *denotes* विरोध (*contradiction*) instead of suggesting it. As °*Locana* puts it—

स्फुटत्वात् ।....कथं तर्हि 'नदीनां संपदं बिभ्रद्राजाऽयं सागरो यथा'—इत्यादौ उपमायाः प्रत्ययः ? कथं वा तत्रैव 'यथा'-शब्दस्थाने 'किमु'-शब्ददाने उत्प्रेक्षायाः ? अपर इति कृते च रूपकस्येति चेत्, न । अत्र हि उपमादीनां प्रतिभानमात्रं न तु वास्तवी स्थितिः । नहि श्वैत्येन शुक्तौ रजतत्वं प्रतीयमान-मपि वस्तुतोऽस्ति । तस्मादुपमादिप्रतिभोत्पत्तिहेतुः श्लेष एव स्त्र विषये सर्वत्रालंकारः" इति ॥—*Rasagaṅgādhara*, pp. 525-26. Later theorists have however criticised this position of Udbhaṭa. *See Kāvyaprakāśa*, IX ; *Sāhityadarpaṇa*, X ; *Rasagagāndhara, loc. cit.*

"अपि-शब्दोऽयं विरोधमाचक्षाणोऽर्थद्वयेऽपि अभिधाशक्तिं नियच्छति । हरतो हृदयमवश्यमिति हारिणौ। हारौ विद्येते ययोस्तौ हारिणाविति। अत एव विस्मयशब्दोऽस्यैवार्थस्योपोद्बलकः। अपिशब्दाभावे तु न तत एव अर्थद्वयस्याभिधा स्यात्, स्वसौन्दर्यादेव स्तनयोर्विस्मयहेतुत्वोपपत्तेः। विस्मयाख्यो भाव इति दृष्टान्ताभिप्रायेण उपात्तम्। यथा विस्मयः शब्देन प्रतिभाति 'विस्मय' इत्यनेन शब्देन, तथा विरोधोऽपि प्रतिभाति अपीत्यनेन शब्देन ॥—*Op. cit.*, pp. 236-37.

'अलक्ष्यक्रम....विषय एव'—But though the verse 'तस्या विनापि—' cannot be regarded as an instance of शब्दशक्तिमूलध्वनि of the संलक्ष्यक्रम category, yet it can be properly regarded as an illustration of असंलक्ष्यक्रमध्वनि, since the *emotion of love* (शृङ्गार) is predominant in it. As °*Locana* remarks : 'तत् किं सर्वथैवात्र ध्वनिर्नास्ति-इत्याशङ्क्याह-**अलक्ष्येति**। **विरोधेन वेति**— वाग्रहणेन श्लेषविरोध-संकरालंकारोऽयमिति दर्शयति। अनुग्रहयोगादेकतरत्यागग्रहणनिमित्ताभावो हि वा-शब्देन सूच्यते ॥'—*Op. cit.*, p. 237.

'श्लाघ्याशेष....प्रतीयते'—In this verse again श्लेष and व्यतिरेक are both *expressed* and consequently it cannot be regarded as an instance of शब्दशक्तिमूलध्वनि. Compare °*Locana*, "सुदर्शनं चक्रं करे यस्य। व्यतिरेकपक्षे सुदर्शनौ श्लाघ्यौ करावेव यस्य। चरणारविन्दस्य ललितं त्रिभुवनाक्रमणक्रीडनम्। चन्द्ररूपं चक्षुर्धारयन्। **वाच्यतयैवेति**। स्वतनोरधिकामिति शब्देन व्यतिरेकस्य उक्तत्वात् ॥"—*ibid.* The verse 'भ्रमिमरतिम्—' illustrates how श्लेष and रूपक are both वाच्य. Compare *Locana*. भुजगशब्दार्थपर्यालोचनाबलादेव विषशब्दो जलमभिधायापि न विरन्तुमुत्सहते। अपि तु द्वितीयमर्थं हालाहल-लक्षणमाह। तदभिधानेन विनाऽभिधाया एवासमाप्तत्वात्। भ्रमिप्रभृतीनां तु मरणान्तानां साधारण एवार्थः ॥—*Op. cit.*, p. 338. The verse has also been

cited in Mammaṭa's *Kāvyaprakāśa* as an instance of गुणीभूत-व्यङ्ग्य of वाच्यसिद्धयङ्ग variety : 'अत्र हालाहलं व्यङ्ग्यं भुजगरूपस्य वाच्यस्य सिद्धिकृत्'. We are to note that while Abhinavagupta considers the idea of हालाहल to be *expressed* (वाच्य), according io Mammaṭa it is *suggested* (व्यङ्ग्य).

"चमहिअ....गइन्दा"—"निराशीकृतत्वेन खण्डितानि यानि मानसानि शत्रुहृदयानि तान्येव काञ्चनपङ्कजानि। ससारत्वात् तैर्हेतुभूतैः। णिम्महिअपरिमला इति। प्रसृतप्रतापसारा अखण्डितविसरणप्रसरा बाहुपरिघा एव यस्य गजेन्द्रा इति। गजेन्द्रशब्दवशाच्च-महिअशब्दः परिमलशब्दो दानशब्दश्च त्रोटनसौरभ-मद-लक्षणानर्थान् प्रतिपाद्यापि न परिसमाप्ताभिधाव्यापारा भवन्तीत्युक्तरूपं द्वितीय-मप्यर्थमभिदधत्येव ॥"—*°Locana*, p. 238.

TEXT

§ ३४। स चाक्षिप्तोऽलंकारो यत्र पुनः शब्दान्तरेणाभिहित-स्वरूपस्तत्र न शब्दशक्त्युद्भवानुरणनरूपव्यङ्ग्यध्वनिव्यवहारः। तत्र वक्रोक्त्यादिवाच्यालंकारव्यवहार एव। यथा—

'दृष्ट्या केशव ! गोपरागहृतया किञ्चिन्न दृष्टं मया
तेनैव स्खलितास्मि नाथ ! पतितां किं नाम नालम्बसे।
एकस्त्वं विषमेषु खिन्नमनसां सर्वाबलानां गति-
र्गोप्यैवं गदितः सलेशमवताद् गोष्ठे हरिर्वश्चिरम् ॥'

एवञ्जातीयकः सर्व एव भवतु कामं वाच्यश्लेषस्य विषयः। यत्र तु सामर्थ्याक्षिप्तं सदलंकारान्तरं शब्दशक्त्या प्रकाशते स सर्व एव ध्वनेर्विषयः। यथा—'अत्रान्तरे कुसुमसमययुगमुपसंहरन्न-जृम्भत ग्रीष्माभिधानः फुल्लमल्लिकाधवलाट्टहासो महाकालः।'

यथा च—'उन्नतः प्रोल्लसद्धारः कालागुरुमलीमसः।
पयोधरभरस्तन्व्याः कं न चक्रेऽभिलाषिणम् ॥'

यथा वा—'दत्तानन्दाः प्रजानां समुचितविषयाकृष्टसृष्टैः पयोभिः
पूर्वाह्णे विप्रकीर्णा दिशि दिशि विरमत्यह्नि संहारभाजः।

दीप्तांशोर्दीर्घदुःखप्रभवभवभयोदन्वदुत्तारनावो
गावो वः पावनानां परमपरिमितां प्रीतिमुत्पादयन्तु ॥'

एषूदाहरणेषु शब्दशक्त्या प्रकाशमाने सत्यप्राकरणिकेऽर्थान्तरे वाक्यस्यासम्बद्धार्थाभिधायित्वं मा प्रसाङ्क्षीद् इति अप्राकरणिक-प्राकरणिकार्थयोरुपमानोपमेयभावः कल्पयितव्यः सामर्थ्यादि इत्यर्थाक्षिप्तोऽयं श्लेषो न शब्दोपारूढ इति विभिन्न एव श्लेषादनुस्वानोपमव्यङ्ग्यस्य ध्वनेर्विषयः। अन्येऽपि चालंकाराः शब्दशक्तिमूलानुस्वानरूपव्यङ्ग्ये ध्वनौ सम्भवन्त्येव। तथा हि विरोधोऽपि शब्दशक्तिमूलानुस्वानरूपो दृश्यते। यथा स्थाण्वीश्वराख्य-जनपदवर्णने भट्टबाणस्य—

'यत्र च मातङ्गगामिन्यः शीलवत्यश्च, गौर्यो विभवरताश्च, श्यामाः पद्मरागिण्यश्च, धवलद्विजशुचिवदना मदिरामोदिश्वसनाश्च प्रमदाः ॥'

EXPOSITION

§ 34. Now Ānandavardhana justifies the use of the restrictive particle एव in the above *kārikā* : 'एवमाक्षिप्तशब्दस्य व्यवच्छेद्यं प्रदर्श्य एवकारस्य व्यवच्छेद्यं दर्शयितुमाह—स चेति।' —°*Locana*. स च....व्यवहार एव—We have noted that when the relation between the प्रकृत and अप्रकृत ideas is not expressly stated, it is a case of शब्दशक्तिमूलध्वनि. But if the poet uses any such word that is *expressive* (वाचक) of the relation which has already been suggested, it would not entitle the piece to be considered as a specimen of शब्दशक्ति-मूलध्वनि. *To be a case of* शब्दशक्तिमूलध्वनि, *the relation must always be suggested, and in no way expressed.* Otherwise it would be regarded merely as an instance of such figures of speech as वक्रोक्ति consisting in witty expressions and striking modes of speech. Thus, एव is significant excluding as it does such cases from the scope of शब्दशक्तिमूलध्वनि.

Abhinavagupta's comments are very illuminating on this point: "उभयार्थप्रतिपादनशक्तशब्दप्रयोगे यत्र तावदेकतरवि य-नियमनकारणम् अभिधाया नास्ति, यथा—'येन ध्वस्तमनोभवेन' इति, यत्र वा प्रत्युत द्वितीयाभिधाव्यापारसद्भावावेदकं माणमस्ति यथा—'तस्या विना' इत्यादौ, तत्र तावत् सर्वथा 'चमहिअ' इत्यन्ते। सोऽर्थोऽभिधेय इति स्फुटमदः। यत्रापि अभिधाया एकत्र नियमहेतुः प्रकरणादिर्विद्यते तेन द्वितीयस्मिन् अर्थे नाभिधा संक्रामति, तत्र द्वितीयोऽर्थोऽसावाक्षिप्त इत्युच्यते, तत्रापि यदि पुनस्तादृक्च्छब्दो विद्यते येनासौ नियामकः प्रकरणादिरपहृतशक्तिकः संपाद्यते। अत एव साऽभि शक्तिर्बाधिताऽपि सती प्रतिप्रसूतेव, तत्रापि न ध्वनेर्विषय इति तात्पर्यम्। चशब्दोऽपिशब्दाथ भिन्नक्रमः। आक्षिप्तोऽपि आक्षिप्ततया झटिति सम्भावयितुमारब्धोऽपि इत्यर्थः। न त्वसावाक्षिप्तः, किन्तु शब्दान्तरेण अन्येन अभिधायाः प्रतिप्रसवनाद् अभिहितस्वरूपः सम्पन्नः। पुनर्ग्रहणेन प्रतिप्रसवं व्याख्यातं सूचयति। तेनैवकार आक्षिप्ताभासं निराकरोति"—°*Locana,* pp. 238–39.
This rule holds good in the case of emotions (रस) as well. Thus, if a particular emotion properly developed and suggested through विभाव's, अनुभाव's and संचारिभाव's be again *denoted* by words *expressive* (वाचक) of it, like शृङ्गार, करुण etc., it would be regarded as a defect and reflect the bad craftsmanship of the poet. **Jagannātha's** strictures on this point are worthy of note : "इत्थमविरोधसंपादनेनापि निबध्यमानो रसो रसशब्देन शृङ्गारादिशब्दैर्वा नाभिधातुमुचितः। अनास्वाद्यतापत्तेः। तदास्वादश्च व्यञ्जनमात्रनिष्पाद्य इत्युक्तत्वात्। यत्र विभावादिभिरभिव्यक्तस्य रसस्य स्वशब्देनाभिधानं तत्र को दोषः इति चेत्, व्यङ्ग्यस्य वाच्यीकरणे सामान्यतो वमनाख्यदोषस्य वक्ष्यमाणत्वात्। आस्वाद्यतावच्छेदकरूपेण प्रत्ययाजनकतया रसस्थले वाच्यवृत्तेः कापेयकल्पत्वेन विशेषदोषत्वाच्च॥—*Op. cit.,* p. 61.

'दृष्टया केशव ! . . . . चिरम्'[1]—Abhinavagupta explains the verse as follows : "हे केशव ! गोधूलिहृतया दृष्टया न किञ्चिद् दृष्टं मया । तेन कारणेन स्खलितास्मि मार्गे । तां पतितां सतीं मां किं नाम कः खलु हेतुः यन्नालम्बसे हस्तेन । यतस्त्वमेव एकोऽतिशयेन बलवान् निम्नोन्नतेषु सर्वेषामबलानां बालवृद्धाङ्गनादीनां खिन्नमनसां गन्तुमशक्नुवतां गतिरालम्बनाभ्युपाय इत्येवंविधेऽर्थे यदप्येते प्रकरणेन नियन्त्रिताभिधाशक्तयः शब्दास्तथाऽपि द्वितीयेऽर्थे व्याख्यास्यमानेऽभिधाशक्तिर्निरुद्धा सती 'सलेश'मित्यनेन प्रत्युज्जीविता । तत्र सलेशं ससूचनमित्यर्थः, अल्पीभवनं हि सूचनमेव । हे केशव ! गोप स्वामिन् ! रागहृतया दृष्टयेति । केशवगेन उपरागेण हृतया दृष्टयति वा संबन्धः । स्खलितास्मि खण्डितचरित्रा जातास्मि । पतितामिति भर्तृभावं मां प्रति । एक इति असाधारण-सौभाग्यशाली त्वमेव । यतः सर्वासामबलानां मदनविधुरमनसामीर्ष्याकालुष्यनिरासेन सेव्यमानः सन् गतिः जीवितरक्षोपाय इत्यर्थः ॥"—*Op.cit.*, p. 240. Thus, the use of the word 'सलेशम्' ('covertly') gives a fresh impetus to the *function of denotation* (अभिधाव्यापार) in conveying the second idea as addressed by the maiden to her paramour, which otherwise would have been communicated through the function of suggestion, the function of अभिधा being circumscribed within the sphere of the प्रकृत (contextual) meaning alone by virtue of the restrictive force of प्रकरण or *context*. Compare : "अत्र गापरागादिशब्दानां गोपे राग इत्यादिव्यङ्ग्यार्थानां सलेशमिति पदेन स्फुटतयाऽवभासः । सलेशमिति पदस्य परित्यागे ध्वनिरेव"—*Sāhityadarpaṇa.*

---

1. The verse is really an instance of उभयशक्तिमूलध्वनि, though it has been cited by the Dhvanikāra as a counter-instance (प्रत्युदाहरण) in the context of शब्दशक्तिमूलध्वनि. For Rūyyaka's justification of this apparent anomaly compare his remarks quoted later on.

यत्र....विषयः—Ānandavardhana now defines and illustrates शब्दशक्तिमूलध्वनि. The अलंकार (i.e. the relation between the primary and the suggested meanings) must always be *suggested*, as has been so often stated above. He quotes the *Harṣacarita* passage : 'अत्रान्तरे....महाकालः', as an instance of अलंकारध्वनि based on शब्दशक्ति. Here the word महाकाल has two meanings—one referring to the long summer (महान् कालः) through योगशक्ति and the other to Siva through रूढि. The former being contextual (प्राकरणिक), it is conveyed through *denotion*, and the latter as also the relation of *similarity* (सादृश्य) subsisting between the two are comprehended through *suggestion*.

Compare Abhinavagupta's comments :—

"एवं श्लेषालंकारस्य विषयमवस्थाप्य ध्वनेराह—यत्र स्थिति। कुसुमसमयात्मकं यद्युगं मासद्वयं तदुपसंहरन्। धवलानि हृद्यानि अट्टानि आपणा येन तादृक् फुल्लमल्लिकानां हासो विकासः सितिमा यत्र। फुल्लमल्लिका एव धवलाट्टहासोऽस्येति तु व्याख्याने 'जलद-भुजगजम्' इत्येतत्तुल्यमेतत् स्यात्। महांश्चासौ दिनदैर्घ्यंदुरति-वाहतायोगात् कालः समयः। अत्र ऋतुवर्णनप्रस्तावनियन्त्रिता-भिधाशक्तयः, अत एव 'अवयव-प्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी' इति न्यायमपाकुर्वन्तो महाकालप्रभृतयः शब्दाः एतमेवार्थमभिधाय कृतकृत्या एव। तदनन्तरमर्थावगतिर्ध्वननव्यापारादेव शब्दशक्ति-मूलात्॥"—The following passages from °*Locana* are important inasmuch as they record the divergent views of various schools regarding the necessity and scope of the function of suggestion :—(१) अत्र केचिन्मन्यन्ते—'यत एतेषां शब्दानां पूर्व-मर्थान्तरेऽभिधान्तरं दृष्टं ततस्तथाविधेऽर्थान्तरे दृष्टतदभिधाशक्तेरेव प्रतिपत्तुर्नियन्त्रिताभिधाशक्तिकेभ्य एतेभ्यः प्रतिपत्तिर्ध्वननव्यापारा-देवेति शब्दशक्तिमूलत्वं व्यङ्ग्यत्वं चेत्यविरुद्धम्' इति॥

(२) अन्ये तु—'साऽभिधैव द्वितीया अर्थसामर्थ्यं ग्रीष्मस्य भीषण-देवता-विशेष-सादृश्यात्मकं सहकारित्वेन यतोऽवलम्बते ततो ध्वननव्यापाररूपोच्यते'-इति ॥

(३) एके तु—'शब्दश्लेषे तावद् भेदे सति शब्दस्य, अर्थ-श्लेषेऽपि शक्तिभेदात् शब्दभेद इति दर्शने द्वितीयः शब्दस्तत्रानीयते । स च कदाचिद् अभिधाव्यापारात् यथोभयोरुत्तरदानाय—'श्वेतो धावति' इति, प्रश्नोत्तरादौ वा तत्र वाच्यालंकारता। यत्र तु ध्वननव्यापारादेव शब्द आनीतः, तत्र शब्दान्तरबलादपि तदर्थान्तरं प्रतिपन्नं प्रतीयमानमेव युक्तम् ॥

(४) इतरे तु—'द्वितीयपक्षव्याख्याने यदर्थसामर्थ्यं तेन द्वितीयाऽभिधैव प्रतिप्रसूयते, ततश्च द्वितीयोऽर्थोऽभिधीयते एव न ध्वन्यते, तदनन्तरं तु तस्य द्वितीयार्थस्य प्रतिपन्नस्य प्रथमार्थेन प्राकरणिकेन साकं या रूपणा सा तावद् भात्येव, न चान्यतः शब्दाद् इति सा ध्वननव्यापारात् । तत्र अभिधाशक्तेः कैश्चिदपि अनाशङ्कनीयत्वात् । तस्यां च द्वितीया शब्दशक्तमूलम् । तया विना रूपणाया अनुत्थानात् । अत एव अलंकारध्वनिरयमिति युक्तम् । वक्ष्यते च—'असम्बद्धार्थाभिधायित्वं मा प्रसाङ्क्षीद्' इत्यादि ।[1] पूर्वत्र तु सलेशपदेनैवासम्बद्धता निराकृता । 'येन ध्वस्त'-इत्यत्रसम्बद्धता नैव भाति । 'तस्या विनापि' इत्यत्रापिशब्देन, 'श्लाघ्या—' इप्यत्राधिकशब्देन, 'भ्रमिम्—' इत्यादौ च रूपकेण असम्बद्धता निराकृतेति तात्पर्यम् ॥"—°*Locana*, pp. 141-44.

Mahimabhaṭṭa holds that the passage 'अत्रान्तरे..महाकालः' is really an instance of *double entendre* (श्लेष) based on समासोक्ति, and that the term महाकालः might as well be dispensed with and replaced by its equivalent महासमयः without

---

1. This is the position taken by Appayya Dīkṣita. Consult the extracts from his *Vṛttivārttika* cited above.

detracting in the least from the sense intended to be conveyed by the poet. Compare :—

"तत्र धर्म्यर्थस्य श्लेषादभिन्नत्वं यथा--'अत्रान्तरे—' इति। अत्र हि समासोक्तिनिबन्धना देवताविशेषवाचिनो महाकालशब्दस्यावृत्तिर्न तु तस्यैवोभयार्थत्वनिबन्धनेति वक्ष्यते"—*Op. cit.*, pp. 344-45.

Also :—"'अत्रान्तरे—' इत्यत्र अप्राकरणिक-महाकालाख्यदेवताविशेषविषया प्रतीतिः साध्या। तस्याश्च अट्टहास-सम्बन्धो युगसंहारव्यापारश्चेत्युभयं साधनं, तस्य तत्कार्यत्वात्। कार्यकारणभावावसायश्च अनयोरागमप्रमाणमूल इति तत एव समासोक्तिक्रमेण अप्राकरणिकार्थान्तरप्रतीतिसिद्धिः न तूभयार्थवृत्तेर्महाकालशब्दस्य सा शक्तिरित्येतदुक्तं वक्ष्यते च"—*Op. cit.*, p. 417.

'उन्नतः....अभिलाषिणम्'—Here the term पयोधरः is श्लिष्ट, meaning स्तन and मेघ. The other expressions like उन्नतः, प्रोल्लसद्धारः etc. yield two meanings. According to the Dhvanikāra उपमा (*similarity* between स्तन and मेघ) is suggested here. But Mahimabhaṭṭa observes that the verse cannot yield more than one meaning at all, for the poet has not thrown out any hint or clue that might necessitate the re-iteration (आवृत्ति) of the words[1] for the comprehension of the second sense, as in the passage 'अत्रान्तरे—' the poetic figure समासोक्ति led to the apprehension of the अप्रकृत meaning 'Śiva' from the term महाकालः, "'उन्नतः-'इत्यत्र त्वनन्तरोक्तः प्रकारो न संभवति इति कुतोऽर्थान्तरावगतिः"—*Op. cit.*, p. 417.

'दत्तानन्दाः....उत्पादयन्तु'—The verse is from Mayūra's *Sūryaśataka*. Here the rays of the sun are the objects of

1. Compare the maxims 'यावन्तः शब्दास्तावन्तोऽर्थाः' and 'प्रत्यर्थं शब्दनिवेशः'.

description and as such प्राकरणिक. But since the vocable 'गो' has multiple meanings, it gives rise to the idea of सुरभि, 'the cow', and consequently the *similarity* (सादृश्य) between the two ideas is comprehended through *suggestion*. "पयोभिरिति पानीयैः क्षीरश्च। संहारो ध्वंसः, एकत्र ढौकनं च। गावो रश्मयः सुरभयश्च।" —°*Locana*. Compare however Mahimabhaṭṭa's criticism: 'दत्तानन्दाः—' इत्यत्र तु गो-शब्दस्य अनेकार्थत्वे ऽप्राकरणिकार्थान्तरप्रतिभोत्पत्तौ न किञ्चिन्निबन्धनमवधारयामः। तथाहि गोशब्द एवानेकार्थत्वात् निबन्धनमुपकल्प्येत, तद्विशेषणजातम्, उभयमपि वा, अन्यस्य अर्थप्रकरणादेरसम्भवात्। तत्र न तावत् गो-शब्द एवेति शक्यते वक्तुं, सुरभिव्यतिरिक्ते वज्रादौ अनभिमतेऽपि अर्थान्तरे प्रतीत्युपजननप्रसङ्गात्, तस्य अनेकार्थत्वाविशेषेऽपि नियमहेतोरभावात्। अथ विशेषणजातमेव नियमहेतुर्नापरः, तद्धि यदर्थानुगुणमुपलभ्यते तत्रैव प्रतीतिमुपजनयतीति, तर्हि ततोऽपि सा तदनुगुणार्थावगतिर्निर्निबन्धना तद्वदेवाकस्मिकी कथमिवोत्पद्येत। विशेष्यवाचिनोऽनेकार्थस्य तु तन्निबन्धनभावोपगमे अन्योन्याश्रयदोषः। न च उभयमपि अन्योन्यानुग्राहि तदुपजननसामर्थ्यम् अवनिपवनादिकमिव अङ्कुरम् अर्थान्तरप्रतिभामुपजनयति। यतो जडपदार्थविषय एवायमुपपन्नः क्रमः, यत्र स्वाभाविक एवायं जन्यजनकभावः, न वाच्यवाचकभावविषयः। यत्र हि प्रतिपत्तृपरामर्शापेक्षापरतन्त्रोऽर्थाध्यवसायोपजनो न स्वाभाविकः॥[1]—*Op. cit.*, p. 418.

---

1. Mahimabhaṭṭa regards the verse 'दत्तानन्दाः—' an instance of the defect known as अवाच्यवचन, since the poet has not used any such particle expressive of *similarity* as इव etc. in the absence of which the *double entendre* becomes ineffective and useless, and consequently the intended अप्रकृतार्थ is not cognised. Comp. 'अत्र हि गाव इत्यस्य विशेष्यवाचिन उपमानाभिमतार्थान्तरवृत्तित्वेऽपि विशेषणानाञ्चोभयार्थानुगुण्येऽपि उपमानस्य तत्सम्बंधाभिधायिनश्च अवश्य-वाच्यस्य अवचनं यत् स दोष इत्येनद् वितनिष्यते'—*Op. cit.*, p. 366.

एषूदाहरणेषु....विषय:—As noted above the relation of similarity is apprehended in the illustrations cited in the previous sections, for in the absence of such a *relation* the two senses would remain *discrete* (असम्बद्ध) and the poet would be charged of incongruity for using words that yield ideas that have no bearing on the topic at hand (प्राकरणिकार्थ), and then the maxim 'आम्रान् पृष्ट: कोविदारानाचष्ट,[1] would apply.

अन्येऽपि....दृश्येत—Ānandavardhana now proceeds to cite additional instances of शब्दशक्तिमूलध्वनि where other relations like विरोध, आधिक्य, क्रम (constituting the basis of poetic figures like विरोधाभास, व्यतिरेक, यथासंख्य respectively) are suggested besides औपम्य as already noted. The following extract from Rūyyaka's *Kāvyaprakāśq-saṁketa* is highly illuminating on this point as it offers an answer to a very cogent and probable objection to the principle laid down above—viz. 'असम्बद्धार्थाभिधायित्वं मा प्रसाङ्क्षीत् इति,' which seems *prima facie* inapplicable in these cases where विरोध and similar other figures are suggested : "..ननु यद्येवमसम्बद्धार्थ-भयादुपमा व्यज्यते, तर्हि विरोधव्यतिरेकाद्यलंकारान्तरं कथं व्यङ्ग्यं स्यात्, नहि तेनासम्बद्धार्थत्वं परिह्रियते। नैतत्। यत्र वस्तुमात्र-रूपस्य अर्थान्तरप्रतीतिस्तत्र तस्य वाच्यं प्रत्यसम्बद्धत्वभयात् औपम्याख्य: सम्बन्ध: कल्प्यते। यत्र तु विरोधादेरलंकारस्य प्रतीतिस्तत्र तस्य अलंकारत्वादेव वैचित्र्यात्मकत्वाद् वैचित्र्यस्य च विचित्रवस्तुसंलग्नत्वात् विचित्रेण अलंकार्येण वाच्यभूतेन अव्यभिचरित एव संबन्ध:। एवञ्चात्र असम्बद्धार्थत्वसंभावना नास्ति। केवलमत्रालंकारस्य प्रतीयमानत्वात् आत्मत्वेऽपि ब्राह्मण-श्रमणन्यायेन अज्ञातपूर्वगत्याऽलंकारत्वम्॥" —*Op. cit.*, p. 28.

---

1 *Compare* Col. G. A. Jacob's *A Handful of Popular Maxims*, Pt. ii, p. 10.

"उपमानोपमेयभावः इति—तेनोपमा-रूपण-व्यतिरेचन-निह्नवादयो व्यापारमात्ररूपा एवात्रास्वादप्रतीतेः प्रधानं विश्रान्तिस्थानं, न तूपमेयादि इति सर्वत्रालंकारध्वनौ मन्तव्यम्। सामर्थ्यादिति। ध्वनन-व्यापारादित्यर्थः।"—°*Locana*, p. 245.

As an instance of विरोधालंकारध्वनि the author cites the *Harṣa-carita* text: 'यत्र च....प्रमदाः'—Compare Abhinavagupta's explanation: "मातङ्गेति। मातङ्गवद् गच्छन्ति, तान् शबरांश्च गच्छन्ति इति विरोधः। विभवेषु रताः, विगतमहादेवे स्थाने च रताः। पद्मरागरत्नयुक्ताः पद्मसदृशलौहित्ययुक्ताश्च। धवलैर्द्विजैर्दन्तैः शुचि निर्मलं वदनं यासां धवलद्विजवत् उत्कृष्टविप्रवत् शुचि वदनं च यासाम्॥'—°*Locana*, p. 246.

TEXT

§ ३५। अत्र हि वाच्यो विरोधस्तच्छायानुग्राही वा श्लेषोऽयमिति न शक्यं वक्तुम्। साक्षाच्छब्देन विरोधालंकारस्य अप्रकाशितत्वात्। यत्र हि साक्षाच्छब्दावेदितो विरोधालंकारस्तत्र हि श्लिष्टोक्तौ वाच्यालंकारस्य विरोधस्य श्लेषस्य वा विषयत्वम्। यथा तत्रैव—

'समवाय इव विरोधिनां पदार्थानाम्। तथाहि—सन्निहित-बालान्धकाराऽपि भास्वन्मूर्त्तिः'-इत्यादौ।

यथा वा ममैव—

सर्वैकशरणमक्षयमधीशं धियां हरिं कृष्णम्।
चतुरात्मानं निष्क्रियमरिमथनं नमत चक्रधरम्॥

अत्र हि शब्दशक्तिमूलानुस्वानरूपो विरोधः स्फुटमेव प्रतीयते॥

EXPOSITION

§ 35. अत्र हि वाच्यो विरोधः....अप्रकाशितत्वात्—According to Ānandavardhana in the instance 'यत्र च मातङ्ग....प्रमदाः' the figure विरोध (i.e. विरोधाभास) as based on श्लेष is *not expressed* through the *denotative function* of words, because in

the sentence itself there is no word like अपि directly expressive of *contradiction* or *incongruity* (विरोध), which is thus conveyed through *suggestion* (व्यञ्जना) alone. But as against this *see* Mahimabhaṭṭa's remarks : "यत्र च सातङ्गगामिन्यः'—इत्यत्र च-शब्दावेदितो विरोधः, तस्यापि अपिशब्दस्येव तदर्थाभिधानसामर्थ्योपगमात् । यथा—

"घृणी कर्णः प्रमादी च तेन मेऽर्धरथो मतः ।'

इत्यसिद्धं विरोधस्य साक्षाच्छब्देन अप्रदर्शितत्वम्''—*Vyaktiviveka*, pp. 361-32.

यत्र हि....इत्यादौ—In the passage 'सन्निहित—', अपि *expresses* विरोध, and as such it cannot be regarded as a case of शब्दशक्तिमूलध्वनि. It is merely an instance of वाच्यश्लेष and वाच्यविरोध mixed up together (सङ्कर). Compare °*Locana* : यत्र हीति । यस्यां श्लेषोक्तौ काव्यरूपायां, तत्र यो विरोधः श्लेषो वेति संकरः तस्य विषयत्वम् । स विषयो भवतीत्यर्थः । कस्य ? वाच्यालंकारस्य वाच्यालंकृतेः वाच्यालंकृतित्वस्येत्यर्थः । तत्रव विरोधे श्लेषे वा वाच्यालंकारत्वं सुवचमिति यावत् । बालेषु केशेष्वन्धकारः कार्ष्ण्यं बालः प्रत्यग्रश्चान्धकारस्तमः ॥—*Op. cit.*, pp. 245-46. Compare also the following note on विरोधालंकारध्वनि as taken from रसगङ्गाधर : "एवमलंकारान्तरमपि शब्दशक्तिमूलानुरणनस्य विषयः । यथा यमुनावर्णने—'रविकुलप्रीतिमावहन्ती नर-वि-कुलप्रीतिमावहति । अवारितप्रवाहा सुवारितप्रवाहा ।' इह नराण वीनां च कुलस्य प्रीतिमावहतीति प्रकृतेऽर्थे सिद्धे रविकुलप्रीति नावहतीति द्वितीयोऽप्रकृतोऽर्थो विरोधश्च । एवमन्यत्रापि । यदि तु रविकुलप्रीतिमावहन्त्यपि न रविकुलप्रीतिमावहति, अवारितप्रवाहाऽपि सुवारितप्रवाहा इत्यपिरन्तर्भाव्यते । तदा विरोधांशस्य अपिना उक्तत्वात् द्वितीयार्थस्य च तदाक्षिप्तत्वात्, न ध्वनित्वम् । निपातानां द्योतकतानयेऽपि स्फुटद्योतितस्य तदाक्षिप्तस्य च वाच्य-

कल्पत्वात् न तथात्वम् ॥—*Op. cit.*, pp. 159-60.

यथा वा....प्रतीयते—One might, however, say following Mahimabhaṭṭa, that in the previous illustration of विरोधालंकार-ध्वनि, viz. 'यत्र च मातङ्गगामिन्यः—', the विरोध has been *expressed* by the perticle च, so it is not a genuine instance of शब्दशक्तिमूलध्वनि. In anticipation of such an objection Ānandavardhana cites another verse of his own, viz. 'सवक-शरण—'[1], where विरोध is completely beyond the scope of the denotative function of words.

Cp. °*Locana* : "ननु मातङ्गेत्यादावपि धर्मद्वये यश्चकारः स विरोधद्योतक एव। अन्यथा प्रतिधर्मं सर्वधर्मान्ते वा, न क्वचिद् वा चकारः स्यात् यदि समुच्चयार्थः स्यात्, इत्यभिप्रायेण उदाहरणा-न्तरमाह—यथेति। शरणं गृहम् अक्षयरूपमगृहं कथम्। यो न धीशः स कथं धियामीशः। यो हरिः कपिलः, स कथं कृष्णः। चतुरः पराक्रमयुक्तो यस्यात्मा स कथं निष्क्रियः। अरिणामरयुक्तानां यो नाशयिता स कथं चक्रं बहुमानेन धारयति। विरोध इति। विरोधन-मित्यर्थः। प्रतीयते इति। स्फुटं नोच्यते केनचिद् इति भावः।"—*Op. cit.*, p. 246.

TEXT

§ ३६। एवंविधो व्यतिरेकोऽपि दृश्यते। यथा ममैव—

'खं येऽत्युज्ज्वलयन्ति लूनतमसो ये वा नखोद्भासिनो
ये पुष्णन्ति सरोरुहश्रियमपि क्षिप्ताब्जभासश्च ये।

---

1 According to Mahimabhaṭṭa this too is an illustration of वाच्यावचन on grounds already noted in the previous foot-note : 'इहापि वाच्यावचनमवगन्तव्यम्'—*Op. cit.*, p. 366. Pratihārendurāja however considers it an example of श्लेष which gives rise to the cognition of विरोध, though only *apparent* . Compare : 'सर्वैकशरणम्—'इत्यादावपि श्लेषः। तथाह्यत्र सर्वैकशरणमक्षयमित्यादीनां शब्दानामर्थभेदेन भिन्नत्वे सति यथायोगमेकप्रयत्नो-च्चार्याणामेकप्रयत्नोच्चार्यशब्दसदृशानां वोच्चारणम्। अतो विरोधालंकार-प्रतिभोत्पत्तिहेतुरत्र श्लेषः।—*Op. cit.*, p. 88.

ये मूर्धस्ववभासिनः क्षितिभृतां ये चामराणां शिरां-
स्याक्रामन्त्युभयेऽपि ते दिनपतेः पादाः श्रिये सन्तु वः ॥

एवमन्येऽपि शब्दशक्तिमूलानुस्वानरूपव्यङ्ग्यध्वनिप्रकाराः सन्ति, ते सहृदयैः स्वयमनुसर्त्तव्याः । इह तु ग्रन्थविस्तरभयान्न तत्प्रपञ्चः कृतः ।

EXPOSITION

§ 36. Ānandavardhana cites his own verse—'खं येऽत्युज्ज्वलयन्ति—', to illustrate शब्दशक्तिमूलव्यतिरेकध्वनि. 'नखैरुद्भासन्ते येऽवश्यं खे गगने न उद्भासन्ते । उभये रश्म्यात्मानोऽङ्गुलीपाण्यीद्यवयविरूपाश्चेत्यर्थः ॥'—°*Locana.* Thus the excellence of the solar *rays* over the *feet* of the anthropomorphic deity is *suggested* in this verse. Mahimabhatta represents it as a case of logical inference. Comp. 'खं येऽभ्युज्ज्वलयन्ति—'इत्यत्र उभयेषां पादानां व्यतिरेकोऽनुमेयस्तत्र चैषां भिन्नविशेषणत्वमेव हेतुः ॥'—*Op. cit.*, p. 362. एवमन्येऽपि . . कृतः—In this way other poetic figures too might be suggested. For example, Jagannātha cites the following verse as an instance of शब्दशक्तिमूल-परिणाम-ध्वनिः—

"पान्थ मन्दमते किं वा सन्तापमनुविन्दसि ।
पयोधरं समाशास्व येन शान्तिमवाप्नुयाः ॥"—

and observes : अत्र झगिति तापशमनहेतुत्वेनोपस्थिते पश्चात् मन्दबोधनीय-विशेष्यक-स्मरतापवत्ता-वैशिष्टयबुद्धौ सत्यां सहृदयस्य तादृश-तापशमक-रमणीस्तनरूप-विषयताद्रूप्यबुद्धिर्भवति— *Op. cit.*, pp. 338-59. It is to be noted that Ānandavardhana does not at all refer to the शब्दशक्तिमूलवस्तुध्वनि as a separate category. This silence on the part of the Dhvanikāra has been construed by Rūyyaka in his *Kāvāyaprakāśa-saṁketa* as testifying to the non-existence of any such category. The verse 'दृष्ट्या केशव—' however which has been cited as a counter-illustration seems at first sight to go against such a thesis, but Rūyyaka has

ably explained it away with clever arguments. The followin extract from the °*Saṁketa* is very illuminating as it clarifies the position of Dhvanikāra *vis-ā-vis* that of later theorists like Mammaṭa with regard to शब्दशक्तिमूलध्वनि in general and its possible divisions in particular "......एवं तर्हि यत्र शब्दशक्त्या वस्तुमात्रं प्रतीयते यद् 'वस्त्वेवे'ति लक्षितं, तत्र कथमुपमान्तरेण असम्बद्धार्थत्वपरिहार: ? अथ उपमाया अत्राङ्गीकार: कथं तर्हि वस्तुमात्रं व्यङ्ग्यं स्यात् ? सत्यम्, यत्र शब्दशक्त्या वस्त्वन्तरस्य प्रतीतिस्तत्र यदि नासम्बद्धार्थत्वेनौपम्यं नालङ्कारान्तरम् तर्हि वाच्यप्रतीयमानयोरन्यत् किंचित् ज्ञातेयमभ्युपगन्तव्यम्, अन्यथा ऽसम्बद्धार्थस्य परिहारो न स्यात्। ज्ञातेयञ्च चिन्त्यमानं व्यङ्ग्यं प्रति वाच्यार्थस्य सामर्थ्यविशेषे पर्यवस्यति। स च वक्त्रौचित्यादिरूप:। एवं शब्दशक्त्या वाच्यगतेन च सामर्थ्यविशेषेण अर्थान्तरप्रतीतौ कार्यायाम् उभयशक्तिमूलत्वमेवात्र पर्यवस्यति, न केवल शब्दशक्तिमूलत्वम्। अत एव ध्वनिकृता "आक्षिप्त एवालंकार: शब्दशक्त्या प्रकाशते"-इत्यादिकारिकयाऽलङ्कारध्वनिरेव शब्दशक्तिमूला लक्षित:, न वस्तुमात्रध्वनि:। उभयशक्तिमूलस्तु 'शब्दार्थशक्त्याऽक्षिप्तोऽपि'—इत्येतत्कारिकावृत्तिग्रन्थे प्रकाशित.। अयन्तु ग्रन्थकार:[1] उभयशक्तिमूले भ्रान्त: शब्दशक्तिमूलं वस्तुध्वनिमभ्युपगतवान्। 'पंथिअ ण एत्थ—' इत्युदाहरणद्वये क्रमेण वक्त्रौचित्यं प्रतिपाद्यौचित्यं च आश्रित्य शब्दशक्त्याऽर्थान्तरप्रतीतिरित्युभयशक्तिमूलत्वात् केवलशब्दशक्तिमूलत्वं चिन्त्यम्। यत्तु ध्वनिकृता 'दृष्ट्या केशवे'-त्यादि शब्दशक्तिमूले प्रत्युदाहरणत्वेन उदाहृत्योभयशक्तिमूलत्वम् उदाहृतम् तत् 'यो हि उभयोर्भयति लभतेऽसावन्यतरतोऽपि व्यपदेशम्' इति न्यायेन मुख्यतयोभयशक्तिमूलत्वेऽपि अन्यतरव्यपदेशेन शब्दशक्तिमूले प्रकाशनात्। एतद्ग्रन्थकृता तूभयशक्तिमूलोऽन्यादृश: प्रदर्शित: इति प्रकृते शब्दशक्ति-

1. Mammaṭa.

मूलत्वमुक्तमिति चिन्त्यतया प्रतिपादितम् ॥"—*Op. cit.*, pp. 29-30. Also, while commenting on the verse 'अतन्द्रचन्द्राभरणा—' cited by Mammaṭa as an illustration of उभयशक्तिमलध्वनि, Rūyyaka observes : अत्र ग्रन्थकृता उभयशक्तिमूलत्वमित्थमभिप्रतम् । श्लिष्टशब्दमाहात्म्यात् शब्दशक्तिमूलत्वम्, तद्वर्जितसाधारण-शब्दमाहात्म्यात् अर्थशक्तिमूलत्वमित्युभशक्तिमूलत्वम्, एवं च शब्दशक्तिमूले न्यान्युदाहरणानि तानि उभयशक्तिमूले स्युः। अवश्यं हि तत्र केनचित् साधारणशब्दप्रयोगेण भवितव्यम् । अथ सति श्लिष्टशब्दप्रयोगे वक्त्रौचित्याद्यर्थशक्तिमाश्रित्योभयशक्तिमूलत्वमत्र वर्ण्यते, तद्यज्यत एतत् । किंतु 'पंथिअ—' इत्याद्युभयशक्तिमूलस्यैवोदाहरणं वाच्यम्, अर्थशक्तेरपि व्यापारात् । अन्यथा केवलशब्दशक्तेर्वस्तुमात्रं ध्वन्यं न स्यात् । अनेनव आशयेन शब्दशक्तिमूलं वस्तुध्वनिं ध्वनिकृत् नाङ्गीकृतवान् इत्युक्तप्रायम् ॥—*Op. cit.*, p. 36.

TEXT

§३७। अर्थशक्त्युद्भवस्त्वन्यो यत्रार्थः स प्रकाशते।
यस्तात्पर्येण वस्त्वन्यद् व्यनक्त्युक्तिं विना स्वतः ॥२२॥

यत्रार्थः स्वसामर्थ्यादर्थान्तरमभिव्यनक्ति शब्दव्यापारं विनैव सोऽर्थशक्त्युद्भवो नामानुस्वानोपमव्यङ्ग्यो ध्वनिः। यथा—

एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥

अत्र हि लीलाकमलपत्रगणनमुपसर्जनीकृतस्वरूपं शब्दव्यापारं विनैवार्थान्तरं व्यभिचारिभावलक्षणं प्रकाशयति। न चायमलक्ष्यक्रमव्यङ्ग्यस्यैव ध्वनेर्विषयः। यतो यत्र साक्षाच्छब्दनिवेदितेभ्यो विभावानुभावव्यभिचारिभ्यो रसादीनां प्रतीतिः, स तस्य केवलस्य मार्गः। यथा कुमारसंभवे मधुप्रसंगे वसन्त-

पुष्पाभरणं वहन्त्या देव्या आगमनादिवर्णनं मनोभवशरसंधान-पर्यन्तं शम्भोश्च परिवृत्तधैर्यस्य चेष्टाविशेषवर्णनादि साक्षाच्छब्दनिवेदितम्। इह तु सामर्थ्याक्षिप्तव्यभिचारिमुखेन रस-प्रतीतिः। तस्मादयमन्यो ध्वनेः प्रकारः।

यत्र च शब्दव्यापारसहायोऽर्थोऽर्थान्तरस्य व्यञ्जकत्वेन उपादीयते स नास्य ध्वनेर्विषयः। यथा—

संकेतकालमनसं विटं ज्ञात्वा विदग्धया।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्॥

अत्र लीलापद्मनिमीलनस्य व्यञ्जकत्वमुक्त्यैव निवेदितम्॥

EXPOSITION

§ 37. Ānandavardhana now takes up the other variety of संलक्ष्यक्रमध्वनि based on *material significance* (अर्थशक्ति). In the case of अर्थशक्तिमूलध्वनि it is the *matter* that is more important than the words expressive of it. In शब्दशक्ति° the change of the श्लिष्ट word would be accompanied by the absence of the suggested sense. But we must note one thing—viz. that in the case of *material suggestiveness* (अर्थशक्तिमूल-ध्वनि), a knowledge of प्रकरण, वक्तृ, बोद्धव्य etc. besides that of the *matter* itself is *absolutely necessary* for the comprehension of the suggested sense. As Mammaṭa notes :—

"वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसंनिधेः
प्रस्तावदेशकालादेर्वैशिष्ट्यात् प्रतिभाजुषाम्।
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा॥"—*Op. cit.*, III.1-2

As Abhinavagupta observes later on in ommenting on 'दृष्ट्या केशव—' as an example of उभयशक्तिमूलध्वनि—'शब्द-शक्तिस्तावद् गोपरागादिशब्दश्लेषवशात्। अर्थशक्तिस्तु प्रकरण-वशात्। यावदत्र राधारमणस्य अखिलतरुणीजनच्छन्नानुरागगरिमा-स्पदत्वं न विदितं तावदर्थान्तरस्याप्रतातेः॥'—°*Locana*, pp. 253-

254. Rūyyaka, too, follows Abhinavagupta in distinguishing between the two divisions. *Vide* his remarks on उभयशक्ति-मूलध्वनि in the extracts quoted above.

'अर्थशक्त्युद्भव : . . .स्वत:'—Comp. °*Locana* : "एवं शब्दशक्त्युद्-भवं ध्वनिमुक्त्वाऽर्थशक्त्युद्‌भवं दर्शयति—अर्थेति । अन्य इति शब्दशक्त्युद्‌भवात् । स्वतस्तात्पर्येणेत्यभिधाव्यापारनिराकरणपरमिदं पदं ध्वननव्यापारमाह, नतु तात्पर्यशक्तिम् । सा हि वाच्यार्थ-प्रतीतावेवोपक्षीणा इत्युक्तं प्राक् । अनेनैवाशयेन वृत्तौ व्याचष्ट—यत्रार्थः स्वसामर्थ्यात् इति । स्वत इति शब्दः स्वशब्देन व्याख्यातः । उक्तिं विनेति व्याचष्टे—शब्दव्यापारं विनैवेति ॥"—*Op. cit.*, pp. 247-48. The suggested sense thus based on *material significance* (अर्थशक्ति) must not be *expressed* or *hinted at* by any particuiar word or words. We have already discussed this topic in a previous section.

यथा . . . . विषय:—Ānandavardhana cites the *Kumārasambhava* verse 'एवंवादिनि—' as an instance of अर्थशक्तिमूल-भावध्वनि of the संलक्ष्यक्रम type. Though रस, भाव etc. are generally classed as अक्रम, yet under certain circumstances they might be classed with वस्तु and अलंकार as falling within the domain of the संलक्ष्यक्रम category.

यतो . . . . ध्वनेः प्रकार: Where the विभाव's, अनुभाव's and व्यभिचारिभाव's, are clearly stated in all their details, the *emotion* suggested therefrom would be regarded as असंलक्ष्य-क्रमव्यङ्ग्य. But when the apprehension of the व्यभिचारिभाव or any of the constituent factors be delayed, the रस suggested, would be classed as संलक्ष्यक्रमव्यङ्ग्य. Compare °*Locana* :—

"साक्षादिति—व्यभिचारिणां यत्रालक्ष्यक्रमतया व्यवधिबन्ध्यैव प्रतिपत्तिः स्वविभावादिबलात्, तत्र साक्षात् शब्दनिवेदितत्वं विव-क्षितम् इति न पूर्वापरविरोधः । पूर्वं हि उक्तम् व्यभिचारिणामपि

भावत्वान्न स्वशब्दतः प्रतिपत्तिरित्यादि विस्तरतः। एतदुक्तं भवति—यद्यपि रसभावादिरर्थो ध्वन्यमान एव न वाच्यः कदाचिदपि तथापि न सर्वोऽलक्ष्यक्रमस्य विषयः। यत्र हि विभावानुभावेभ्यः स्थायिगतेभ्योः व्यभिचारिगतेभ्यश्च पूर्णेभ्यो झटित्येव रसव्यक्ति-स्तत्रास्त्वलक्ष्यक्रमः। यथा—

'निर्वाणभूयिष्ठमथास्य वीर्यं सन्धुक्षयन्तीव वपुर्गुणेन।
अनुप्रयाता वनदेवताभिरदृश्यत स्थावरराजकन्या॥'

—इत्यादौ सम्पूर्णालम्बनोद्दीपनविभावतायोग्यस्वभाववर्णनम्।

'प्रतिग्रहीतुं प्रणयिप्रियत्वात् त्रिलोचनस्तामुपचक्रमे च।
संमोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम्॥'

—इत्यनेन विभावतोपयोग उक्तः।

'हरस्तु किंचित् परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि॥'

—अत्र हि भगवत्याः प्रथममेव तत्प्रवणत्वात तस्य चेदानीं तदुन्मुखी-भूतत्वात् प्रणयिप्रियतया च पक्षपातस्य सूचितस्य गाढीभवद्रत्या-त्मनः स्थायिभावस्य औत्सुक्यावेगचापल्यहर्षादेश्च व्यभिचारिणः साधारणीभूतोऽनुभाववर्गः प्रकाशित इति विभावानुभावचर्वणैव व्यभिचारिचर्वणायां पर्यवस्यति। व्यभिचारिणां पारतन्त्र्यादेव स्रक्-सूत्रकल्पस्थायिचर्वणाविश्रान्तेरलक्ष्यक्रमत्वम्। इह तु पद्मदलगणन-मधोमुखत्वं च अन्यथाऽपि कुमारीणां सम्भाव्यते इति झटिति न लज्जायां विश्रमयति हृदयं, अपि तु प्रागवृत्ततपश्चर्यादिवृत्तान्तानु-स्मरणेन तत्र प्रतिपत्तिं करोति—इति क्रमव्यङ्ग्यतैव। रसस्त्वत्रापि दूरत एव व्यभिचारिस्वरूपे पर्यालोच्यमाने भातीति तदपेक्षयाऽलक्ष्य-क्रमतैव। लज्जापेक्षया तु तत्र लक्ष्यक्रमत्वम्। अमुमेव भावमेव-शब्दः केवलशब्दश्च सूचयति॥"—*Op. cit.*, pp. 248-49.

अत्र च....उक्तयैव निवेदितम्—In the verse 'सङ्केतकाल-

मनसम्—'[1] the sense suggested by the act of closing the lotus-petals–viz. the time of assignment of the lovers after sunset, has been hinted at by the expression 'संकेतकालमनसं विटं—' and as such it cannot be regarded as a case of अर्थशक्तिमूलवस्तुध्वनि. Comp. °*Locana*: उक्तिं विना-इति यदुक्तं तद्व्यवच्छेदं दर्शयितुमुपक्रमते—यत्र चेति। च-शब्दस्तुशब्दस्यार्थे। अस्येति। अलक्ष्यक्रमस्तु तत्रापि स्यादेवेति शेषः। उक्त्यैवेति। आद्यपादत्रयेण इत्यर्थः। यद्यपि चात्र शब्दान्तरसंनिधानेऽपि प्रदोषार्थं प्रति न कस्यचिदभिधाशक्तिः पदस्येति व्यञ्जकत्वं न विघटितं तथापि शब्देनैव उक्तम् अयमर्थोऽर्थान्तरस्य व्यञ्जक इति। ततश्च ध्वनेर्यद् गोप्यमानतोदितचारुत्वात्मकं प्राणितं तदपहस्तितम्। यथा कश्चिदाह—'गम्भीरोऽहं न मे कृत्यं कोऽपि वेद न सूचितम्। किंचिद् ब्रवीमि'- इति। तेन गम्भीर्यसूचनार्थः प्रत्युत आविष्कृत एव। अत एवाह- व्यञ्जकत्वमिति उक्त्यैवेति च॥—*Op. cit.*, pp. 250-51. *See* also Jagannātha's remarks in his *Rasagaṅgādhara*, pp. 250-51, where the verse has been cited.

TEXT

§ ३८। तथा च—

शब्दार्थशक्त्याक्षिप्तोऽपि व्यङ्ग्योऽर्थः कविना पुनः।
यत्राविष्क्रियते स्वोक्त्या साऽन्यैवालंकृतिर्ध्वनेः॥२३॥

शब्दशक्त्याऽर्थशक्त्या शब्दार्थशक्त्या वाक्षिप्तोऽपि व्यङ्ग्योऽर्थः कविना पुनर्यत्र स्वोक्त्या प्रकाशीक्रियते सोऽस्मादनु-

---

1. The verse has been cited as an instance of the figure of speech सूक्ष्म in the *Kāvyaprakāśa*, Ullāsa X. Compare: 'अत्र नेत्रोत्साहरूपेणेङ्गितेन लक्षितः कामिनः संकेतकालाभिलाषः कामिन्या निशासूचकेन पद्मसंमीलनेन लीलया प्रकाशितः'—Govinda Ṭhakkura's °*Pradipa*.

स्वानोपमव्यङ्ग्याद् ध्वनेरन्य एवालंकारः। अलक्ष्यक्रमव्यङ्ग्यस्य वा ध्वनेः सति संभवे स तादृगन्योऽलंकारः॥ तत्र शब्दशक्त्या यथा—

वत्से ! मा गा विषादं श्वसनमुरुजवं सन्त्यजोर्ध्वप्रवृत्तं
कम्पः को वा गुरुस्ते भवतु बलभिदा जृम्भितेनात्र याहि ।
प्रत्याख्यानं सुराणामिति भयशमनच्छद्मना कारयित्वा
यस्मै लक्ष्मीमदाद् वः स दहतु दुरितं मन्थमूढां पयोधिः॥

अर्थशक्त्या यथा—

अम्बा शेतेऽत्र वृद्धा परिणतवयसामग्रणीरत्र तातो
निःशेषागारकर्मश्रमशिथिलतनुः कुम्भदासी तथाऽत्र ।
अस्मिन् पापाहमेका कतिपयदिवसप्रोषितप्राणनाथा
पान्थायेत्थं तरुण्या कथितमवसरव्याहृतिव्याजपूर्वम् ॥

उभयशक्त्या यथा-'दृष्ट्या केशव—' इत्यादौ॥

EXPOSITION

§ 38. In the preceding sections the two divisions of संलक्ष्यक्रमव्यङ्ग्य—viz. शब्दशक्तिमूलध्वनि and अर्थशक्तिमूलध्वनि have been already defined and illustrated. And it had also been noted in that connection that *the suggested sense* should in no way be *stated* in words—which would take away its claim to be included in the domain of ध्वनि. In the present *Kārikā* the Dhvanikāra makes similar observation with regard to the third variety of संलक्ष्यक्रमध्वनि—viz. शब्दार्थोभयशक्तिमूलध्वनि, in which शब्द and अर्थ conjointly suggest a particular sense. Thus there *must* be one or more श्लिष्ट words besides others that are not so (*see* Abhinavagupta's remarks already quoted), in a case of उभयशक्तिमूलध्वनि. So it is *a priori* evident that the *unit* of उभयशक्तिमूलध्वनि must be *a sentence* or *a compound* expression, consisting of more than one component, some of which must be श्लिष्ट

and consequently *irreplaceable* (परिवृत्त्यसह) by synonyms. As Govinda observes in his commentary on the verse—'अतन्द्रचन्द्राभरणा—' cited by Mammaṭa as an illustration of उभयशक्तिमूलध्वनि : "अत्र श्यामारूप-कामिनीविशेष-रजन्योरुपमा व्यङ्ग्या । सा च अतन्द्रचन्द्रेत्यादेः परिवृत्त्यसहतया, समुद्दीपितेत्यादेस्तत्सहतया उ यस्यापि व्यञ्जकत्वेन शब्दार्थोभयशक्तिमूला ।।"[1]—°*Pradipa*, p. 10?.[2] Hemacandra in his *Kāvyānuśāsana*, however, does not record उभयशक्तिमूल as a separate variety at all and includes it under शब्दशक्तिमूलध्वनि itself. He quotes 'अतन्द्रचन्द्राभरणा—' as an instance of शब्दशक्तिमूलालंकारध्वनि. Compare : अत्र शब्दशक्त्या रात्रियोषितोरुपमा व्यङ्ग्या । यद्यपि समुद्दीपितेति सानन्दमिति चार्थो व्यञ्जकस्तथापि न शब्दशक्तिं विनाऽर्थशक्तिरुन्मीलतीति शब्दक्तिरेव प्रधानम् ।।—*Op. cit.*, p.

1. वाक्ये द्व्युत्थ :—*K.P.*, IV. 19.

2. The following extract from °प्रभा, a gloss on °प्रदीप by Vaidyanātha Tatsat, is important : उभयस्यापीति प्राधान्येनेति शेषः । तेन शब्दशक्तिमूलेऽप्यर्थस्य व्यञ्जकत्वेऽपि तस्य प्राधान्याभावात् नोभयशक्तिमूलत्वम् । परिवृत्त्यसहशब्दप्राचुर्ये च शब्दशक्तिप्राधान्यम् परिवृत्तिसहशब्दप्राचुर्ये त्वर्थशक्तिप्राधान्यम्. तत्साम्ये तूभयशक्तिप्राधान्यादुभयशक्तिमूलत्वं व्यपदिश्यते । अतएव, 'पन्थिअ ण एत्थ—' इत्यादौ उपभोगक्षमोऽसि चेदास्वेत्यादिवस्तुव्यञ्जने सत्थर-पओहरशब्दयोरेव परिवृत्त्यसहयोः प्राधान्यम्, न तु पथिकाद्यर्थस्येति न तत्र उभयशक्तिमूलवस्तुध्वनिः । किं तु उदाहरणजातीयेषु अलंकारध्वनिरित्येक इत्युक्तम्—*loc. cit.* We should note that according to Mammaṭa's view अलकार *alone* can be suggested *conjointly* by शब्द and अर्थ, and not वस्तु. As he states : 'शब्दार्थोभयभूरेकः—', IV. 18. But this view is contrary to the position of Rūyyaka and Dhvanikāra as well, who includes वस्तुध्वनि too as one of the varieties of अर्थशक्तिमूलध्वनि. See Rūyyaka's statements cited above.

42. Māṇikyacandra in his *Saṁketa* on *Kāvyaprakāśa* follows Hemacandra. As he notes : अत्र चातन्द्रचन्द्रादिशब्दानामेकनैकार्थानाम् परावृत्तिसहासहत्वेन क्रमेण अर्थशब्दशक्तिप्राधान्यम्, तेनोभयमूलत्वम् । तथाऽत्र यद्यपि अर्थोऽपि व्यञ्जकस्तथापि श्लिष्टशब्दशक्तिरेव व्यङ्ग्यमुन्मीलयति नार्थशक्तिरिति शब्दोत्थध्वनिरेव न द्व्युत्थ इति तत्त्वम् ।।—*Op, cit.*, p. 119.

Jagannātha very ably summarises the different views in the following passage of the *Rasagaṅgādhara* : यद्यपि शब्दशक्तिमूलकत्व अर्थशक्तिमूलकत्वं चेत्युभयमपि सकलव्यङ्ग्यसाधारणम्, शब्दार्थयोरनुसंधानं विना व्यङ्ग्यस्यैवानुल्लासात्, तथापि परिवृत्त्यसहिष्णूनां शब्दानां प्राचुर्ये तत्प्रयुक्तात् प्राधान्यात् सत्या अप्यर्थशक्तेरप्राधान्याच्च व्यङ्ग्यस्य शब्दशक्तिमूलकत्वेनैव व्यपदेशः । परिवृत्तिसहिष्णूनां तु प्राचुर्येऽर्थशक्तेरेव प्राधान्यात् सत्या अपि शब्दशक्तेः प्रधानानुगुण्यार्थतया मल्लग्रामादिवत् प्रधानेनैव व्यपदेशः । यत्र तु काव्ये परिवृत्तिं सहमानानामसहमानाञ्च शब्दानां नैकजातीयप्राचुर्यम्, अपि तु साम्यमेव, तत्र शब्दार्थोभयशक्तिमूलकस्य व्यङ्ग्यस्य स्थितिरिति द्व्युत्थो ध्वनिः । न चायं शब्दशक्तिमूलकतयैव अर्थशक्तिमुलकतयैव वा व्यपदेष्टुं शक्यः, विनिगमकाभावात् । नापि शब्दशक्तिमूलकार्थशक्तिमूलकयोः संकरेण गतार्थयितुम्, व्यङ्ग्यभेद एव संकरस्येष्टेः; इह तु व्यङ्ग्यस्यैक्येन तस्यानुत्थानात् ।....अयं च वाक्यमात्रे । पदसमूहश्च वाक्यम् । तेनास्य नानार्थानानार्थघटितसमासविषयत्वेऽपि न विरोधः ।[1] न तु शुद्धैकपदे, तस्मिन् नानार्थानानार्थयोरसमावेशात् । अन्ये तु—'अर्थशक्तिमूलकत्वव्यपदेशे नानार्थप्रकाशकशब्दशक्त्युल्लास्यत्वसामान्यशून्यत्वं तन्त्रम्, विषयप्राचुर्यात् । शब्दशक्ति-

1. तस्यापि अवान्तरपदत्वमादाय पदसमूहत्वादिति भावः—Nāgoji Bhaṭṭa's gloss.

मूलकत्वव्यपदेशो तु नार्थशक्त्युल्लास्यत्वसामान्यशून्यत्वं तथा ; विषयदौर्लभ्यापत्तेः । न हि नानार्थशब्दमात्रघटितं पद्यं प्रचुरविषयम् । अतः शब्दशक्तिमूलकत्वेनैवायं शक्यव्यपदेशो ध्वनिः—इत्यप्याहुः । —*Op. cit.*, pp. 172-174.

शब्दशक्त्या....अलंकारः—When the sense suggested through शब्दशक्ति, अर्थशक्ति or उभयशक्ति, is again *expressed* in words, it is reduced to a mere poetic figure from the status of ध्वनि. Or, if there be any असंलक्ष्यक्रमध्वनि—like रस, भाव etc. besides the suggested sense in question, the latter becomes a sort of embellishment somewhat different from the common poetic figures, and enhances the effect of the former (viz. रस, भाव etc.). Ānandavardhana has noted these two alternative interpretations of the present *Kārikā*. In the first case ध्वनेः must be in the *ablative* case, in the second it is in the *genitive*. Compare °*Locana* : प्रकान्तप्रकारद्वयोपसंहारं तृतीयप्रकारसूचनं चैकेनैव यत्नेन करोमीत्याशयेन साधारणमवतरणपदं प्रक्षिपति वृत्तिकृत्—**तथा चेति**। तेन चोक्तप्रकारद्वयेनायमपि तृतीयः प्रकारो मन्तव्य इत्यर्थः। शब्दार्थौ चेत्येकशेषः। **साऽन्यैवेति**। न ध्वनिरसौ, अपि तु श्लेषादिलंकार इत्यर्थः। अथवा ध्वनिशब्देन अलक्ष्यक्रमः तस्य अलंकार्यस्याङ्गिनः स व्यङ्ग्योऽर्थोऽन्यो वाच्यमात्रालंकारापेक्षया द्वितीयो लोकोत्तरश्चालंकार इत्यर्थः। एवमेव वृत्तौ द्विधा व्याख्यास्यति ॥—*Op. cit.*, pp. 251-52.

वत्से.....पयोधिः—°*Locana* explains the verse as follows : विषमत्तीति विषादः। **ऊर्ध्वप्रवृत्तम्** अग्निमित्यत्र चार्थो मन्तव्यः। कम्पोऽपां पतिः को ब्रह्मा वा तव गुरुः। **बलभिदा** इन्द्रेण **जृम्भितेन** ऐश्वर्यमदमत्तेनेत्यर्थः। जृम्भितं चात्र गात्रसंमर्दनात्मकं बलं भिनत्ति आयासकारित्वात्। प्रत्याख्यानमिति वचसे-

वात्र द्वितीयोऽर्थोऽभिधीयत इति निवेदितम्। कारयित्वेति। सा हि कमला पुण्डरीकाक्षमेव हृदये निधायोत्थितेति स्वयमेव देवान्तराणां प्रत्याख्यानं करोति। स्वभावसुकुमारतया तु मन्दरान्दोलितजलधितरङ्गभङ्गपर्याकुलीकृतां तेन प्रतिबोधयता तत्समर्थाचरणम् अन्यत्र दोषोद्घाटनेन अत्र याहीति चाभिनयविशेषेण सकलगुणादरदर्शकेण कृतम्। अत एव मन्थमूढामित्याह। इत्युक्तप्रकरेण भयनिवारणव्याजेन सुराणां प्रत्याख्यानं मन्थमूढां लक्ष्मीं कारयित्वा पयोधिर्यस्मै तामदात् स वो युस्माकं दुरितं दहत्विति संबन्धः—*Op. cit.*, pp. 252-53.

'अम्बा....व्याजपूर्वम्'—व्याजशब्दोऽत्र स्वोक्तिः -*Locana.*

'दृष्टया....चिरम्'—सलेशमिति चात्र स्वोक्तिः—*Locana.*

TEXT

§ ३९। प्रौढोक्तिमात्रनिष्पन्नशरीरः सम्भवी स्वतः
अर्थोऽपि द्विविधो ज्ञेयो वस्तुनोऽन्यस्य दीपकः ॥२४॥

अर्थशक्त्युद्भवानुरणनरूपव्यङ्ग्ये ध्वनौ यो व्यञ्जकोऽर्थ उक्तस्तस्यापि द्वौ प्रकारौ—कवेः कविनिबद्धस्य वा वक्तुः प्रौढोक्तिमात्रनिष्पन्नशरीर एकः, स्वतःसम्भवी च द्वितीयः॥ कविप्रौढोक्तिमात्रनिष्पन्नशरीरो यथा—

सज्जेइ सुरहिमासो ण दाव अप्पेइ जुअइजणलक्खमुहे।
अहिणवसहआरमुहे णवपल्लवपत्तले अणङ्गस्स शरे॥

कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरो यथोदाहृतमेव-'शिखरिणि—' इत्यादि। यथा वा—

साअरविइण्णजोव्वणहत्थावलम्बं समुण्णमन्तेहिं।
अब्भुट्ठाणं विअ मम्महस्स दिण्णं तुह थणेहिं॥

स्वतःसम्भवी य औचित्येन बहिरपि सम्भाव्यमानसद्भावो न

केवलं भणितिवशेनैवाभिनिष्पन्नशरीरः। यथोदाहृतम्—'एवं-वादिनि—' इत्यादि। यथा वा—

सिहिपिञ्छकण्णपूरा जाआ वाहस्य गव्विरी भमइ।
मुत्ताफलरइअपसाहणाणँ मज्झे सवत्तीणं॥

EXPOSITION

§ 39. Ānandavardhana classifies *suggestion based on material significance* (अर्थशक्तिमूलध्वनि) into *three* categories according as the *matter* (अर्थ) concerned is objectively possible (स्वतःसम्भवी) or invented by the poet's own imaginative faculty (कविप्रौढोक्तिनिष्पन्न) or again brought into being not by the poet's fancy but by the imagination of some one among the characters created by the poet—the creatures of the poet's Muse (कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्न). Mammaṭa follows the Dhvanikāra without trying to justify the plausibility of the above classification. See *Kāvyaprakāśa,* IV. 16-17. But Hemacandra in his *Kāvyānuśāsana* contends that this classification is unnecessary and incongruous inasmuch as the three above mentioned varieties have the essential property of being the outcome of poetic fancy common to all of them. Even matters that are objectively real *per se* cannot find place in a true poetic art if they are not transfigured by the poet's imagination. As he remarks : "इह चार्थः स्वतःसंभवी, कवि-प्रौढोक्तिमात्रनिष्पन्नशरीरः, कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्न-शरीरो वा—इति भेदकथनं न न्याय्यम्। कविप्रौढोक्तिमात्रनिर्मित-त्वेनैव साध्यसिद्धेः। प्रौढोक्तिमन्तरेण स्वतःसंभविनोऽपि अकिं-चित्करत्वात्। कविप्रौढोक्तिरेव च कविनिबद्धवक्तृप्रौढोक्तिरिति किं प्रपञ्चेन"—*Op. cit.*, p. 46. Māṇikyacandra in his *Saṁketa* follows Hemacandra. Jagannātha in his *Rasagaṅgādhara* criticises the threefold classification, though he recognises the first variety—viz. स्वतःसंभवी. According to him the last

two varieties should be really classed under one single head. Compare his remarks: प्रतिभानिर्मितत्वाविशेषाच्च कवि-तदुम्भितवक्तृ-प्रौढोक्तिनिष्पन्नयोरर्थयोः न पृथग्गणनोचिता. उम्भितोम्भितादेरपि भेदान्तरप्रयोजकनापत्तेः । न च तस्यापि कव्युम्भितत्वानपायात् तत्प्रयोज्यभेदान्तर्गतत्वमेवेति वाच्यम् । प्रथमोम्भितस्यापि लोकोत्तरवर्णनानिपुणत्वलक्षणकवित्वानापायात् पृथग्भेदप्रयोजकताऽनुपपत्तेः ।—*Op. cit.*, pp. 134. Nāgojī Bhaṭṭa, however, in his comments on the above text of the *Rasagaṅgādhara* upholds the view of the Dhvanikāra. As he observes :—

"वृद्धोक्तिविषयात् शिशूक्तिविषय इव कव्युक्तिविषयात् कविनिबद्धोक्तिविषये चमत्काराधिक्यानुभविकत्वात् पृथगुक्तिः । ततः परञ्च प्रतिनिधानसाध्यप्रतीतिकतया चमत्कारस्थगनात् नोम्भितोम्भितादेः पृथग्गणनेति तु नव्याः ।।—*loc. cit.* The following observations of Rūyyaka in his *Kāvyaprakāśa-saṁketa* in this connection are important and worth perusal: "ननु स्वतःसंभविप्रभृतयो यदि व्यञ्जकार्थगतत्वेन भेदा उच्यन्ते तत् केवलयोर्वाच्यलक्ष्ययोरपि भेदत्वेन किमिति न कथ्यन्तेऽविशेषात् । अथ व्यञ्जनोपयोगितया तेषां भेदत्वं तर्हि व्यञ्जनस्योभयत्र दत्तपादत्वाद् व्यङ्ग्यार्थगतत्वेनापि किमिति नाभिधीयन्ते । उच्यते—निमित्ताभिप्रायेणोक्तत्वात् । व्यञ्जकत्वं हि तन्निमित्तं न व्यङ्ग्यत्वम् । तथाहि कश्चिदर्थः कविनिबद्धेन वक्त्रा प्रौढोक्त्या प्रतिपादित इति व्यञ्जको न कविप्रतिपादितो नापि स्वतःसंभवेन । यथा 'शिखरिणि क्वनु नाम'त्यादौ रागित्वमन्तरेण तस्यार्थस्य अवचनानर्हत्वात्, अर्थान्तरं प्रति व्यञ्जकत्वाभावाच्च । कश्चित्तु कविनिबद्धोक्तिमनपेक्ष्यैव कविप्रौढोक्तिप्रतिपादित इत्येव व्यञ्जको न स्वतःसंभवेन यथा 'सज्जइ सुरहिमासो—' इत्यादावुदाहृतो बहिःसंभवाभावे, न स्वतःसंभवी, नापि कविनिबद्धं वक्तारमपेक्षते, वक्तुरावेशाभावात् ।

कविप्रजापतिः प्रौढि-निर्मितत्वेन तु अर्थान्तरं व्यनक्ति। कश्चित् पुनर्बहिरपि भावात् स्वतःसंभवेन व्यञ्जको यथा 'एवंवादिनी'-त्यादौ स्वयंकृतप्रचुरं लोकव्यवहारे स्थितः, तथाविधश्च व्यञ्जकत्वेन प्रतीयते। लज्जा चात्र व्यभिचारिभूताऽपि विभावानुभावयोरति-चारुत्वेन प्रतीतिविश्रान्तिस्थानत्वात् प्रतिपाद्यमाना सती वस्तुत्वेन व्यवहृता, न भावत्वेन। तेनार्थशक्तिमूलस्य वस्तुध्वनेरिदमुदाहरणम्, नासंलक्ष्यक्रमस्य भावध्वनेः। तस्माद् व्यञ्जकस्यैवार्थस्य व्यञ्जने निमित्तत्वात् स्वतःसंभविप्रभृतयो भेदा उक्ताः, न व्यङ्ग्यार्थगतत्वे-नापीति ॥"—*Op. cit.*, pp. 31-32.

कविप्रौढोक्ति....अणङ्गस्य शरे—Abhinavagupta explains the *gāthā*: 'सज्जइ सुरहिमासो—' as follows: अत्र वसन्तश्चेतनाऽ-नङ्गस्य सखा सज्जयति केवलं, न तावदर्पयति-इत्येवंविधया समर्पयि-तव्यवस्त्वर्पणकुशलयोक्त्या सहकारोद्भेदिनी वसन्तदशा यत उक्ता अतो ध्वन्यमानं मन्मथोन्माथस्यारम्भं क्रमेण गाढगाढीभविष्यन्तं व्यनक्ति। अन्यथा 'वसन्ते सपल्लवसहकारोद्गम' इति वस्तुमात्रं न व्यञ्जकं स्यात्। एषा च कवेरेवोक्तिः प्रौढा ॥[1]—*Op. cit*, p. 255.

'कविनिबद्ध....इत्यादि'—The verse 'शिखरिणि—' has been already cited in the first Uddyota. 'अत्र लोहितं विम्बफलं शुको दशतीति न व्यञ्जकता काचित्। यदा तु कविनिबद्धस्य साभिला-षस्य तरुणस्य वक्तुरित्थं प्रौढोक्तिस्तदा व्यञ्जकत्वम्'—*ibid.*

---

1. Mahimabhaṭṭa thus establishes the inferential nature of the suggested sense: 'सज्जेइ—' इत्यत्र कविप्रौढोक्तिमात्रनिष्पन्न-शरीरे: सुरभिमास-संभवानाम् आविर्भूताभिनवपल्लवानाम् तरूणामचिरभावि-युवतिजनमदनोन्माददायित्वमनुमेयम्। तत्र च सहकार-सुरभिमास-मदनानां रूपकोपनिबन्धने शर-शरकार-धानुष्कतुल्यवृत्तान्तत्वे सति यदसम्पन्नसंपूर्ण-रूपतया संप्रति सहकाराणां शराणामिवानङ्गायाससमर्पणं स हेतुः। कन्दर्पो-द्दीपनसमर्थस्वभावसंपादनमेव च तेषां सुरभिमासेन कन्दर्पायाससमर्पणं नान्यदिति—*Op. cit.*, p. 451.

'साअर....थणेहिं'—See °*Locana* for an explaination of this Prakrit stanza : स्तनौ तावदिह प्रधानभूतौ ततोऽपि गौरवितः कामस्ताभ्यामभ्युत्थानेनोपचर्यते । यौवनं चानयोः परिचारकभावेन स्थितमित्येवंविधेन उक्तिवचित्र्येण त्वदीयस्तनावलोकनप्रवृद्धमन्मथावस्थः को न भवतीति भङ्ग्या स्वाभिप्रायध्वननं कृतम् । तव तारुण्येनोन्नतौ स्तनौ इति हि वचने न व्यञ्जकता ।'—p. 256.

'सिहिपिञ्छ......सवत्तीण'—Comp. °*Locana* : शिखिमात्रमारणमेव तदासक्तस्य कृत्यम् । अन्यासु तु आसक्तो हस्तिनोऽपि अमारयत् इति हि वचनेन उक्तमुत्तमसौभाग्यम् । रचितानि विविधभङ्गीभिः प्रसाधनानि इति तासां संभोगव्यग्रिमाभावात् तद्विरचनशिल्पकौशलमेव परमिति दौर्भाग्यातिशय इदानीमिति प्रकाशितम् । गर्वश्च बाल्याविवेकादिनाऽपि भवति इति नात्र स्वोक्तिसद्भावः शङ्क्यः । एष चार्थो यथा यथा वर्ण्यते, आस्तां वा वर्णना, बहिरपि यदि प्रत्यक्षादिनाऽवलोक्यते तथा तथा सौभाग्यातिशयं व्याधवध्वा द्योतयति ॥—p. 257. Thus the suggestiveness of a स्वतःसंभवी *matter* (वस्तु) is irrespective of any poetic description and imaginative remouiding, as the closing statement in the above extract from °*Locana* makes it sufficiently clear. *Vide* the observation of Mahimabhaṭṭa on this *gāthā* : "सिहिपिञ्छ—' इत्यत्र नवोढाया व्याधवध्वाः सपत्नीभ्यः सौभाग्यातिरेकोऽनुमेयः । तत्र चास्याः शिखिपिच्छकर्णपूराया अपि सगर्वं भ्रमणं हेतुः । यतोऽयमभिप्रायस्तस्याः—मयि सत्यामयं संभोगैकरसिको व्याधो वारितान्यकर्त्तव्यो दिवानिशं मत्परायण एव केवलं मद्विनोदार्थं यदृच्छयाऽन्तिकापतितमयूरमात्रमारणव्यापारो वर्त्तते इति शिखिपिच्छमात्रकर्णपूराऽहं जाता । भवतीषु सतीषु दूरदेशकालव्यवधानसाध्यमहारम्भमातङ्गमारणादिव्यापाररतिरयमासीदिति मुक्ताफलरचितप्रसाधना भवत्य इति । तेन यदेतत् सगर्वं भ्रमणं तदेव तस्याः सपत्नीभ्यः सौभाग्यातिरेकमनुमापयति इत्यवसेयम्" —*Op. cit.*, p. 452.

TEXT

§ ४०। अर्थशक्तेरलंकारो यत्राप्यन्यः प्रतीयते।
अनुस्वानोपमव्यङ्ग्यः स प्रकारोऽपरो ध्वनेः ॥२५॥

वाच्यालङ्कारव्यतिरिक्तो यत्रान्योऽलङ्कारोऽर्थसामर्थ्यात् प्रतीयमानोऽवभासते सोऽर्थशक्त्युद्भवो नामानुस्वानरूपव्यङ्ग्योऽन्यो ध्वनिः ॥

EXPOSITION

§ 40. In the illustrations already cited in the previous section dealing with the *two* (or *three*) divisions of अर्थशक्तिमूलध्वनि, the suggested sense was in the nature of a mere *fact* (वस्तुमात्र). In the present section the Dhvanikāra observes that there are cases of अर्थशक्तिमूलध्वनि where the content of suggestion is an अलंकार, as in the case of शब्दशक्तिमूलध्वनि already discussed in details. What more, in अर्थशक्तिमूलध्वनि, the *suggestive matter* (व्यञ्जकोऽर्थः) itself might be a mere fact (वस्तुमात्र) or an *'imaginative mood'* partaking of the characteristics of a distinct poetic figure (अलंकृत वस्तु). So, just as a वस्तु might give rise to the comprehension of some other वस्तु or अलंकार, so also a particular अलंकार might in its part similarly suggest both वस्तु aud अलंकार. Comp. *°Locana* : एवमर्थशक्त्युद्भवो द्विभेदो वस्तुमात्रस्य व्यञ्जनीयत्वे वस्तुध्वनिरूपतया निरूपितः। इदानीं तस्यैव अलंकाररूपे व्यञ्जनीयेऽलंकारध्वनित्वमपि भवति-इत्याह—अर्थेत्यादि। न केवलं शब्दशक्तेरलंकारः प्रतीयते पूर्वोक्तनीत्या यावदर्थशक्तेरपि। यदि वा न केवलं यत्र वस्तुमात्रं प्रतीयते यावदलंकारोऽपि इत्यपिशब्दार्थः। अन्यशब्दं व्याचष्टे—वाच्येति।"—*Op. cit.*, p. 257.

TEXT

§ ४१। तस्य प्रविरलविषयत्वमाशङ्क्येदमुच्यते—

रूपकादिरलंकारवर्गो यो वाच्यतां श्रितः।

स सर्वो गम्यमानत्वं बिभ्रद् भूम्ना प्रदर्शितः ॥२६॥

अन्यत्र वाच्यत्वेन प्रसिद्धो यो रूपकादिरलंकारः सोऽन्यत्र प्रतीयमानतया बाहुल्येन प्रदर्शितस्तत्रभवद्भिर्भट्टोद्भटादिभिः। तथा च ससंदेहादिषूपमारूपकातिशयोक्तीनां प्रकाशमानत्वं प्रदर्शितमित्यलंकारान्तरस्यालंकारान्तरे व्यङ्ग्यत्वं न यत्नप्रतिपाद्यम् ॥

EXPOSITION

§ 41. Poetic figures like उपमा, रूपक etc. are usually found as *expressed* (वाच्य), but they can also be *suggested* (व्यङ्ग्य). *See* notes on *Uddyota* I, Sec. §30 ff. Thus in the case of ससंदेह, उपमा is apprehended in the background through suggestion, and even ancient teachers like Bhāmaha, Udbhata etc. have noted this phenomenon and it is not very difficult to demonstrate either. As °*Locana* remarks : सर्व इति प्रदर्शित इति च पदेन असंभावनाऽत्र मिथ्यैवेत्याह।

उपमानेन तत्त्वं च भेदं च वदतः पुनः।

ससंदेहं वचः स्तुत्यै ससंदेहं विदुर्यथा ॥ इति ॥

'तस्याः पाणिरयं नु मारुतचलत्पत्राङ्गुलिः पल्लवः'— इत्यादौ उपमा रूपकं वा ध्वन्यते। अतिशयोक्तेश्च प्रायशः सर्वालंकारेषु ध्वन्यमानत्वम् ॥"—*Op. cit.*, p. 258.

TEXT

§ ४२। इयत् पुनरुच्यत एव—

अलङ्कारान्तरस्यापि प्रतीतौ यत्र भासते।

तत्परत्वं न वाच्यस्य नासौ मार्गो ध्वनेर्मतः ॥२७॥

अलंकारान्तरेषु त्वनुरणनरूपालङ्कारप्रतीतौ सत्यामपि यत्र वाच्यस्य व्यङ्ग्यप्रतिपादनौन्मुख्येन चारुत्वं न प्रकाशते नासौ ध्वनेर्मार्गः। तथा च दीपकादावलंकारे उपमाया गम्यमानत्वेऽपि तत्परत्वेन चारुत्वस्याव्यवस्थानान्न ध्वनिव्यपदेशः॥

EXPOSITION

§ 42. For instance, though in व्यतिरेक the apprehension of *similarity* lingers in the background, yet we would be wrong to regard it as an instance of उपमाध्वनि, for it is the *expressed contrast* that is more charming than the suggested similarity. Jagannātha in his *Rasagangādhara* has a very illuminating note on this point : ननु अस्य अलंकारस्य (viz. व्यतिरेकस्य) वैधर्म्यमूलस्योपमाप्रतिकूलत्वमेवोचितम्, न तूपमागर्भत्वम्। तस्याः साधर्म्यमूलकत्वात्। अस्य च तन्निषेधरूपेणैव प्रवृत्तेः। न चेष्टापत्तिः। सिद्धान्तभङ्गप्रसङ्गात्। सत्यम्। यद्गुणपुरस्कारेण यस्य यत्सादृश्यनिषेध उत्कर्षपर्यवसायी तस्य तद्गुणपुरस्कारेण तत्सादृश्यस्याप्रतिष्ठानेऽपि गुणान्तरेण सादृश्यप्रत्ययस्य दुर्वारत्वात्। यदि च तत्सादृश्यसामान्यनिषेधो विवक्षितः स्यात्, गुणविशेषपुरस्कारोऽनर्थकः स्यात्। धनेनायमस्मादधिक इत्युक्ते विद्यया रूपेण कुलेन च सम इति सर्वजनीनप्रत्ययात्। एवं च प्रतीयमानमपि सादृश्यं गुणान्तरकृतनिषधोत्थमपि तेनोत्कर्षेण हृतप्रभमिव बन्दीकृतमिव न चमत्कारविशेषमाधातुं प्रभवतीति प्राचामाशयः॥—*Op. cit.*, pp. 470-71. So also in the case of दीपक, रूपक etc. *Vide* notes on *Uddyota* I, Sec. §33.

TEXT

§ ४३। यथा—

चन्दमऊएहि णिसा णलिणी कमलेहि कुसुमगुच्छेहि लआ।
हंसेहि सरअसोहा कव्वकहा सज्जणेहि करइ गरुई॥

—इत्यादिषूपमागर्भत्वेऽपि सति वाच्यालंकारमुखेनैव चारुत्वं व्यवतिष्ठते, न व्यङ्ग्यालङ्कारतात्पर्येण। तस्मात् तत्र वाच्यालंकारमुखेनैव काव्यव्यपदेशो न्याय्यः ॥

EXPOSITION

§ 43. 'चन्दमऊएहि....गरुई'—Comp. °*Locana* : चन्द्रमयूखादीनां न निशादिना विना कोऽपि परभागलाभः। सज्जनानामपि काव्यकथां विना कीदृशी साधुजनता। चन्द्रमयूखैश्च निशाया गुरुकीकरणं भास्वरत्व-सेव्यत्वादि यत् क्रियते, कमलैर्नलिन्याः शोभापरिमल-लक्ष्म्यादि, कुसुमगुच्छैर्लताया अभिगम्यत्व-मनोहरत्वादि, हंसैः शारद-शोभायाः श्रुतिसुखकरत्वमनोहरत्वादि, तत् सर्वं काव्यकथायाः सज्जनैरित्येतावानयमर्थो गुरुः क्रियते इति दीपकबलाच्चकास्ति। कथाशब्द इदमाह—आसतां तावत् काव्यस्य केचन सूक्ष्मा विशेषाः, सज्जनैर्विना काव्यमित्येष शब्दोऽपि ध्वंसते। तेषु च सत्स्वास्ते सुभगं काव्यशब्दव्यपदेशभागपि शब्दसंदर्भमात्रम्। तथा तैः क्रियते यथादरणीयतां प्रतिपद्यत इति दीपकस्यैव प्राधान्यं नोपमायाः ॥—*Op. cit.*, p. 260. All this is re-iteration of what has been already discussed in the *Vṛtti* under *Kārikā*, I. 13.

TEXT

—§ ४४। यत्र तु व्यङ्ग्यपरत्वेनैव वाच्यस्य व्यवस्थानं तत्र व्यङ्ग्यमुखेनैव व्यपदेशो युक्तः। यथा—

प्राप्तश्रीरेष कस्मात् पुनरपि मयि तं मन्थखेदं विदध्या-
न्निद्रामप्यस्य पूर्वामनलसमनसो नैव सम्भावयामि।
सेतुं बध्नाति भूयः किमिति च सकलद्वीपनाथानुयात-
स्त्वय्यायाते वितर्कानिति दधत इवाभाति कम्पः पयोधेः ॥

यथा वा ममैव—

लावण्यकान्तिपरिपूरितदिङ्मुखेऽस्मिन्
स्मेरेऽधुना तव मुखे तरलायताक्षि !

क्षोभं यदेति न मनागपि तेन मन्ये
सुव्यक्तमेव जलराशिरयं पयोधिः ॥

एवंविधे विषयेऽनुरणरूप-रूपकाश्रयेण काव्यचारुत्वव्यवस्थानाद्रूपकध्वनिरिति व्यपदेशो न्याय्यः ॥

EXPOSITION

§ 44. Abhinavagupta explains रूपकध्वनि in the verse 'प्राप्तश्रीरेष—' as follows :— 'कस्मिंश्चिदनन्तबलसमुदायवति नरपतौ समुद्रपरिसरवर्त्तिनि पूर्णचन्द्रोदय-तदीयबलावगाहनादिना निमित्तेन पयोधेस्तावत् कम्पो जातः। सोऽनेन संदेहेन उत्प्रेक्ष्यत इति ससंदेहोत्प्रेक्षयोः संकरालंकारो वाच्यः। तेन च वासुदेवरूपता तस्य नृपतेर्ध्वन्यते। यद्यपि चात्र व्यतिरेको भाति, तथापि स पूर्वंवासुदेवस्वरूपात्, नाद्यतनात्। अद्यतनत्वे भगवतोऽपि प्राप्तश्रीकत्वेन अनालस्येन सकलद्वीपाधिपति-विजयित्वेन च वर्त्तमानत्वात्[1]। न च सन्देहोतप्रेक्षानुपपत्तिबलाद् रूपकस्याक्षेपः, येन वाच्यालंकारोपस्कारकत्वं व्यङ्ग्यस्य भवेत्। यो योऽसंप्राप्तलक्ष्मीको निर्व्याज-

---

1. Kuntaka, as appears from the *Re'sume* (Unmeṣa III) of the *Vakroktijīvita* prepared by Dr. De, cites the verse 'प्राप्तश्रीः—' as an instance of प्रतीयमानव्यतिरेक (*see* p. 208). Does Abhinavagupta here refer to this view of the author of the *Vakroktijīvita* ? In another place Abhinavagupta appears to echo Kuntaka's observations. For example, the following passage of the °*Locana* : तथा हि 'तटी तारं ताम्यति'-इत्यत्र तटशब्दस्य पुंस्त्व-नपुंसकत्वे अनादृत्य स्त्रीत्वमेवाश्रितं सहृदयैः 'स्त्रीति नामापि मधुरम्' इति कृत्वा (*Op. cit.*, p. 359)—is closely reminiscent of *Vakroktijīvita*, II. 22 : सति लिङ्गान्तरे यत्र स्त्रीलिङ्गं च प्रयुज्यते। शोभानिष्पत्तये यस्मिन् नामैव स्त्रीति पेशलम् ॥—and *Vṛtti* thereunder, in which the verse, of which तटी तारं ताम्यति is but a hemistich, is read in full.

विजिगीषाक्रान्तः स स मां मथ्नीयादित्याद्यर्थसंभावनात्। न च पुनरपीति भूय इति च शब्दैरयमाकृष्टोऽर्थः। पुनरर्थस्य भूयोऽर्थस्य च कर्तृभेदेऽपि समुद्रैक्यमात्रेणाप्युपपत्तेः। यथा पृथ्वी पूर्वं कार्त्तवीर्येण जिता पुनरपि जामदग्न्येनेति। पूर्वा निद्रा च सिद्धा राजपुत्राद्यवस्थायामपीति सिद्धं रूपकध्वनिरेवायमिति। शब्दव्यापारं विनैव अर्थसौन्दर्यबलाद्रूपणाप्रतिपत्तेः॥—*Op. cit.*, pp. 162-53. Jagannātha however criticises Ānandavardhana and holds that the poetic figure भ्रान्तिमान् is suggested here. The knowledge of identity (तादात्म्याध्यवसाय) between the king and Lord Viṣṇu brought about by a conscious act of volition (आहार्य), which forms the basis of the figure of speech रूपक, cannot produce the feeling of terror, which can be caused only by an *illusion of identity* (तादात्म्यभ्रान्ति) that is spontaneous (स्वारसिक) and as such requires no aid of *volition* at all. Besides, the knowledge of identity and the feeling of terror, standing to each other in the relation of cause and effect, must coinhere in the same substratum, which however is not the case in the present illustration, the former being in the poet and the latter in the ocean. Thus रूपकध्वनि is absurd. As Jagannātha observes :—

"आनन्दवर्धनाचार्यास्तु—'प्राप्तश्रीः—' इत्यत्र रूपकाश्रयेण काव्यचारुत्वव्यवस्थापनाद्रूपकध्वनिरित्याहुः। तच्चिन्त्यम्। अत्र च जलधिकम्पहेतुत्वेन विकल्पत्रयं कल्प्यते। तच्च प्रकृते राजविशेष्यिकां जलनिधिगतामनाहार्यविष्णुतादात्म्यज्ञानरूपां भ्रन्तिमेवाक्षिपति, न रूपकम्। तज्जीवातोराहार्यविष्णुतादात्म्यनिश्चयस्य कम्पाजनकत्वात्। कविजलधिगतत्वेन वैयधिकरण्याच्च। अज्ञातमेव केवलं विष्णुतादत्म्यं जलधेः कम्पेऽनुपयुक्तमेव। चमत्कारिण्यपि चात्र भ्रान्तिरेवेति ध्वनिरपि तस्या एव युक्तः॥"—*Op. cit.*, pp. 327-28.

Vide Mahimabhatta's remarks : " 'प्राप्तश्री:—'इत्यत्र लक्ष्मी-लाभलम्पटतया पयोनिधौ मन्थनव्यथावितरणं विलासालसतया योगनिद्रासुखास्वादो द्वीपान्तराधीशदशकन्धरनिधनधिया सेतुबन्धश्च इति भगवतो बासुदेवस्य अमी व्यापारा: प्रसिद्धा: सन्तो यदन्यत्र राजादौ आरोप्य तस्य समीहितप्राप्त्या निषिध्यन्ते तेन तत्कार्यत्वात् कारणभूतभगवद्रूपतारोपमेव तत्रानुमापयन्तीति पक्षानुमितिरिति व्यपदेश: प्रवर्त्तते ।।"—*Op. cit.*, p. 430.

'लावण्य ....पयोधि:'—Abhinavagupta explains the verse as follows : "लावण्यं संस्थानमुग्धिमा, कान्तिः प्र । ताभ्यां परिपूरितानि संविभक्तानि हृद्यानि संपादितानि दिङ्मुखानि येन । अधुना कोपकालुष्यात् अनन्तरं प्रसादौन्मुख्येन स्मेरे ईषद्विहसनशीले तरलायते प्रसादान्दोलनविकाससुन्दरे अक्षिणी यस्या: तस्या आमन्त्रणम् । अथ चाधुना न एति, वृत्ते तु क्षणान्तरे क्षोभमगमत् । कोपकषायपाटलं स्मेरं च तव मुखं सन्ध्यारुणपूर्णशशधरमण्डलमेवेति भाव्यं क्षोभेण चलचित्ततया सहृदयस्य । न चैति तत् सुव्यक्तमन्वर्थतयायं जलराशिर्जाड्यसंचय: । जलादय: शब्दा: भावार्थप्रधाना इत्युक्तं प्राक् । अत्र च क्षोभो मदनविकारात्मा सहृदयस्य त्वन्मुखावलोकनेन भवतीतीयत्यभिधाया विश्रान्ततया, रूपकं [illegible]मेव । वाच्यालंकारश्चात्र श्लेष: । स च न व्यञ्जक: । अनुरणनरूपं यद्रूपकमर्थशक्तिव्यङ्ग्यं तदाश्रयेणेह काव्यस्य चारुत्वं व्यवतिष्ठत । तैतस्तेनैव व्यपदेश इति संबन्ध: ।।"— *Op cit.*, pp. 263-64. For Mahimabhatta's observations see *Op. cit.*, p. 431.

TEXT

§ ४५ । उपमाध्वनिर्यथा—

वीराणं रमइ घुसिणरुणम्मिणतहा पिआत्थणुच्छङ्गे ।
दिट्ठी रिउगअकुम्भत्थलम्मि जह बहलसिन्दूरे ।।

यथा वा ममैव विषमवाणलीलायामसुरपराक्रमणे कामदेवस्य—

तं ताण सिरिसहोअरअणाहरणम्मि हिअअमेक्करसं ।
बिम्बाहरे पिआणं णिवेसिअं कुसुमबाणेण ॥

आक्षेपध्वनिर्यथा—

स वक्तुमखिलाञ् शक्तो हयग्रीवाश्रितान् गुणान् ।
योऽम्बुकुम्भैः परिच्छेदं ज्ञातुं शक्तो महोदधेः ॥

अत्रातिशयोक्त्या हयग्रीवगुणानामवर्णनीयताप्रतिपादनरूपस्यासाधारणतद्विशेषप्रकाशनपरस्याक्षेपस्य प्रकाशनम् ॥

EXPOSITION

§ 45. 'वीराणं....बहलसिन्दूरे'—°*Locana* thus explains the verse : प्रसाधितप्रियतमाश्वासनपरतया समनन्तरीभूतयुद्धत्वरितमनस्कतया च दोलायमानदृष्टित्वेऽपि युद्धे त्वरातिशय इति व्यतिरेको वाच्यालङ्कारः । तत्र तु येयं ध्वन्यमानोपमा प्रियाकुचकुड्मलाभ्यां सकलजनत्रासकरेष्वपि शात्रवेषु मर्दनोद्यतेषु गजकुम्भस्थलेषु तद्वशेन रतिमाददानामिव बहुमान इति सैव वीरतातिशयचमत्कारं विधत्ते इत्युपमायाः प्राधान्यम् ॥—*Op. cit.*, pp. 264-65.

'यथा....कुसुमवाणेन'—'असुरापरक्रमणे इति । त्रैलोक्यविजयो हि तत्रास्य वर्ण्यते। तेषामसुराणां पातालवासिनां यः पुनः पुनरिन्द्रपुरावमर्दनादि किं किं न कृतं तद्धृदयमिति यत्तेभ्योऽतिदुष्करेभ्योऽपि अकम्पनीयव्यवसायं तच्च । श्रीसहोदराणामत एव अनिर्वाच्योत्कर्षाणामित्यर्थः । तेषां रत्नानाम् आ समन्तात् हरणे एकरसं तत्परं यद् हृदयं तत् कुसुमवाणेन सुकुमारतरोपकरणसंभारेण प्रियाणां विम्बाधरे निवेशितम् , तदवलोकन-परिचुम्वन-दर्शनमात्रकृत्यताऽभिमानयोगि तेन कामदेवेन कृतम् । तेषां हृदयं तदत्यन्तं विजिगीषाज्वलनजाज्वल्यमानमभूदिति यावत् ! अत्रातिशयोक्तिर्वाच्यालंकारः । प्रतीयमाना चोपमा । सकलरत्नसारतुल्यो बिम्बाधर

इति हि तेषां बहुमानो वास्तव एव। अत एव न रूपकध्वनिः। रूपकस्यारोप्यमाणत्वेन अवास्तवत्वात्। तेषामसुराणां वस्तुवृत्त्यैव सादृश्यं स्फुरति। तदेव च सादृश्यं चमत्कारहेतुः प्राधान्येन ॥—*Op. cit.*, pp. 265–66. Thus, the above two verses are instances of अर्थशक्तिमूलोपमाध्वनि.

'स वक्तुम्....महोदधेः'—According to Ānandavardhana this verse illustrates आक्षेपध्वनि, because the *impossibility* of describing the innumerable qualities of Hayagrīva is suggested, from the apparent assertion to the contrary. As Abhinavagupta puts it: 'अवर्णनीयताप्रतिपादनमेवाक्षेपस्य रूपमिष्टप्रतिषेधात्मकत्वात्'. But Rūyyaka in his *Alaṁkāra-Sarvasva* criticises this view of the Dhvanikāra. He contends that *real negation* does not constitute आक्षेप. The *negation* must be *apparent* and *unreal*. But in the illustration cited by the Dhvanikāra the *suggested negation* of the possibility of description is *real*, and consequently he is erroneous. We quote the following extract from Rūyyaka's treatise :—

अयं चाक्षपो ध्वन्यमानोऽपि भवति। यथा—

'गणिकासु विधेयो न विश्वासो बल्लभ! त्वया।
किं किं न कुर्वतेऽनर्थमिमा धनपरायणाः ॥'

अत्र हि गणिकाया उक्तौ तद्दोषोक्तिप्रस्तावे नाहं गणिकेति प्रतीयते। न चासौ निषेध एव। गणिकात्वेनावस्थिततयैव गणिकात्वस्य निषेधनात्। सोऽयं प्रस्खलद्रूपो निषेधाभासरूपो वक्त्र्या गणिकायाः शुद्धस्नेहनिबन्धनत्वेन धनविमुखत्वादौ विशेषे पर्यवस्यति इत्युक्तविषय आक्षेपध्वनिरयम् ॥ ननु—'स वक्तुमखिलान् शक्तो—' इत्याक्षपध्वनावुदाहार्यम्। निषेधस्यैवात्र गम्यमानत्वात्। न निषेधाभासस्य। गुणानां वक्तुमशक्यत्व एवात्र तात्पर्यम्। तन्निमित्तक एवात्र चमत्कारो न निषेधाभासहेतुक इति नाक्षेपध्वनिधीरत्र कार्या।

सर्वथेष्टनिषेधाभासस्य विध्युन्मुखस्याक्षेपत्वमिति स्थितम् ।।"— *Op. cit.*, p. 119. But Jagannātha justifies the Dhvanikāra's view by controverting Rūyyaka's criticism. Comp. इत्थं स्वस्वाभिमानभेदादाक्षेपाणां भेदात्तद्ध्वनीनां स्थिते विवेके 'स वक्तुम् —' इति पद्यं ध्वनिकारैराक्षेपध्वनित्वेनोदाहृतं 'स्वाभिमताक्षेपानभिव्यक्तेरनुदाहरणमेवैतत्' इति निर्युक्तिकं वदन् अलंकारसर्वस्वकृत् परास्तः । न हि आभासरूप एव निषेध आक्षेप इत्यस्ति वेदस्याज्ञा । नापि प्राचामाचार्याणाम् । नचापि युक्तिः । येन ध्वनिकारोक्तमुपेक्ष्य त्वदुक्तं श्रद्दधीमहि । प्रत्युत वैपरीत्यमेवोचितम् । ध्वनिकृतामालंकारिकसरणिव्यवस्थापकत्वात् । न हि अस्मिन् शास्त्रे आक्षेपादिशब्दसंकेतग्राहकं प्रमाणान्तरमस्ति, ऋते प्राचीनवचनेभ्यः । अन्यथा सकलविपर्यासापत्तेः ।।—*Op. cit.*, pp. 567-68.

TEXT

§ ४६ । अर्थान्तरन्यासध्वनिः शब्दशक्तिमूलानुरणनरूपव्यङ्ग्योऽर्थशक्तिमूलानुरणरूपव्यङ्ग्यश्च संभवति । तत्राद्यस्योदाहरणम्—

देव्वाएत्तम्मि फले किं कीरइ एत्तिअं पुणा भणिमो ।
कङ्किल्लपल्लवाः पल्लवाणँ अण्णाणं ण सरिच्छा ।।

पदप्रकाशश्चायं ध्वनिरिति वाक्यस्यार्थान्तरतात्पर्येऽपि सति न विरोधः । द्वितीयस्योदाहरणं यथा—

हिअअट्ठाविअमण्णुं अवरुण्णमुहं हि मं पसाअन्त ।
अवरद्धस्स वि ण हु दे पहुजाणअ रोसिउं सक्कं ।।

अत्र हि वाच्यविशेषेण सापराधस्यापि बहुज्ञस्य कोपः कर्त्तुमशक्य इति समर्थकं सामान्यमन्वितमन्यत् तात्पर्येण प्रकाशते ।।

EXPOSITION

§ 46. अर्थान्तरन्यासध्वनिः........संभवति — Though शब्दशक्तिमूलध्वनि has been discussed in a previous context and

.e present section exclusively deals with अर्थशक्तिमूलध्वनि, Ānandavardhana has here a passing reference to शब्दशक्तिमूलार्थान्तरन्यासध्वनि. As Abhinavagupta remarks: 'संभवतीत्यनेन प्रसंगात् शब्दशक्तिमूलस्यात्र विचार इति दर्शयति।' —*Op. cit.*, p. 256.

'देव्वाएत्तम्मि......सरिच्छा'— Here the word फल is श्लिष्ट meaning *'fruit'* and *'reward'*. Cp. °*Locana* : "अशोकस्य फलमात्रादिवत् नास्ति, किं क्रियतां, पल्लवास्तु अतीव हृद्या इतीयताऽभिधा समाप्तैव। अत्र फलशब्दस्य शक्तिवशात् समर्थकमस्य वस्तुनः पूर्वमेव प्रतीयते—'लोकोत्तरजिगीषातदुपायप्रवृत्तस्यापि हि फलं संपल्लक्षणं दैवायत्तं कदाचित् न भवेदपि'— इत्येवंरूपं सामान्यात्मकम्।।" —*Op. cit.*, p. 267. Thus, the suggested sense—*viz.* that the *rewards* of our deeds depend upon the will of Providence is a *universal* (सामान्यात्मक) statement, and it supports the *expressed* idea—*viz.* that the Aśoka tree, though adorned with twigs (पल्लव) of exquisite loveliness, has no *fruits*[1], because Providence (दैव) has so ordained it. It is a case of पदप्रकाश्य शब्दशक्तिमूलध्वनि, because the substitution of another synonymous word for the single word फल which is श्लिष्ट, would fail to give rise to the cognition of the universal judgement noted above.

पदप्रकाशश्चायं........न विरोधः—Now, one might argue that the verse *as a whole* is an instance of अप्रस्तुतप्रशंसा based on सारूप्य where the statement of an अप्रस्तुत विशेष (*particular idea*) suggests a similar प्रस्तुत judgement. For example, the statement about अशोक suggests the idea of a person disappointed in his hopes endowed with merits as he is. Thus it should rather be a case of वाक्यप्रकाशध्वनि. To this

1. Compare: 'नाप्यशोके फलं स्यात्'—*Sāhityadarpaṇa*. X.

Ānandavardhana answers that the particular word फल suggests the figure of speech अर्थान्तरन्यास, while the verse as a whole suggests the universal proposition. So the factors or substrata of suggestion being different, there is no conflict between the two. Comp. °*Locana*: ननु अस्य सर्ववाक्यस्य अप्रस्तुतप्रशंसा प्राधान्येन व्यङ्ग्या, तत् कथमर्थान्तरन्यासस्य व्यङ्ग्यता, द्वयोर्युगपदेकत्र प्राधान्यायोगादित्याशङ्क्याह—पदप्रकाशेति। सर्वो हि ध्वनिप्रपञ्चः पदप्रकाशो वाक्यप्रकाशश्चेति वक्ष्यते। तत्र फलपदेऽर्थान्तरन्यासध्वनिः प्राधान्येन। वाक्ये तु अप्रस्तुतप्रशंसा। अत्रापि पुनः फलपदोपात्तसमर्थ्यसमर्थकभावप्राधान्यमेव भातीत्यर्थान्तरन्यासध्वनिरेवायमिति भावः ॥—*Op. cit.*, pp. 267-68.

'हिअअ........सक्क'—This is an instance of अर्थशक्तिमूल अर्थान्तरन्यासध्वनि. Comp. °*Locana*: हृदये स्थापितो न बहिः प्रकटितो मन्युर्यथा। अत एवाप्रदर्शितरोषमुखीमपि मां प्रसादयन् हे बहुज्ञ! अपराद्धस्यापि तव न खलु रोषकरणं शक्यम्। अत्र बहुज्ञेति आमन्त्रणार्थो विशेषे पर्यवसितः। अनन्तरं तु तदर्थपर्यालोचनाद् यत् सामान्यरूपं समर्थकं प्रतीयते तदेव चमत्कारकारि। सा हि खण्डिता सती वैदग्ध्यानुनीता तं प्रत्यसूयां दर्शयन्तीत्थमाह। यः कश्चिद् बहुज्ञो धूर्त्तः स एवं सापराधोऽपि स्वापराधावकाशमाच्छादयतीति मा त्वमात्मनि बहुमानं मिथ्या ग्रहीरिति ॥—*Op. cit.*, p. 268.

TEXT

§ ४७। व्यतिरेकध्वनिरप्युभयरूपः संभवति। तत्राद्यस्योदाहरणं प्राक् प्रदर्शितमेव। द्वितीयस्योदाहरणं यथा—

जाएज्ज वणुद्देसे खुज्जं व्विअ पाअवो गडिअवत्तो।
मा माणुसम्मि लोए ताएक्करसो दरिद्दो अ ॥

अत्र हि त्यागैकरसस्य दरिद्रस्य जन्मानभिनन्दनं त्रुटितपत्रकुब्जपादपजन्माभिनन्दनं च साक्षाच्छब्दवाच्यम्। तथाविधादपि पादपात् तादृशस्य पुंस उपमानोपयमेत्वप्रतीतिपूर्वकं शोच्यतायामाधिक्यं तात्पर्येण प्रकाशयति ॥

EXPOSITION

§ 47. तत्र......प्रदर्शितमेव—*Vide* the verses 'खं येऽत्युज्ज्वलयन्ति' and 'रक्तस्त्वम्—' for शब्दशक्तिमूलव्यतिरेकध्वनि. अत्र हि......प्रकाशयति—Ānandavardhana states that the *contrast* (व्यतिरेक) between a tree, gnarled and devoid of foliage and a generous and kind-hearted person in straitened circumstance is cognised in the wake of the *similarity* (सादृश्य) which is first apprehended, since, as has been noted before, व्यतिरेक must be based on औपम्य. Comp. °*Locana* : जायेय, वनोद्देशे एव वनस्यैकान्ते गहने यत्र स्फुटतरबहुवृक्षसंपत्त्या प्रेक्षतेऽपि न कश्चित्। कुब्ज इति रूपघटनादावनुपयोगी। **गलितपत्र** इति। छायामपि न करोति। तस्य का पुष्पफलवत्तेत्यभिप्रायः। तादृशोऽपि कदाचिदाङ्गारिकस्योपयोगी भवेत् उलूकादीनां वा निवासायेति भावः। **मानुष**-इति। सुलभार्थिजन इति भावः। लोक इति। यत्र लोक्यते सोऽर्थिभिस्तेन चार्थिजनो न च किञ्चित् शक्यते कर्तुं तन्महद् वैशसमिति भावः। अत्र वाच्यालंकारो न कश्चित्। उपमानेत्यनेन व्यतिरेकस्य मार्गपरिशुद्धिं करोति। **आधिक्यमिति**। व्यतिरेकमित्यर्थः॥—*Op. cit.*, pp. 269-270. *Vide Vyaktiviveka* : 'जाएज्ज—' इत्यत्र यथोक्तस्वरूपस्याप्रस्तुतस्यैव वनपादपस्य, पुंसश्च कस्यचिद् दरिद्रस्य प्रस्तुतस्य अनुपयोगितया निष्फलयोरुभयोरप्यभिनन्द्यजन्मताप्रतीतौ तुल्यायां यदेतदेकस्यैव जन्मानभिनन्दनं नेतरस्य तत् तस्य शोच्यतातिरेकलक्षणं व्यतिरेकमनुमापयतात्यस्य व्यतिरेकानुमिति-व्यपदेशसिद्धिः॥—*Op. cit.*, p. 437.

TEXT

§ ४८। उत्प्रेक्षाध्वनिर्यथा—

चन्दनासक्तभुजगनिःश्वासानिलमूर्च्छितः।
मूर्च्छयत्येष पथिकान् मधौ मलयमारुतः॥

अत्र हि मधौ मलयमारुतस्य पथिकमूर्च्छाकारित्वं मन्मथोन्माथदायित्वेनैव। तत्तु चन्दनासक्तभुजगनिःश्वासानिलमूर्च्छितत्वेनोत्प्रेक्षितमित्युत्प्रेक्षा साक्षादनुक्ताऽपि वाक्यार्थसामर्थ्याद् अनुरणनरूपा लक्ष्यते। न चैवंविधे विषय इवादिशब्दप्रयोगमन्तरेण असम्बद्धतैवेति शक्यते वक्तुम्। गमकत्वादन्यत्रापि तदप्रयोगे तदर्थावगतिदर्शनात्। यथा—

ईसाकलुसस्य वि तुह मुहस्स णं एस पुण्णिमाचन्दो।
अज्ज सरिसत्तणं पाविऊण अङ्गे विअ ण माइ॥

यथा वा—

त्रासाकुलः परिपतन् परितो निकेतान्
पुम्भिर्न कैश्चिदपि धन्विभिरन्वबन्धि।
तस्थौ तथापि न मृगः क्वचिदङ्गनाभि-
राकर्णपूर्णनयनेषु हतेक्षणश्रीः॥

शब्दार्थव्यवहारे च प्रसिद्धिरेव प्रमाणम्॥

EXPOSITION

§ 48. Here the expressed sense is coherent and complete in itself, even without the apprehension of उत्प्रेक्षा, if we take 'मूर्च्छितः' to mean *'swelled, increased'* (उपचित). But when the वाच्यार्थ has been understood, the idea of उत्प्रेक्षा in the form 'मूर्च्छित इव' where the root मुर्च्छ means *'to swoon away'* is suggested.[1] As Abhinavagupta remarks—"बिषपानेन हि मूर्च्छितो बृंहित उपचितो मोहं करोति। एकश्च मूर्च्छितः

---

1. 'मुर्च्छ मोहसमुच्छ्राययोः'—Dhātu-Pāṭha.

पथिकमध्येऽन्येषामपि धैर्यच्युतिं विदधन्मूर्च्छां करोति-इत्युभयथोत्-प्रेक्षा ॥"—Thus, it is a case of उत्प्रेक्षाध्वनि, and not of प्रतीयमानोत्प्रेक्षा, which should not be confounded with the former.[1] Viśvanātha distinguishes the two categories thus: प्रतीयमानोत्प्रेक्षा यथा—

'तन्वङ्ग्याः स्तनयुग्मेन मुखं न प्रकटीकृतम् ।
हाराय गुणिने स्थानं न दत्तमिति लज्जया ॥'

—अत्र लज्जयेवेतीवाद्यभावात् प्रतीयमानोत्प्रेक्षा । एवमन्यत् । ननु ध्वनिनिरूपणप्रस्तावेऽलंकाराणां सर्वेषामपि व्यङ्ग्यत्वं भवतीत्युक्तम् । संप्रति पुनर्विशिष्य कथमुत्प्रेक्षायाः प्रतीयमानत्वम् । उच्यते—व्यङ्ग्योत्प्रेक्षायां 'महिला-सहस्स—' इत्यादौ उत्प्रेक्षणं विनापि वाक्यविश्रान्तिः । इह तु स्तनयोर्लज्जाया असंभवात् लज्जयेवेत्युत्-प्रेक्षयैवेति व्यङ्ग्य-प्रतीयमानयोर्भेदः ॥'—*Sāhityadarpaṇa*, X.

न चैवंविधे....दर्शनात्—It cannot be argued that the non-mention of the particle इव is a defect here. Since even in a case of प्रतीयमानोत्प्रेक्षा (as distinguished from उत्प्रेक्षाध्वनि) the sense of उत्प्रेक्षा is understood even without इव. Ānanda-vardhana cites the verse 'ईसाकलुसस्स—' in support of his statement. For explanation *see* °*Locana*: "तस्यैवादेरप्रयोगेऽपि तस्यार्थस्येत्युत्प्रेक्षारूपस्यावगतेः प्रतीतेर्दर्शनात् । एतदेवोदाहरति—यथेति । ईर्ष्याकलुषस्यापीषदरूणच्छायाकस्य । यदि तु प्रसन्नस्य मुखस्य सादृश्यमुद्वहेत्, सर्वदा वा, तत् किं कुर्यात् त्वन्मुखं त्वेतद् भवतीति मनोरथानामपि अपथमिदमित्यपिशब्दस्याभिप्रायः । अङ्गे

---

1. Kuntaka, however, cites the verse 'चन्दनासक्त—' as an illustration of प्रतीयमानोत्प्रेक्षा, where particles such as इव etc. *expressive* of उत्प्रेक्षा, are understood. *Vide op. cit.*, Résumé (Unmeṣa III), p. 194.

स्वदेहे न मात्येव दश दिशः पूरयति यतः। अद्य इयता कालेन एकं दिवसमात्रमित्यर्थः। अत्र पूर्णचन्द्रेण दिशां पूरणं स्वरससिद्धमेव-मुत्प्रेक्ष्यते ॥"—*Op. cit*, p. 271.

यथा वा....प्रमाणम्—One might, however, contend that the particle णं (ननु) in the above verse signifies उत्प्रेक्षा and consequently it cannot prove the thesis that (उत्प्रेक्षा is apprehended even if इव etc. are suppressed. Anticipating such a possible objection the Dhvanikāra cites another illustration which is altogether devoid of particles *expressive* (वाचक) of उत्प्रेक्षा.

As Abhinavagupta puts it: "ननु ननु-शब्देन वितर्कोत्-प्रेक्षारूपमाचक्षाणेन असम्बद्धता निराकृतेति संभावयमान उदाहरणान्तर-माह—यथा वेति: परितः सर्वतो निकेतान् परिपतन्नाक्रमन्न कश्चिदपि चापपाणिभिरसौ मृगोऽनुबद्धस्तथाऽपि न क्वचित् तस्थौ त्रानचापलयोगात् स्वाभाविकादेव। तत्र चोत्प्रेक्षा ध्वन्यते—अङ्गनाभिराकर्णपूर्णैर्नेत्रशरैर्हृता ईक्षणश्रीः सर्वस्वभूता यस्य यतोऽतो न तस्थौ।"—*ibid*. Ānandavardhana appeals to the experience of the सहृदय's on this question of *verbal cognition* (शाब्दज्ञान). If the सहृदय's apprehend उत्प्रेक्षा even if इव etc. are absent, no logic can controvert this experience, which must be taken valid.[1] Mahimabhaṭṭa too reproduces this statement of Ānandavardhana where he reads प्रतीतिः for प्रसिद्धिः. Compare: "शब्दार्थव्यवहारे च प्रतीतिरेव प्रमाणम्। प्रतीतार्थ-श्चापि शब्दः प्रयुज्यमानः पौनरुक्त्यमेवावहतीति अत्रेवार्थस्य अवग-माद् उत्प्रेक्षानुमितिरित्येषा व्यपदिश्यते ॥"—*Op. cit.*, pp. 449-40.

---

1. Compare 'युक्त्या पर्यनुयुज्येत स्फुरन्ननुभवः कया'—Dharmakīrtti.

TEXT

§ ४९ । श्लेषध्वनिर्यथा—

रम्या इति प्राप्तवतीः पताकाः
रागं विविक्ता इति वर्धयन्तीः ।
यस्यामसेवन्त नमद्‌वलीकाः
समं वधूभिर्वलभीर्युवानः ॥

अत्र वधूभिः सह वलभीरसेवन्तेति वाक्यार्थप्रतीतेरनन्तरं वध्व इव वलभ्य इति श्लेषप्रतीतिरशब्दाऽप्यर्थसामर्थ्यान्मुख्यत्वेन विवर्त्तते ॥

EXPOSITION

§ 49. The word 'समम्' denotes *'similarity'* (तुल्यम्) as well as *'simultaneity'* (सह). When the expressed sense is cognised the second meaning of 'समम्'—*viz.* सह, is taken into account. But to सहृदय's, the first meaning is suggested thereafter, which leads to the apprehension of the *double entendre* in the adjuncts qualifying वलभीः—*viz.* रम्याः, पताकाः, प्राप्तवतीः etc. which now qualify the term वधू also, thus finally suggesting the apprehension of similarity between वधू and वलभी. Compare *°Locana* : पताका ध्वजपटान् प्राप्तवतीः । रम्या ति हेतोः । पताकाः प्रसिद्धीः प्राप्तवतीः । किमाकाराः प्रसिद्धीः, रम्या इत्येवमाकाराः । विविक्ताः जनसङ्कुलत्वाभावाद् इत्यतो हेतो रागं संभोगाभिलाषं वर्धयन्तीः । अन्ये तु रागं चित्रशोभामिति । तथा रागमनुरागं वर्धयन्तीः । यतो हेतोः विविक्ता विभक्ताङ्ग्यो लटभाः याः । नमन्ति वलीकानि छदिपर्यन्तभागा यासु । नमन्त्यो वलयस्त्रिवली-लक्षणा यासाम् । सममिति सहेत्यर्थः ॥ ननु सम-शब्दात् तुल्यार्थोऽपि प्रतीतः । सत्यम् । सोऽपि श्लेषवशात् । श्लेषश्च नाभिधावृत्तेराक्षिप्तः, अपि त्वर्थसौन्दर्यबलादेवेति सर्वथा ध्वन्यमान एव श्लेषः । अत एव वध्व इव वलभ्य

इत्यभिदधताऽपि वृत्तिकृतोपमाध्वनिरिति नोक्तम्। श्लेषस्यैवात्र मूलत्वात्। समा इति हि यदि स्पष्टं भवेत् तदोपमायां एव स्पष्टत्वाच् श्लेषस्तदाक्षिप्तः स्यात्। सममिति निपातोऽञ्जसा सहार्थवृत्तिर्व्यञ्जकत्वबलेनैव क्रियाविशेषणत्वेन शब्दश्लेषतामेति। न च तेन विनाऽभिधाया अपरिपुष्टता काचित्। अत एव समाप्तायामेवाभिधायां सहृदयैरेव स द्वितीयोऽर्थोऽपृथक्प्रयत्नेनैवावगम्यः। यथोक्तं प्राक्-'शब्दार्थ-शासनज्ञानमात्रेणैव'—इत्यादि। एतच्च सर्वोदाहरणेष्वनुसर्तव्यम्। 'पीनश्चैत्रो दिवा नात्ति'-इत्यत्राभिधैवापर्यवसिता इति सैव स्वार्थनिर्वाहायार्थान्तरं शब्दान्तरं वा कर्षतीत्यनुमानस्य श्रुतार्थापत्तेर्वा तार्किक-मीमांसकयोर्न ध्वनिप्रसङ्ग इत्यलं बहुना॥— pp. 272-74. Mahimabhaṭṭa's comments on this verse are worth note : 'रम्या—' इत्यत्र काव्यार्थप्रतीतेरनन्तरमुपमाप्रतिभोद्भेदनिबन्धनभूतं न किञ्चिदवधारयामः, यत्सामर्थ्यात् वध्व इव वलभ्य इत्यमुमर्थमवगच्छेम। न चोभयार्थसाधारणस्य वलभीविशेषणकलापस्यैव तत्र निबन्धनभावोऽवगन्तुं युक्तः। तस्य भिन्नविभक्तिकस्य वधूभिरभिसम्बन्धानुपपत्तेरित्युक्तमेव। अथ सममित्यस्य तुल्यार्थस्य वधूवलभीसंबन्धबलात् विभक्तिविपरिणामेन कल्पिततदुचितविभक्त्यन्तानां वधूनां विशेषणकलापाभिसंबन्धसहत्वात् वलभीभिः सहोपमानोपमेयभावावगतिर्भवति, यथा 'सममिन्दुना सकलकलोऽब्धिरुत्थितः'-इति। एवं तर्हि तुल्यतासंबन्धावधारण-निबन्धनेयं वधूवलभीनामुपमानोपमेयभावावगतिरिति नासौ अनुमेयतामतिपतति इति श्लेषानुमितिरिति उच्यते॥—*Op. cit.*, pp. 440-41.

TEXT

§ ५०। यथासंख्यध्वनिर्यथा—

अङ्कुरितः पल्लवितः कोरकितः पुष्पितश्च सहकारः।
अङ्कुरितः पल्लवितः पुष्पितश्च हृदि मदनः॥

अत्र हि यथोद्देशमनूद्देशे यच्चारुत्वमनुरणनरूपं मदनविशेषण-भूताङ्कुरिताद्विशब्दगतं तन्मदनसहकारयोस्तुल्ययोगितासमुच्चय-लक्षणाद् वाच्यादतिरिच्यमानमालक्ष्यते। एवमन्येऽप्यलंकारा यथायोगं योजनीयाः ॥

EXPOSITION

§ 50. *Vide* Mahimabhaṭṭa's remarks : 'अङ्कुरितः—' इत्यत्र मुख्यामुख्याङ्कुरितत्वादिधर्मविशिष्टयोः सहकारमदनयोः प्रमाणान्तराव-गतकार्यकारणभावयोरपि अतिशयोक्तिच्छायया यस्तुल्यकालतयोप-निबन्धस्तत्र कार्यकारणधर्माणां यथाश्रुतक्रमं संख्यासाम्यमेव यथासंख्यमनुमापयति, यथाश्रुतक्रमातिक्रमे प्रयोजनाभावात् निबन्धना-भावाच्च। को हि अविप्लुतमतिरसति बाधके श्रुतमर्थमनादृत्य अश्रुतं परिकल्पयेत् इति यथासंख्यानुमितिरितीयमुच्यते—*Op. cit.*, p. 442.

एवमन्येऽपि....योजनीयाः—Abhinavagupta in the following extract cites a few more instances of **अर्थशक्तिमूलालंकार-ध्वनि**. Comp. यथा च दीपकध्वनि :—

'मा भवन्तमनलः पवनो वा वारणो मदकलः परशुर्वा।
वज्रमिन्द्रकरविप्रसृतं वा स्वस्ति तेऽस्तु लतया सह वृक्षः ॥

इत्यत्र बाधिष्टेति गोप्यमानादेव दीपकादत्यन्तस्नेहास्पदत्वप्रतिपत्त्या चारुत्वनिष्पत्तिः। अप्रस्तुतप्रशंसाध्वनिरपि—

ढुण्ढुल्लन्तो मरिहिसि कण्टअकलिआइं केअइवणाइं।
मालइकुसुमसरिच्छं भमर भमन्तो ण पाविहिसि ॥

प्रियतमेन साकमुद्याने विहरन्ती काचिन्नायिका भ्रमरमेवमाहेति भृङ्गस्य अभिधायां प्रस्तुतत्वमेव। न चामन्त्रणादप्रस्तुत्वावगतिः, प्रत्युतामन्त्रणं तस्या मौग्ध्यविजृम्भितमिति अभिधया तावत् नाप्रस्तुत-प्रशंसा समाप्या। समाप्तायां पुनरभिधायां वाच्यार्थबलादन्यापदेशता ध्वन्यते। यत् सौभाग्याभिमानपूर्णा सुकुमारपरिमलमालतीकुसुम-

सदृशी कुलवधूर्निर्व्याजप्रेमपरतया कृतकवैदग्ध्यप्रसिद्धातिशयानि शम्भलीकण्टकव्याप्तानि दूरामोदकेतकीवनस्थानीयानि वेश्याकुलानीतश्चेतश्च चञ्चूर्यमाणं प्रियतममुपालभते ।। अपह्नुतिध्वनिर्यथा अस्मदुपाध्यायभट्टेन्दुराजस्य—

> यः कालागुरुपत्रभङ्गरचनावासैकसारायते
> गौराङ्गीकुचकुम्भभूरिसुभगाभोगे सुधाधामनि ।
> विच्छेदानलदीपितोत्कवनिताचेतोधिवासोद्भवं
> सन्तापं विनिनीषुरेष विततैरङ्गैर्नताङ्गि स्मरः ।।

अत्र चन्द्रमण्डलमध्यवर्त्तिनो लक्ष्मणो वियोगाग्निपरिचितवनिताहृदयोदितप्लोषमलीमसच्छवि-मन्मथाकारतयाऽपह्नवो ध्वन्यते। अत्रैव ससन्देहध्वनिः—यतश्चन्द्रवर्त्तिनस्तस्य नामापि न गृहीतम्। अपि तु गौराङ्गीस्तनाभोगस्थानीये चन्द्रमसि कालागुरुपत्रभङ्गविच्छित्त्यास्पदत्वेन यः सारतामुत्कृष्टतामाचरतीति तन्न जानीमः, किमेतद्वस्तु-इति ससंदेहोऽपि ध्वन्यते। पूर्वमनङ्गीकृतप्रणयामनुतप्तां विरहोत्कण्ठितां वल्लभागमनप्रतीक्षापरत्वेन कृतप्रसाधनादिविधितया वासकसज्जीभूतां पूर्णचन्द्रोदयावसरे दूतीमुखानीतः प्रियतमस्त्वदीयकुचकलशन्यस्त-कालागुरुपत्रभङ्गरचना मन्मथोद्दीपनकारिणीति चाटुकं कुर्वाणश्चन्द्रवर्त्तिनी चेयं कुवलयदलश्यामलकान्तिरेवमेव करोति इति प्रतिवस्तूपमाध्वनिरपि। सुधाधामनीति चन्द्रपर्यायतयोपात्तमपि पदं सन्तापं विनिनीषुरित्यत्र हेतुतामपि व्यनक्ति इति हेत्वलंकारध्वनिरपि। त्वदीयकुचशोभा मृगाङ्कशोभा च सह मदनमुद्दीपयत इति सहोक्तिध्वनिरपि। 'त्वत्कुचसदृशश्चन्द्रश्चन्द्रसमस्त्वत्कुचाभोगः' इत्यर्थप्रतीतेरुपमेयोपमाध्वनिरपि। एवमन्येऽप्यत्र भेदाः शक्योत्प्रेक्षाः। महाकविवाचोऽस्याः कामधेनुत्वात्। यतः—

> हेलाऽपि कस्यचिदचिन्त्यफलप्रसूत्यै
> कस्यापि नालमणवेऽपि फलाय यत्नः।

दिग्दन्तिरोमचलनं धरणिं धुनोति
खात् संपतन्नपि लतां चलयेन्न भृङ्गः ॥

—*Op. cit.*, pp. 274-277.

TEXT

§ ५१। एवमलंकारध्वनिमार्गं व्युत्पाद्य तस्य प्रयोजनवत्तां ख्यापयितुमिदमुच्यते—

शरीरीकरणं येषां वाच्यत्वे न व्यवस्थितम् ।
तेऽलङ्काराः परां छायां यान्ति ध्वन्यङ्गतां गताः ॥२८॥

ध्वन्यङ्गता चोभाभ्यां प्रकाराभ्यां व्यञ्जकत्वेन व्यङ्ग्यत्वेन च। तत्रेह प्रकरणाद् व्यङ्ग्यत्वेनेत्यवगन्तव्यम्। व्यङ्ग्यत्वेऽप्यलंकाराणां प्राधान्यविवक्षायामेव सत्यां ध्वनावन्तःपातः। इतरथा तु गुणीभूतव्यङ्ग्यत्वं प्रतिपादयिष्यते ॥

EXPOSITION

§ 51. Ānandavardhana now brings out the diflerence between an *expressed* and a *suggested* poetic figure. The self-same poetic figure when suggested comes to acquire an indescribable charm that was foreign to it when it was expressed in words. When *expressed* they are like popular ornaments such as necklace, bangles etc., or if carefully worked out they can at most hope to attain the status of such objects of decoration as कुंकुमद्रव (saffron-paste), that are more closely related to the body than the former. Nevertheless, they remain nothing but external appendages. But those identical अलंकार's are turned into the very soul of poetic art if they are conveyed through the function of suggestion. Such is the spell of the power of *suggestion.* As Abhinavagupta observes: ननूक्तास्तावत् चिरन्तनैरलंकारास्तेषां तु भवता यदि व्यङ्ग्यत्वं प्रदर्शितं किमियतेत्याशङ्क्याह—**एवमि-**

यादि। येषामलंकाराणां वाच्यत्वेन शरीरीकरण शरीरभूतात् प्रस्तुतादर्थान्तरभूततया अशरीराणां कटकादिस्थानीयानां शरीरतापादनं व्यवस्थितं सुकवीनामयत्नसंपाद्यतया। यदि वा वाच्यत्वे सति येषां शरीरतापादनमपि न व्यवस्थितं दुर्घटमिति यावत्। तेऽलंकाराः ध्वनेर्व्यापारस्य काव्यस्य वाऽङ्गतां व्यङ्ग्यरूपतया गताः सन्तः परां दुर्लभां छायां कान्तिमात्मरूपतां यान्ति। एतदुक्तं वति—सुकविर्विदग्धपुरन्ध्रीवत् भूषणं यद्यपि श्लिष्टं योजयति, तथापि शरीरतापत्तिरेवास्य कष्टसंपाद्या कुङ्कुमपीतिकाया इव।[1] आत्मतायास्तु का संभावनाऽपि। एवम्भूता चेयं व्यङ्ग्यता या अप्रधानभूताऽपि वाच्यमात्रालंकारेभ्य उत्कर्षमलंकाराणां वितरति। बालक्रीडायामपि राजत्वमिवेत्यमुमर्थं मनसि कृत्वाह—**इतरथा**त्विति ॥— *Op. cit.*, pp. 278-79.

इतरथा तु....प्रतिपादयिष्यते—*Vide Kārikā*, III. 34: 'प्रकारोऽन्यो गुणीभूतव्यङ्ग्यः काव्यस्य दृश्यते। यत्र व्यङ्ग्यान्वये वाच्यचारुत्वं स्यात् प्रकर्षवत् ॥'—and *vṛtti* thereon, which reads as follows: "व्यङ्ग्यालंकारस्य गुणीभावे दीपकादिविषयः ॥"

TEXT

§५२। अङ्गित्वेन व्यङ्ग्यतायामप्यलंकाराणां द्वयी गतिः। कदाचिद्वस्तुमात्रेण व्यज्यन्ते, कदाचिदलंकारेण। तत्र—

व्यज्यन्ते वस्तुमात्रेण यदाऽलंकृतयस्तदा।

---

1 Bhoja in his *Śṛṅgāraprakāśa* classifies *alaṁkāras* into three categories, on the basis of the degree of their intimacy with the *expressed sense* which constitutes the body of poetry. As he notes: अलंकाराश्च त्रिधा—बाह्याः, आभ्यन्तराः, बाह्याभ्यन्तराश्च। तेषु बाह्याः—वस्त्र-माल्य-विभूषणादयः। आभ्यन्तराः—स्नान-धूप-विलेपनादयः ॥—*Vide* Dr. V. Raghavan's *Some Concepts of Alaṁkāra Śāstra*, p. 53

अत्र हेतुः—

ध्रुवं ध्वन्यङ्गता तासां काव्यवृत्तिस्तदाश्रया ॥२६॥

यस्मात्तत्र तथाविधव्यङ्ग्यालंकारपरत्वेनैव काव्यं प्रवृत्तम्। अन्यथा तु तद्वाक्यमात्रमेव स्यात् ॥

EXPOSITION

§ 52. The present *Kārikā* has been cited by Mammaṭa under *Kāvyaprakāśa*, v. 2.[1] Govinda explains the *Kārikā* as follows: "अत्र ध्वन्यङ्गता व्यङ्ग्यतया। ध्रुव ध्वन्यङ्गता ध्वनिनव ता व्यज्यन्ते। तद्व्यञ्जकस्य ध्वनित्वमेवेत्यर्थः। कुतः? काव्यवृत्तेस्तदाश्रयात्, काव्यवृत्तेस्तदभिसंधानपूर्वकत्वात्। वस्तुमात्रापेक्षयाऽलंकारस्य चारुतानियमादित्यर्थः। ननु यद्यलकारापेक्षया वस्तुमात्रस्य नातिशयनियमस्तदा कथमलकारेण वस्तुमात्रव्यञ्जने ध्वनित्वमिति चेत्, उच्यते—स एवार्थो वाच्यः सन्न तथा चमत्करोति यथा व्यङ्ग्यतापन्न इत्यनुभवसिद्धम्। अतो वाच्यताऽपकर्षहेतुः, व्यङ्ग्यता तु उत्कर्षायेति स्थितम्। यत्र चालंकारेण वस्तुमात्रं व्यङ्ग्यं तत्रालंकारस्य वाच्यत्वेन किंचिदपकर्षात्, वस्तुमात्रस्य च व्यङ्ग्यत्वेन किंचिदुत्कर्षात् युज्यत एव ध्वनित्वम्। यत्र तु वस्तुनाऽलकारो व्यज्यते, तत्र वस्त्वलंकारयोर्वाच्यत्व-व्यङ्ग्यत्वाभ्यामतिशयेनैवोत्कर्षापकर्षौ इति कुतो गुणीभूतव्यङ्ग्यत्वावकाशः। इद तु चिन्त्यम्। एवं चारुत्वाभावनिबन्धनं गुणीभूतत्वं मा भूत्। अगूढत्वादिनिबन्धने तु तस्मिन् को वारयितेति ॥"—°*Pradīpa*, p. 145.

---

1 The reading adopted by Mammaṭa is 'काव्यवृत्तेस्तदाश्रयात्, which is also reading in the N.S.P. Edn. of our text.

2 Compare :

"विनोत्कर्षापकर्षाभ्यां स्वदन्तेऽर्था न जातुचित्।
तदर्थमेव कवयोऽलंकारान् पर्युपासते ॥"—*Vyaktiviveka*, p. 218.

TEXT

§ ५३। तासामेवालंकृतीनाम्—

अलंकारान्तरव्यङ्ग्यभावे

पुनः,

ध्वन्यङ्गता भवेत्।

चारुत्वोत्कर्षतो व्यङ्ग्यप्राधान्यं यदि लक्ष्यते ॥३०॥

उक्तं ह्येतत्— 'चारुत्वोत्कर्षनिबन्धना वाच्यव्यङ्ग्ययोः प्राधान्य-विवक्षे'ति।[1] वस्तुमात्रव्यङ्ग्यत्वे चालंकाराणामनन्तरोपदर्शितेभ्य एवोदाहरणेभ्यो विषय उन्नेयः। तदेवमर्थमात्रेणालंकारविशेषरूपेण वाऽर्थेनार्थान्तरस्यालंकारस्य वा प्रकाशने चारुत्वोत्कर्षनिबन्धने सति प्राधान्येऽर्थशक्त्युद्भवानुरणनरूपव्यङ्ग्यो ध्वनिरवगन्तव्यः॥

EXPOSITION

§ 53. तासामेव....विषय उन्नेय.—*Vide* notes on *Uddyota* I (Sec. §30 ff). तदेवम्....अवगन्तव्यः—"व्यङ्ग्यस्य व्यञ्जकस्य च प्रत्येकं वस्त्वलंकाररूपतया द्विप्रकारत्वात् चतुर्विधोऽयमर्थशक्त्युद्भव इति तात्पर्यम्॥"—°*Locana*, p. 281.

TEXT

§ ५४। एवं ध्वनेः प्रभेदान् प्रतिपाद्य तदाभासविवेकं कर्त्तुमुच्यते—

यत्र प्रतीयमानोऽर्थः प्रम्लिष्टत्वेन भासते।

वाच्यस्याङ्गतया वाऽपि नास्यासौ गोचरो ध्वनेः॥३१॥

द्विविधोऽपि प्रतीयमानः स्फुटोऽस्फुटश्च। तत्र य एव स्फुटः शब्दशक्त्याऽर्थशक्त्या वा प्रकाशते स एव ध्वनेर्मार्गो नेतरः।

1 Cf. *Vṛtti* on 1.13 (*Uddyota* I. Sec. 32).

स्फुटोऽपि योऽभिधेयस्याङ्गत्वेन प्रतीयमानोऽवभासते सोऽस्यानुरणनरूपव्यङ्ग्यस्य ध्वनेरगोचरः ॥ यथा—

कमलाअरा णँ मलिआ हंसा उड्डाविआ ण अ पिउच्छा ।
केण वि गामतडाए अब्भं उत्ताणअं फलिहं ॥

अत्र हि प्रतीयमानस्य मुग्धवध्वा जलधरप्रतिबिम्बदर्शनस्य वाच्याङ्गत्वमेव। एवंविधे विषयेऽन्यत्रापि यत्र व्यङ्ग्यापेक्षया वाच्यस्य चारुत्वोत्कर्षप्रतीत्या प्राधान्यमवसीयते, तत्र व्यङ्ग्यस्याङ्गत्वेन प्रतीतेर्ध्वनेरविषयत्वम्। यथा—

वाणीरकुडङ्गोड्डीणसउणिकोलाहलं सुणन्तीए ।
घरकम्मवावडाए बहुए सोअन्ति अङ्गाइं ॥

एवंविधो हि विषयः प्रायेण गुणीभूतव्यङ्ग्यस्योदाहरणत्वेन निर्देक्ष्यते। यत्र तु प्रकरणादिप्रतिपत्त्या निर्धारितविशेषो वाच्योऽर्थः पुनः प्रतीयमानाङ्गत्वेनैवावभासते सोऽस्यैवानुरणनरूपव्यङ्ग्यस्य ध्वनेर्मार्गः। यथा—

उच्चिणसु पडिअकुसुमं मा धुण सेहालिअं हलिअसुण्हे ।
अह दे विसमविराओ ससुरेण सुओ वलअसद्दो ॥

अत्र हि अविनयपतिना सह रममाणा सखी बहिःश्रुतवलयकलकलया सख्या प्रतिबोध्यते। एतदपेक्षणीयं वाच्यार्थप्रतिपत्तये। प्रतिपन्ने च वाच्येऽर्थे तस्याविनयप्रच्छादनतात्पर्येणाभिधीयमानत्वात् पुनर्व्यङ्ग्याङ्गत्वमेवेत्यस्मिन्ननुरणनरूपव्यङ्ग्यध्वनावन्तर्भावः ॥

EXPOSITION

§ 54. एवं....प्रतिपाद्य—Abhinavagupta thus sums up the various classifications of ध्वनि, as shown by the Dhvanikāra in the present *Uddyota*: एवमिति। अविवक्षितवाच्यो विवक्षितान्यपरवाच्य इति द्वौ मूलभेदौ। आद्यस्य द्वौ भेदौ—अत्यन्त-

तिरस्कृतवाच्योऽर्थान्तरसंक्रमितवाच्यश्च। द्वितीयस्य भेदौ—अलक्ष्यक्रमोऽनुरणनरूपश्च। पश्चिमस्त्रिविधः—कविप्रौढोक्तिकृतशरीरः, कविनिबद्धवक्तृप्रौढोक्तिकृतशरीरः, स्वतःसंभवी च। ते च प्रत्येकं व्यङ्ग्यव्यञ्जकयोरुक्तभेदनयेन चतुर्धेति द्वादशविधोऽर्थशक्तिमूलः। आद्याश्चत्वारो भेदा इति षोडश मुख्यभेदाः। ते च पदवाक्यप्रकाशत्वेन प्रत्येकं द्विविधा वक्ष्यन्ते। अलक्ष्यक्रमस्य तु वर्ण-पद-वाक्य-संघटना-प्रबन्धप्रकाश्यत्वेन पञ्चत्रिंशद्भेदाः ॥[1]— °*Locana*, p. 281. Pratīhārendurāja's scheme of classification, as recorded by him in his *Laghuvṛtti*, is somewhat different :—

'तदेवं वाचकशक्तिमूलेऽलंकारैकनियते वाच्यशक्तिमूले च रसादिविषये व्यञ्जकत्वे वाच्यस्य विवक्षितत्वैकरूपत्वम्। वस्त्वलंकारविषये तु वाच्यशक्तिमूले व्यञ्जकत्वे प्रत्येकं वाच्यस्य विवक्षितत्वाविवक्षितत्वाभ्यां द्विभेदता। अतस्तत्समाश्रयणेन त्रिविधप्रतीयमानार्थनिष्ठस्यापि व्यञ्जकत्वस्य षट्प्रकारता भवति। एतेषां च षण्णां भेदानां मध्याद् द्वयोर्भेदयोर्वाच्यस्याविवक्षोक्ता। चतुर्षु विवक्षितत्वम्। यत्र च विवक्षितत्वम् तत्र वाच्यस्य स्वतः-संभवित्वात् प्रौढोक्तिमात्रनिष्पादितशरीरत्वाच्च द्वैविध्यम्। अतस्तत्र तस्याष्टौ भेदा भवन्ति। एते चाष्टौ भेदा वाच्यस्य यत्राविवक्षा तद्विषयाभ्यां पूर्वोदिताभ्यां द्वाभ्यां भेदाभ्यां संकलिताः सन्तो दश संपद्यन्ते। एत एव तु पदवाक्यप्रकाश्यतया द्वैगुण्यं भजमाना विंशतिर्भवन्ति, वर्ण-संघटनाप्रबन्धानां च व्यञ्जकत्वस्य कृत्तद्धितादिगतस्य च पदवाक्यानुप्रवेशेनैवाविर्भावात्।....यथा च प्राधान्यभूते

---

1. Mammaṭa's classification is scrupulously based on this °*Locana*-text. It is to be observed, however, that Abhinavagupta does not include the शब्दार्थोभयशक्तिमूलध्वनि in his scheme though it has been recognised by him and the Dhvanikāra as well as a separate division. See his comments on *Kārikā*, II. 23.

व्यङ्ग्य एषा व्यञ्जकता विंशतिविधा भवति तथा गुणीभूतेऽपि यथा-संभवं योज्येति। तदाहुः—

निवक्ष्यमविवक्ष्यं च वस्त्वलंकारगोचरे।
वाच्यं ध्वनौ विवक्ष्यं तु शब्दशक्ति-रसास्पदे॥
भेदषट्के चतुर्धा यद् वाच्यमुक्तं विवक्षितम्।
स्वतःसंभवि वा तत् स्यादथवा प्रौढिनिर्मितम्॥
दश भेदा ध्वनेरेते विंशतिः पदवाक्यतः।
प्रधानवद् गुणीभूते व्यङ्ग्य प्रायेण ते तथा॥इति॥"[1]

—*Op. cit.*, pp. 91-92.

Ānandavardhana now differentiates a genuine case of ध्वनि from pseudo-ध्वनि (ध्वन्याभास). यत्र....गोचरो ध्वनेः—*See* notes on *Uddyota* I. Sec. §38. कमलाअरा..फलिह..अविषयत्वम्—केनापि अनिपुणेन। **वाच्याङ्गत्वमेवेति**। वाच्येनैव हि विस्मय-विभावरूपेण मुग्धिमातिशयः प्रतीयत इति वाच्यादेव चारुत्वसंपत्। वाच्यं तु स्वात्मोपपत्तयेऽर्थान्तरं स्वोपकारवाञ्छया व्यनक्ति।'—°*Locana.*

वाणीर......अङ्गाइ—Abhinavagupta thus explains the *gāthā*: 'अत्र दत्तसंकेतचौर्यकामुकरतसमुचितस्थानप्राप्तिर्ध्वन्यमाना वाच्यमेवोपस्कुरुते। तथा हि गृहकर्मव्यापृताया इत्यन्यपराया अपि. वध्वा इति सातिशयलज्जापारतन्त्र्यबद्धाया अपि, अङ्गानि इति एक-मपि न तादृगङ्गं यद् गाम्भीर्यावहित्थवशेन संवरीतुं पारितम्, सीद-न्तीत्यास्तां गृहकर्मसंपादनं स्वात्मानमपि धर्त्तुं न प्रभवन्तीति। गृह-कर्मयोगेन स्फुटं तथा लक्ष्यमाणानीति। अस्मादेव वाच्यात् साति-शयमदनपरवशताप्रतीतेश्चारुत्वसंपत्तिः॥—*Op. cit.*, p. 283.

एवंविधो .. निर्देक्ष्यते—Mammaṭa cites the verse as an

1. The verses cited are anonymous.

illustration of गुणीभूतव्यङ्ग्य of the असुन्दर type and observes : 'वाणीर—' इत्यत्र दत्तसंकेतः कश्चिल्लतागहनं प्रविष्टः इति व्यङ्ग्यात् सीदन्त्यङ्गानीति वाच्यं सचमत्कारम् ॥'— *Kāvyaprakāśa*, Chap V.

यत्र तु....ध्वनेर्मार्गः—Compare *°Locana* : प्रकरणमादिर्यस्य शब्दान्तरसंनिधानसामर्थ्यलिङ्गादेस्तदवगमादेव यत्रार्थो निश्चितसमस्तभावः । पुनर्वाच्यः पुनरपि स्वशब्देनोक्तोऽत एव स्वात्मावगतेः संपन्नपूर्वत्वादेव तावन्मात्रपर्यवसायी न भवति, तथाविधश्च प्रतीयमानस्याङ्गतामेति योऽस्य ध्वनेर्विषय इत्यनेन व्यङ्ग्यतात्पर्यनिबन्धनं स्फुटं वदता व्यङ्ग्यगुणीभावे त्वेतद्विपरीतमेव निबन्धनं मन्तव्यमित्युक्तं भवति ॥—*Op. cit.*, pp. 283-84.

उच्चिणसु......अन्तर्भावः—*°Locana* explains the *Prakrit* stanza as follows : यतः श्वशुरः शेफालिकालतिकां प्रयत्नै रक्षन् तस्या आकर्षणधूननादिना कुप्यति। तेनात्र विषमपरिपाकत्वं मन्तव्यम् । अन्यथा स्वोक्त्यैव व्यङ्ग्याक्षेपः स्यात् । अत्र च 'कस्स वा ण होइ रोसो'— इत्येतदनुसारेण व्याख्या कर्त्तव्या ॥ वाच्यार्थस्य प्रतिपत्तये लाभाय एतदपेक्षणीयम्। अन्यथा वाच्योऽर्थो न लभ्येत । स्वतःसिद्धतयाऽवचनीय एव सोऽर्थः स्यादित्यर्थः । नन्वेवं व्यङ्ग्यस्योपस्कारता प्रत्युतोक्ता भवेदित्याशङ्क्याह—**प्रतिपन्ने चेति** । शब्देनोक्त इति यावत् ॥—*Op. cit.*, pp. 284-85.

TEXT

§ ५५। एवं विवक्षितवाच्यस्य ध्वनेस्तदाभासविवेके प्रस्तुते सत्यविवक्षितवाच्यस्यापि तं कर्त्तुमाह—

अव्युत्पत्तेरशक्तेर्वा निबन्धो यः स्खलद्गतेः ।
शब्दस्य स च न ज्ञेयः सूरिभिर्विषयो ध्वनेः ॥३२॥

स्खलद्गतेरुपचरितस्य शब्दस्याव्युत्पत्तेरशक्तेर्वा निबन्धो यः स च न ध्वनेर्विषयः ॥ यतः—

सर्वेष्वेव प्रभेदेषु स्फुटत्वेनावभासनम् ।
यद्व्यङ्ग्यस्याङ्गिभूतस्य तत्पूर्णं ध्वनिलक्षणम् ॥३३॥

तच्चोदाहृतविषयमेव ॥

इति श्रीराजानकानन्दवर्धनाचार्यविरचिते ध्वन्यालोके
द्वितीय उद्द्योतः ॥

EXPOSITION

§ 55. अव्युत्पत्तेः ...... ध्वनेः—'अव्युत्पत्तिः'-अनुप्रासादि-निबन्धनतात्पर्यप्रवृत्तिः । यथा–

प्रेङ्खत्प्रेमप्रबन्धप्रचुरपरिचये प्रौढसीमन्तिनीनां
चित्ताकाशावकाशे विहरति सततं यः स सौभाग्यभूमिः ॥

अत्रानुप्रासरसिकतया प्रेङ्खदिति लाक्षणिकः, चित्ताकाश इति गौणः प्रयोगः कविना कृतोऽपि न ध्वन्यमानरूपसुन्दरप्रयोजनांशपर्यवसायी ॥ अशक्तिवृत्तपरिपूरणाद्यसामर्थ्यम् ॥ यथा—

वि मकाण्डकुटुम्बकसंचयप्रवर वारिनिधौ पतता त्वया ।
चलतरङ्गविघूर्णितभाजने विचलतात्मनि कुडमये कृता ॥

अत्र प्रवरान्तमाद्यपदं चन्द्रमसि उपचरितम् । भाजनमित्याशये, कुडमय इति च विचले । अत्रैतत् कामपि कान्तिं न पुष्यति, ऋते वृत्तपूरणात् ॥— °*Locana*, pp. 285-86. *See* notes on *Uddyota* I. *Kārikā* 14 et *seqq.*

सर्वष्वेव....लक्षणम्—*Vide* the *Saṃgraha-ślokas* : 'व्यङ्ग्यस्य यत्राप्राधान्यम्—' etc. cited in the *Vṛtti*, Uddyota I. Sec. 38.

End of Uddyota II



APPENDICES

APPENDIX I

Supplementary Notes

Section	Page	
§ 2	3	'स्निग्धश्यामलकान्ति°—'-This is *Mahānāṭaka*, V. 7. It has been cited by Viśvanātha in his *Sāhitya-darpaṇa* under II. 11[a] ; by Mammaṭa in *Kāvya-prakāśa*, IV. *See* Kane : *Notes on Sāhitya-darpaṇa*, pp. 61-62 (Second Edition.)
§ 3	4	'ताला जाअन्ति गुणा—'-Cf. ख्यातिं गमयति सुजनः सुकवि-र्विदधाति केवलं काव्यम् । पुष्णाति कमलमम्भो लक्ष्म्या तु रविर्नियोजयति ॥"—Vallabha's *Subhāṣitāvali*, No. 154, attributed to Bhadanta Ravigupta (Peterson's Edn).
§ 5	6	'गअणं च मत्तमेहं—'-This is from *Gaüḍavaho* of Vākpatirāja (v. 406. S. P. Pandit's Edn.). It occurs in the course of a description of the rainy season (प्रावृड्वर्णन). Comm. 'हरन्ति स्वीकुर्वन्ति विरहितानां मदनोद्दीपनेन ।' Ānandavardhana refers to another Prakrit poem of Vākpatirāja entitled 'मधुमथनविजय' from which verses are quoted by Abhinavagupta in his °*Locana*.
§ 11	20	'रसभावादितात्पर्यं. . . .साधनम्'—The verse, though really a *Saṃkṣepa-śloka*, as is evident from the introductory remark of the Vṛttikāra ('तथा चायमत्र संक्षेपः'), has been printed as a *Kārikā* (II. 6) in the N.S.P. Edn.

Sec. Page.

§ 18 40 'श्रुतिदुष्टादयो दोषाः—'–As regards the classification of दोष's into two broad classes–viz. नित्यदोष's and अनित्यदोष's, the following excerpt from the *Abhinavabhāratī* on Bharata's *Nāṭyaśāstra*, XVI. 88 (viz. गूढार्थमर्थान्तरमर्थहीनं भिन्नार्थमेकार्थमभिप्लुतार्थम् । न्यायादपेतं विषमं विसन्धि शब्दच्युतं वै दश काव्यदोषाः ॥) --would be found illuminating: "एतन्मध्ये तु केचिन्नित्यदोषाः, यथा अपशब्दः । केचिदनित्या एव, यथा ग्राम्यं, हास्यादौ तस्येष्टतमत्वात् । एतदाह यथास्थूलमिति । आनुपूर्व्यम् अव्ययेनाव्ययीभावः । तेनोत्तरोत्तरमेते दोषाः स्थूलाः । यथा च गूढार्थं गूढलेखप्रहेलिका(दि) पताकास्थानकादिषु प्रयोज्यम्, अर्थान्तरमनुवादे, अर्थहीनादि हास्ये, भिन्नार्थं श्रोत्रियादौ वक्तरि, एकार्थं परप्रत्यायने, अभिप्लुतार्थमुन्मादादौ, भिन्नवृत्तं च विसन्धि स्वविषये । एवमेते दोषाः क्रमेणापातविषयाः, इह यतोऽर्थप्रतीतिस्तावदस्ति । अपशब्दस्तु दोष एव, ततः कस्याश्चिदर्थप्रतीतेरभावात् । स हि न काञ्चिद् भाषामनुपतति सङ्क(ङ्के)ताभावत् तमर्थं प्रतिपादयेत् ।" —(GOS. Edn.).

§ 18. 40. As regards the use of harsh letters in a poetic composition which usually leads to the poetic defect called श्रुतिकष्ट (दुःश्रवत्व), the following extract from Abhinavagupta's commentary on the *Nāṭyaśāstra* would be found extremely illuminating. While commenting on the शब्दगुण समाधि as noted by Bharata in his *NS'*, *XVI*. 102[b] :

"[-अभियुक्तैर्विशेषस्तु योऽर्थस्येहोपलक्ष्यते ।]
तेन चार्थेन संपन्नः समाधिः परिकीर्त्तितः ॥

—Abhinavagupta makes the following important observations :—

Section Page

"शब्दगुणश्च समाधिः, तमाह 'तेन चे'ति। समाधि-शब्दस्य योऽर्थः परिहारलक्षणस्तत्र यः परिकीर्त्तितः परितः समन्तादाक्रान्त्या उच्चारणे संपन्नः स च समाधिः। आक्रान्त्या उच्चारणे आरोहावरोहक्रममेव आक्रमणेन गतितुल्यम्। आरोहश्चोर्ध्वगमनद्वारः प्राणमारुतरूपाया उच्चरूपः। अपक्रमणमवरोहो विपर्ययः। उच्चत्वं स्थानकरणवशात्, बाह्याभ्यन्तरप्रयत्नवशाच्च।....तेन स्वभावप्रतिभादर्शनानुविद्धा भगवती वाणी स्वरसोपनिपतिता स्वरसंभारप्रभावानुरोधेनैवारोहावरोहक्रमं भजते। प्रतिभादृष्टिशून्यत्वादन्धपदवदारोहादि न भजेत्।

"नन्वियता पाठसौकर्यं स्यात्, श्रोतुस्तु किमायातम्? अनभिज्ञो देवानां प्रियः। यथा हि कर्कश-शर्करा-निकर-कण्टकिते देशे दुःसञ्चरे संचरज्जनं पश्यन्त्या अपि सुकुमार-हृदयायाः प्रमदायास्तदात्मानुप्रवेश इव जायमानं खेदमतितरामादत्ते प्रहारपातादौ वा, तथा सहृदयस्य स एव मार्गः। सुकुमारता हि वैमल्यापरपर्याया सहृदयत्वं हृदयस्य हि कवि-हृदयतादात्म्यापत्तियोग्यतैव उत्कर्षः। तत एवोक्तं—

'शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते।
वेद्यते स हि काव्यार्थतत्त्वज्ञैरेव केवलम्॥'[1]

-इति। अभिधानकोशमपि हि पठतां सुप्तिङ्विभक्तीरुक्त विदुषामपि न काव्यतत्त्वावबोधः। तस्माद्वर्णोच्चारणप्रयत्नेन परुषपठनस्पर्शजनितो यः खेद उच्चारयितुः स एव श्रोतुरपि पारुष्यमाधत्ते। 'नीरन्ध्यध्ववधूनिबध्यनुगतप्राणैकबन्ध-क्रमः" (?)–इत्यादौ। वर्णगतं च लालित्य-पारुष्यादि पुष्कराध्यायेऽपि[2] वक्ष्यते। अन्यैरप्युक्तं-'तेन वर्णा रसच्युतः'-इत्यादि।[3] स्वभावतो हि केचन वर्णाः सन्तापयन्तीव निकृन्तन्तीव रेफककारादय इव परुषवृत्तिपूर्वकाः, अन्ये तु निर्वापयन्तीवोपनागरिकोचिताः। लोकगोचर एवायमर्थः

1. *Dhvanyāloka*, 1.7.
2. Compare *Nāṭyaśāstra*, XXXIV.
3. Compare *Dhvanyāloka* III. 3-4.

Section Page

स्वसंवेद्योऽपीति न वितत इत्यास्तां तावत् ॥"—*Nāṭya-śāstra*, Vol. II., pp. 337-339 (*GOS*. Edn.).

§ 22. 48 'कपोले पत्राली करतल°—'–This is from *Amaruśataka* (v. 81). Also, *Subhāṣitāvali*, No. 1621.

§ 23 54 'रसवन्ति हि वस्तूनि—'–Compare: "If the Poet's Subject be judiciously chosen, it will naturally, and upon fit occasion, lead him to passions the language of which, if selected truly and judiciously, must necessarily be dignified and alive with metaphors and figures. I forbear to speak of an incogruity which would shock the intelligent Reader, should the Poet interweave any foreign splendour of his own with that which the passion naturally suggests: it is sufficient to say that such addition is unnecessary. And, surely, it is more probable that those passages. which with propriety abound with metaphors and figures, will have their due effect, if, upon other occasions where the passions are of a milder character, the style also be subdued and temperate."—Wordsworth's *Preface to Lyrical Ballads*.

§ 25 55 'चलापाङ्गां दृष्टिं—' This is *Śakuntalā*, I. 20. Rāghava Bhaṭṭa in his commentary *Arthadyotanikā* quotes almost *verbatim* Abhinavagupta's remarks on this verse (as cited on p. 56 in our Exposition) with the concluding remark 'इति प्राञ्चः' and offers a new interpretation (अधुनातनास्तु) with several emendations (e.g. 'चलापाङ्गं दृष्टः—') and points out some more figures of speech besides स्वभावोक्ति as noted by Ānanda.

Section Page

(*See* Kālidāsa's *Śakuntalā*, pp. 34-35. N.S.P. Edn.)

§ 27 58 'रक्तस्त्वं नवपल्लवैः—'–The verse is attributed by Vallabhadeva in his *Subhāṣitāvali* (No. 1364) to the royal poet Yaśovarman at whose court Vākpatirāja and Bhavabūti flourished. Cf.—

कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः ।
जितो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम् ॥

—*Rājataraṅgiṇī*, IV. 149.

Yaśovarman was the author of a drama named *Rāmābhyudaya* referred to by Ānandavardhana and Abhinavagupta. (*See* Aufrecht, *Z.D.M.G.*, Bd. *XXXVI.*, p. 521). The verse 'रक्तस्त्वं नवपल्लवैः—' is also quoted by Namisādhu at the end of his Comm. on the tenth *adhyāya* of Rudraṭa's *Kāvyālaṃkāra*. Yaśovarman, the author of the *Rāmābhyudaya*, is identified by some with the Kāśmīrian king S'aṃkaravarman, a younger contemporary of Ānandavardhana. *See* our *Introduction* to Uddyota I, p. x, fn.(1). For verses attributed to Yaśovarman in anthologies *see* Dr. F. W. Thomas's valuable *Introduction* to *Kavīndravacanasamuccaya*, pp. 75-76 (*Bibliotheca Indica*).

Compare : राजा । नवकिसलयरागेणाग्रपादेन बाला
स्फुरितनखरुचा द्वौ हन्तुमर्हत्यनेन ।
अकुसुमितमशोकं दोहदापेक्षया वा
प्रणमितशिरसं वा कान्तमार्द्रापराधम् ॥

—*Mālavikāgnimitra*, III. 12.

The रक्ताशोक (Jonesia Aśoka) has an important role to play in Sanskrit Erotics. As

Section	Page	
		Mallinātha notes : "रक्ताशोकः। रक्तविशेषणं तस्य स्मरोद्दीपकत्वादुक्तम् । "प्रसूनकैरशोकस्तु श्वेतो रक्त इति द्विधा। बहुसिद्धिकरः श्वेतो रक्तोऽत्र स्मरवर्धनः ॥" -इत्यशोककल्पे दर्शनात् ।"—*Meghadūta*, 86 (K.B. Pathak's Edn.)
§ 28	61.	'नो कल्पापायवायोः—' —This is Mayūra's *Sūryaśataka*, v. 23. (N.S.P. Edn.).
§ 28		'आक्रन्दाः स्तनितैः—' —This is *Subhāṣitāvali*, No. 1776, attributed to Ānandavardhana. But Aufrecht in *Z.D.M.G.*, Bd. *XXXVI* (Second article) refers it to Yaśovarman. As Dr. Peterson observes : 'Our signature to No. 1776 (Ānandavardhanasya) is perhaps to be explained that Vallabhadeva took the verse from some work of Ānandavardhana's. The verse itself is one of the two ascribed to Yaśovarman also in the *Sūktimuktāvalī*, the other being *'yattvannetrasamāna :—'* verse.' (*Introduction* to *Subhāṣitāvali*). The verse also occurs in the *Mahānāṭaka* (IV. 34).
§ 29	66.	'कोपात् कोमललोल°—' —This is *Amaruśataka*, 9. Also quoted in the *Subhāṣitāvali* (No. 1351).
§ 30	67.	'श्यामास्वङ्गं चकित—' —Mallinātha adopts the reading चण्डि for भीरु in the last foot and explains its significance as : "हे चण्डि कोपने ॥ 'चण्डस्त्वत्यन्तकोपनः'—इत्यमरः । गौरादित्वात् ङीष् । उपमानकथनमात्रेण न कोपितव्यम् इति भावः ।"—But the reading adopted by Ānandavardhana and endorsed by Abhinavagupta in his °*Locana* is also adopted by some later scholiasts of the

Section Page

Meghadūta--e.g. Vallabha, Sumativijaya, Mahimasiṁhagaṇi and others. As Vallabha observes : "भीरु इत्यन्वर्थं नाम नारीणाम्." For parallel ideas compare *Raghu°*, VIII. 59.

§ 31 70. 'क्रमेण प्रतिभात्यात्मा--' (*Kārikā*)--The terms सक्रम and अक्रम as referring to the two main varieties of the *suggested sense* (व्यङ्ग्यार्थ) are expressly borrowed from the Grammarians. They occur respectively in Bhartṛhari's *Vākyapadīya*, I. 48 and II 27 (also II. 33). The apparent sequence as between the two categories, नाद (*audible sounds*) and स्फोट (*Logos, Eternal Word*), lies at the basis of the formulation of these two terms, which are transplanted from the province of Grammar to the field of poetic suggestion by propounders of the Dhvani-theory. The origin of the concept of अनुस्वानोपमव्यङ्ग्य can be traced to *Vākyapadīya*, I. 104-106. *See* also Puṇyarāja's gloss on *Vākyapadīya*, *loc. cit.* (*Benares Sanskrit Series* Edition). Compare, in this connexion, the utterance of the Vṛttikāra under I. 13 : 'सूरिभिः कथितः' इति विद्वदुपज्ञेयमुक्तिः, न तु यथाकथञ्चित् प्रवृत्तेति प्रतिपाद्यते। प्रथमे हि विद्वांसो वैयाकरणाः। व्याकरणमूलत्वात् सर्वविद्यानाम्।'— *Uddyota* I. *Sec.* § 40.

§ 32 72. 'येन ध्वस्तमनोभवेन—' -The verse is cited by Rūyyaka in his *Alaṃkāra-sarvasva* as an instance of the figure of speech श्लेष, which he defines as 'विशेष्यस्यापि साम्ये द्वयोर्वोपादाने श्लेषः' and notes 'अत्र हरिहरयोर्द्वयोरपि प्राकरणिकत्वम्।'—Samudra-

Section Page

bandha in his commentary explains the verse as follows : "येनेत्यादि । ध्वस्तमनोभवेन बलिजितो विष्णोः कायः पुरा त्रिपुरदाहेऽस्त्रीकृतः । अभवेन येन अनो ध्वस्तं शकटासुरो भग्नः । बलिजित्त्वेन महत्त्वं लक्ष्यते । महान् कायः स्त्रीकृतोऽमृतप्रदानसमये । उद्वृत्तभुजङ्ग एव हारो वलयं च यस्य, उद्वृत्तस्य भुजङ्गस्य हारवो हाशब्दो लयो यस्य च । यश्च गङ्गामधारयत् । यः अगं गोवर्धनं गां भूमिं चाधारयत् । यस्य शिरः शशिमच्चन्द्रवदाहुः । हर इति च नाम स्तुत्यं चाहुरमराः । शशिमथो राहोः शिरोहर इति स्तुत्यं नामाहुः । अन्धकासुरनाशकरः, अन्धकानां यादवानां वासकरश्च । सर्वदा सदा उमाधवः उमापतिः, सर्वप्रदो माधवश्च ।"—Rūyyaka's *Alaṃkāra-Sūtra* with Maṅkhuka's *Alaṃkāra-Sarvasva*, pp. 101-102. (*Trivandrum Sanskrit Series*. No. 40). Also cited by Viśvanātha in his *Sāhityadarpaṇa* under X. 12. "येन—' इत्यादौ सभङ्गश्लेषः । 'अन्धक—' इत्यादावभङ्गः ।"

§ 33 81 'चमहिअमाणस—'-In the India Office MS. (1008) the Sanskit *Chāyā* of this Prakrit stanza is given as :

'मथितमानसपङ्कजनिस्सृतपरिमला यस्य ।
आखण्डितदानप्रसरा बाहुपरिघा एव गजेन्द्राः ॥'

—so that the original reading of the Prakrit stanza in the Vṛtti text according to that MS. seems to have been 'महिअमाणसपङ्कज—' and not 'चमहिअमाणसकञ्चणपङ्कज—'. In Hemacandra's *Prākṛtavyākaraṇa*, IV. 162, the word निम्महियं is found. So also in Dhanapāla's *Pāiyalacchī Nāmamālā*, v. 199 : 'गंधुग्गिरणंमि निम्महियं', it means 'exhaling perfume.' *Pāiyalacchī* notes also the word महमहिय in v. 197 : महमहियं निग्गयामोयं, meaning 'perfumed'. Also Hemacandra's

Section Page

Prakrit Grammar, IV. 78. *See* Dhanapāla's *Pāiyalacchī* edited by Dr. Georg Bühler, Göttingen, 1879. Compare the following verse cited by Mammaṭa under *Kāvyaprakāśa*, II. 19 for a similar poetic conception of the hand of a liberal and heroic monarch as the trunk of an elephant wet with ichor :—

"भद्रात्मनो दुरधिरोहतनोर्विशाल-
वंशोन्नतेः कृतशिलीमुखसंग्रहस्य ।
यस्यानुपप्लुगतगतेः परवारणस्य
दानाम्बुसेकसुभगः सततं करोऽभूत् ॥"

§ 34 85 'अत्रान्तरे कुसुमसमययुगमुपसंहरन्—'–This is from Bāṇa's *Harṣacarita*, Ucchvāsa II. The opening words of this line in A. A. Führer's text are 'तत्रस्थस्य चास्य कदाचित्—' instead of 'अत्रान्तरे—'. Śaṅkara's commentary on this text runs as follows : "कुसुमसमयो वसन्तः । स एव युगं कल्पस्तल्लक्षणं वा युगं मासद्वयम् । समुत्फुल्लमल्लिकाभिर्धवलाः । अट्टा विक्रयस्थानानि तेषां विकासो यत्र । अन्यत्र तद्वदट्टासः उद्धतं हसितं यस्य । शब्दशक्तिमूलानुरणव्यङ्ग्यरूपो ध्वनिश्च । प्रकृतवर्णने ह्यन्यदप्यत्र प्रतीयते, न वाच्यतया । तथा च । महाकालः साट्टहासः कल्पमुपसंहरञ्जृम्भते । मुखं च विदारयति । महान् कालो ग्रीष्माख्यो भैरवश्च ॥"—*Op. cit.*, p. 72 (Führer's Edn.). Cowell and Thomas translate the passage as follows ;—"While he stayed there, Time in his character of Summer, with his smile white with the jasmines in full flower, yawned and swallowed up the two flowery months.[1]"—The *Harṣacarita* of Bāṇa : Translat-

1. "Caitra and Vaiśākha, i.e. from the middle of March

Section Page

ed by E. B. Cowell and F. W. Thomas. (Oriental Translation Fund. New Series. Royal Asiatic Society. 1897), p. 22. The conception of Śiva's अट्टहास as white is met with also in *Megahdūta*, I. 60—

श्रृंगोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः ॥"—

on which Mallinātha comments : "अट्टहासोऽतिहास इव स्थितः ॥ "अट्टावतिशयक्षौमौ" इति यादवः ॥ धावल्याद्धासत्वेनोत्प्रेक्षा । हासादीनां धावल्यं कविसमयसिद्धम् ॥"— As for the Poetic convention (कविसमय) referred to by Mallinātha compare *Sāhityadarpaṇa*, VII. 23[a] : "मालिन्यं व्योम्नि पापे, यशसि धवलता वर्ण्यते हासकीर्त्योः ।"

§ 34 85 'दत्तानन्दाः प्रजानां——'–This is Mayūra's *Sūryaśataka*, v. 9. cf. 'दीप्तांशोरादित्यस्य संबन्धिन्यो गावो दीधितयो वो युष्माकं प्रीतिं सुखमुतपादयन्तु जनयन्तु ।......गाव इति श्लिष्टमेतदभिन्नम् । गावो धेनवश्चोच्यन्ते । ता अपि पयोभिर्दुग्धैः समुचितसमयाकृष्टसृष्टैः प्रजानां दत्तानन्दा भवन्ति । पूर्वाह्णे प्रत्युषसि विप्रकीर्णा भवन्ति । अह्नोऽवसाने संहारभाजः । दीर्घदुःखप्रभवभवयोदन्वदुत्तारनावश्च[1] दत्ताः सत्यः सद्यः । तदीयैः पयोभिर्विप्राग्नितर्पणैर्लोकाः संसारं तरन्तीत्यागमविदः ॥"— Tribhuvanapāla's Comm. (N.S.P. Edn.).

---

to that of May. Grīṣma is from the midd'e of May to that of July. Mahākāla also contains a punning reference to Śiva in his character as the destroyer."—Cowell and Thomas.

1. 'दीर्घदुःख°— दीर्घं च तद् दुःखं च तस्य प्रभव उत्पत्तिस्थानं स चासौ भवश्च संसारस्तस्माद् भयं तदेवोदन्वान् समुद्रस्तस्मादुत्तारस्तत्र नावो यानपात्राणि ।"—*ibid.*

Section Page

§ 34 86 यथा स्थाण्वीश्वराख्यजनपदवर्णने भट्टबाणस्य—"यत्र च मातङ्गगामित्य:—'–The passage occurs in Bāṇa's *Harṣacarita*, Ucchvāsa III. In some MSS. several other clauses are read after °मदिरामोदिश्वसनाश्च. e.g. the Nirṇayasāgara edition reads "°मदिरामोदिश्वसनाश्च (चन्द्रकान्तकान्तवपुषः शिरीषकोमलाङ्गयश्च अभुजङ्गगम्याः कञ्चुकिन्यश्च पृथुकलत्रश्रियो दरिद्रमध्यकलिताश्च लावण्यवत्यो मधुरभाषिण्यश्च अप्रमत्ताः प्रसन्नोज्ज्वलरागाश्च अकौतुकाः प्रौढाश्च) प्रमदाः". The portion within brackets is however left out in the India Office MS. (1008) and in the Bhāndarkar Oriental Research Institute MS. in Śāradā script (MS. No 257 of 1875-76). The following is the translation of the passage by Cowell and Thomas :— "There are women like elephants in gait[1], yet noble-minded; virgins, yet attached to worldly pomp[2]; dark, yet possessed of rubies[3]; their faces are brilliant with white teeth, yet is their breath perfumed with the fragrance of wine[4]; their bodies are like crystal, yet the limbs are soft as acacia flowers; they are unattainable by paramours, yet robed in bodices[5]; wide are their beautiful hips, yet are they possessed of thin waists[6]; lovely[7]

1. Or—punningly—'visiting vile outcasts'.
2. Or—punningly—'past child bearing'.
3. Or—'dark as night yet bright with red lotuses'.
4. Or—'with faces pure as Brāhmans, yet &c.'.
5. Or—punningly—'libidinous'.
6. Or—punningly—'far-fetched as wives (or having brilliant retinues'), yet reckoned among the poor.'
7. Or—punningly—'tart in speech'.

Section Page

are they, yet honeyed in speech ; they trip not, yet have a bright and captivating beauty[1] ; they are without curiosity[2], yet wedded."—*Op. cit.*, pp. 82-83.

As regards the Vṛttikāra's introductory remark 'स्थाण्वीश्वराख्यजनपदवर्णने' the following remark of Dr. Bühler as cited by Dr. Theodor Aufrecht in his article entitled ***Beiträge zur Kenntniss indischer Dichter*** would be found curiously interesting :

"He calls Bāṇa *Sthāṇvīśvarākhyajanapada-varṇanakartā,* the author of the description of the country called Sthāṇvīśvara i.e. Thāṇesar, and indicates thereby that we have to look out for yet another composition, probably a geographical one, of the famous friend of Harṣavardhana Śilāditya."— *Z.DM.G.* Bd. XXXVI. (1882), p. 364, fn. (1). But we should remember that Bāṇa's ***Harṣacarita*** 'appears to have been almost forgotten in India' and, in Bühler's days, known only to the inquisitive scholars in rare MSS. alone.

§ 35 94 **"यथा तत्रैव—'समवाय इव विरोधिनां पदार्थानाम्—' This line occurs in a passage of the *Harṣacarita*; Ucchvāsa I, as addressed by Vikukṣi to Sāvitrī with reference to her companion Sarasvatī. The full passage is—"तत् कथय कतमो वंशः स्पृहणी-**

---

1. **Or—punningly—'they are flushed with wine.'**
2. **Or—punningly—'the marriage thread'.**

Section Page

यतां भवत्योर्जन्मनानीतः। का चेयमत्रभवती भवत्योः समवाय इव विरोधिनां पदार्थानाम्। तथा हि—सन्निहित-बालान्धकारा भास्वन्मूर्त्तिश्च पुण्डरीकमुखी हरिणलोचना च बालातपप्रभाधारा कुमुदहासिनी च मधुरहंसस्वना समुन्नत-पयोधरा च। कमलकोमलकरा हिमगिरिशिलापृथुनितम्बा च। करभोरुर्विलम्बितगामिनी च। अमुक्तकुमारभावा स्निग्धतारका चेति।"—p. 43 (Dr. A. A. Führer's Edn.) As Cowell and Thomas translate it : "Who is this lady near your highness, a coinherence as it were of mutually exclusive qualities ? Thus : with the darkness of her locks close by she has a radiance as of the sun ; with the face of a lotus the eye of a fawn. . . ."—*Op. cit.* p. 22.

§ 37 100 'संकेतकालमनसं—'-Compare :—

'इङ्गिताकारलक्ष्योऽर्थः सौक्ष्म्यात् सूक्ष्म इति स्मृतः।
कदा नौ सङ्गमो भावीत्याकीर्णे वक्तुमक्षमम्।
अवेक्ष्य कान्तमबला लीलापद्मं न्यमीलयत्॥
पद्मसम्मीलनादत्र सूचितो निशि सङ्गमः।
आश्वासयितुमिच्छन्त्या प्रियमङ्गजपीडितम्॥"

—Daṇḍin's *Kāvyādarśa*, II. 260-262.

Rūyyaka also cites the verse under the figure of speech सूक्ष्म and observes : 'अत्र विटसम्बन्धी सङ्केतकालाभिप्रायो भ्रूक्षेपादिनेङ्गितेन लक्षितो रजनिकाल-भाविना लीलापद्मनीलनेन प्रकाशितः।'

§ 38 104 'अम्ता शेतेऽत्र वृद्धा—'—This verse is quoted anonymously in the *Kavīndravacanasamuccaya*, No. 505 (Edited by F. W. Thomas in *Bibliotheca Indica*). *v. l.* युवत्या for तरुण्या in foot d and

Section Page

अभिमतं for अवसर°. "(a) परिणतवयसामग्रणीर्— 'oldest of the old.'

"(b) निःशेषागार° : The maid has to do all the work and is fully occupied.

"(c) पापाहम् : 'unfortunate I.'

"(d) कथितमभिमतं : 'conveyed her proposal. व्याहृतिव्याजपूर्वं : 'under pretence of verbosity. ....Aufrecht reads व्याकृति. which would more naturally denote 'explanation.' "— Thomas : *Exegetical Notes, Op. cit.*

§ 39 108 'सज्जेइ सुरहिमासो—'–The Sanskrit छाया of this Prakrit verse is as follows :—

'सज्जयति सुरभिमासो न तावदर्पयति युवतिजनलक्षमुखान् ।
अभिनवसहकारमुखान् नवपल्लवपत्रलाननङ्गस्य शरान् ॥'

According to MM. Dr. V. V. Mirashi the verse is a quotation from the lost Prakrit poem called *Harivijaya* by Pravasena to which Ānandavardhana refers in his *, rt.i* on *Dhv.* III. 10-14. As Dr. Mirashi observes : 'One Sarvasena has long been known as the author of a Kāvya named *Harivijaya* referred to in Ānandavardhana's *Dhvanyāloka*. Ānandavardhana states that Sarvasena had altered the original story and introduced some imaginery incidents in it in order to make it suitable for the delineation of the intended sentiment. Ānandavardhana does not state what the story was, but here his commentator Abhinavagupta comes to our help. He states that the *Harivijaya* had for its theme the removal of the Pārijāta tree from heaven which

Section Page

was done by Kṛṣṇa for the appeasement of his wife (evidently Satyabhāmā). This further shows that the work was written in the Mahārāṣṭrī dialect. Some other Prakrit verses in the *Dhvanyāloka* seem to have been taken from the same work though this has not been explicitly stated by Ānandavardhana. For instance, the verse *Sajjei surahi-māso* etc. which he has cited in more than one place as descriptive of the vernal season is also probably taken from the *Harivijaya*[1]"— *Some Royal Poets of the Vākāṭaka Age* in *Indian Historical Quarterly*, vol. XXI. No. 3, pp. 196 ff.

In another article Professor Mirashi notes with regard to the identity of Sarvasena, the author of the lost *Harivijaya*, thus : "*Sarvasena* :— Pītāmbara's commentary on the *Saptaśatī* ascribes *gāthās* 502 and 503 to Sarvasena. Bhuvanapāla mentions this poet's name in connection with two more *gāthās*, viz. 217 and 234. This Sarvasena must be identical with the homonymous poet who has long been known as the author of a prākṛta Kāvya called *Harivijaya*. This work also has received unstinted praise from several Sanskrit authors and rhetoricians. Daṇḍin mentions in his *Avantisundarīkathā* that Sarva-

1. The Prakrit verse : 'चूअङ्कुरावअंसं—' cited by Ānandavardhana (N. S. P. Edn. p. 127) from the *Harivijaya* is obviously descriptive of Spring, and according to Prof. Mirashi the lost *Harivijaya* did contain a description of Spring. *See loc. cit.*

Section Page

sena, the author of the *Harivijaya*[1], was a king. Only one king of this name is known to history, viz. he who was one of the younger sons of the great Vākāṭaka Emperor Pravarsena I and founded the Vatsagulma branch of the Vākāṭaka dynasty. His name has been mentioned in the Basim plates[2] of his son Vindhyaśakti II recently edited by me. I have also shown that he is mentioned in the inscription[3] in Cave XVI at Ajantā. Sarvasena flourished in *circa* A. D. 350-355."—*The Date of Gāthā-Saptaśatī* (*Siddha-Bhāratī*, Part II, p. 178).

§ 39 108 'साअरविइण्ण —' The Sanskrit *chāyā* is : 'सादरवितीर्णयौवनहस्तावलम्बं कृत्वा समुन्नमद्भ्याम् । अभ्युत्थानमिव मन्मथस्य दत्तं तव स्तनाभ्याम् ॥' Also cited in the *Vṛtti* under *Dhv*. IV. 4.

§ 39 109 'सिहिपिच्छकण्ण—'. The Sanskrit *chāyā* of this gāthā is as follows :—

'शिखिपिच्छकर्णपूरा जाया व्याधस्य गर्विणी भ्रमति ।
मुक्ताफलरचितप्रसाधनानां मध्ये सपत्नीनाम् ॥'

It closely corresponds to the following *gāthā* from Hāla's Anthology :—

सिहिपेहुणा[4]वअंसा वहुआ वाहस्स गव्विरी भमइ ।
गअमोत्तिअरइअपसाहणाणँ मज्झे सवत्तीणं ॥

—Hāla, II. 73

1. See *Avantisundarīkathā*, p. 2. राज्ञा श्रीसर्वसेने (न).. विजयं हरेः ॥

2. *Ep. Ind*., vol. XXVI. pp. 151 f.

3. Mirashi : *Vākāṭaka Inscription in Cave XVI at Ajantā*, (Hyderabad Arch. Series, No. 14), p. 10.

4. Hemacandra in his *Deśīnāmamālā*, VI. 58 reads पेहुण (n.) as a synonym of पिच्छ ('a feather of a tail').

Section. Page.

Gaṅgādhara in his comments thus explains the *gāthā* : "सपत्नीसंपदुत्कर्षोद्विग्नामभिनवसुभगां सान्त्वयन्ती सखी विभवादपि सौभाग्यं गरीय इति प्रदर्शयन्ती आह-सिहिपेहु°-येन करिवरान् हत्वा तत्कुम्भमुक्ताफलैर्यूयं प्रसाधिताः स एवेदानीं मत्संभोगातिप्रसक्तिक्षीणो मयूरमात्रमारणक्षमः संवृत्त इति सौभाग्येन जातगर्वा भ्रमतीत्यर्थः ॥"—N.S.P. Edn.

The same *motif*—viz. a hunter's infatuation for his newly wedded youthful wife and indifference to other elderly cowives, recurs in several other *gāthās* of Hāla's collection, e.g. II. 19, II. 20, II. 22 etc. (NSP. Edn.)

§ 43. 115. 'चन्दमऊएहि णिसा—'—The Sanskrit *chāyā* of this verse is :—

'चन्द्रमयूखैर्निशा नलिनी कमलैः कुसुमगुच्छैर्लता ।
हंसैः सरःशोभा काव्यकथा सज्जनैः क्रियते गुर्वी ॥'

Cf. 'ख्यातिं गमयति सुजनः सुकविर्विदधाति केवलं काव्यम् ।
पुष्णाति कमलमम्भो लक्ष्म्या तु रविर्नियोजयति ॥'
—*Subhāṣitāvali*, No. 154.

With foot *d* compare the following *gāthā* cited by Mammaṭa under *Kāvyaprakāśa*, X. 34, as an instance of the fig. of speech अन्योन्य :

'हंसाण सरेहिं सिरी सारिज्जइ अह सराण हंसेहिं ।
अण्णाण्ण विअ एए अप्पाणं णवार गरुअन्ति ॥
['हंसानां सरोभिः श्रीः सार्यतेऽथ सरसां हंसैः ।
अन्योन्यमेवैते आत्मानं केवलं गुरूकुर्वन्ति ॥' छाया ॥]

§. 44. 116. 'लावण्यकान्ति. . . .पयोधिः'—For purposes of *alliteration* (अनुप्रास). *paronomasia* (श्लेष). यमक etc. ड and ल are regarded as identical according to Sanskrit rhetoricians.

Compare : 'यमकादौ भवदैक्यं डलोर्बवोर्लरोस्तथा ।
शषयोर्नणयोश्चान्ते सविसर्गाविसर्गयोः ।.'

So in this verse (foot *d*) जल° stands for जड as well. Similarly in—

लक्ष्मीर्यादोनिधेर्यादो नादो वादोचितं वचः ।
बिभेति धीवरेभ्यो यद् जडेष्वेव निमज्जति ॥'

-- जड stands for जल.

For this identify of ड and ल in Kālidāsa, cf. *Raghu*°, IX. 46 : 'अंनयदासनरज्जुपरिग्रहे भुजलतां जडतामवलाजनः'. Cf. *Sāhitya-darpaṇa*, X.

§ 55 119. 'वीरणं रमइ—' The Sanskrit *chāyā* of this *gāthā* is :—

'वीराणां रमते घुसृणारुणे न तथा प्रियास्तनोत्सङ्गे ।
दृष्टी रिपुगजकुम्भस्थले यथा बहलसिन्दूरे ॥'

The *simile* as between the temples of an elephant and the fully developed breasts of a beautiful lady is favourite with the Sanskrit poets. As for the practice of smearing the elephant's temples with vermilion-paste and similar other substances the following couplets from Pālakāpya would be found interesting :—

"अतः परं प्रवक्ष्यामि शिरसो म्रक्षणे गुणान् ॥
विकृतान्यङ्कुशाग्रेण दन्तितो घातनेन च ।
ततो घृष्टानि सहसा कवलैः कुवलैरपि ॥
निर्वाणमुपगच्छन्ति भवन्ति च नराधिप ।
शिरांसि स्निग्धकेशानि तथाऽलंकारमेव च ॥
दृष्टिश्च नाविला तस्य श्रो(स्रो)तश्चास्य न हन्यते ।
कोशाद्विक्षरते मूत्रं प्रभिन्नस्य महीपते ॥
दन्तिनः पच्यते कोशः सर्व एव समन्ततः ।
तस्य गैरिकयुक्तेन घृतेन परिषेचनम् ॥
तत्रारत्नेः प्रदातव्यं गैरिकस्य पलं भवेत् ॥"

Section Page

—*Hastyāyurveda* of Pālakāpya, IV. 3. 298–303 (*Ānandāśram Sanskrit series*, No. 25).

Cf. 'जम्भारातीभकुम्भोद्भवमिव दधतः सान्द्रसिन्दूररेणुं—' —*Sūryaśtaka*, v. 1. Also—

"रावणः—'परस्त्रीकुचकुम्भेषु कुम्भेषु वरदन्तिनाम् ।
निपतन्ति न भीरूणां दृष्टयः शरवृष्टयः ॥' "

—Cited by Abhinavagupta in *Abhinava-Bhāratī* on Bharata's *Nāṭyaśāstra*, Chap. XII. (vol. II. p. 358. GOS. Edn.)

§ 45. 120. 'तं ताण सिरिसहोअर—'. This Prākrit verse is cited from Ānandavardhana's *Viṣamabāṇalīlā*, a lost Prakrit poem. As the °*Locana*, in some MSS. reads : 'विषमबाणलीलायामिति । विषमबाणलीलाख्यो ग्रन्थकृदविरचितः प्राकृतभाषाश्रयः ग्रन्थः'— (India Office MS. 1008 E 1135). The *chāyā* of this verse as restored from the °*Locana*-extract cited in our Exposition would be :—

'तत् तेषां श्रीसहोदर-रत्नाहरणे हृदयमेकरसम् ।
बिम्बाधरे प्रियाणां निवेदितं कुसुमबाणेन ॥'

The verse has also been cited by Mammaṭa in his *Kāvyaprakāśa* (X. 31[a]) as an instance of the figure of speech पर्याय, where Nāgojī Bhaṭṭa gives the *chāyā* as follows :—

'तत्तेषां श्रीसहोदररत्नाभरणे हृदयमेकरसम् ।
बिम्बाधरे प्रियाणां निवेशितं कुसुमबाणेन ॥'

and explains it as : "श्रीसहोदरं रत्नं कौस्तुभस्तदाभरणे हरौ । एकरसं तत्परम् । कामेन प्रियाबिम्बाधरचुम्बनाद्यासक्तं कृतमित्यर्थः । केचित्तु यदसुराणां हृदयं विजिगीषाज्वलनजाज्वल्यमानं श्रीसहोदररत्नानाम् आ समंतात् हरणे तत्परमासीत्, तत् सुकुमारतरोपकरणेनापि कामेन प्रियाबिम्बाधरे निवेशितं सकलरत्नसारतुल्यो बिम्बाधर इति हि

Section Page

तेषामभिमानोत्पत्तेः । एवं च व्यङ्ग्योपमाऽत्रेत्याहुः । तन्मतेऽपि हरणस्य वैषयिकाधारत्वात् पर्यायाक्षतिरेव । गाथा छन्दः ॥"—Nāgojī Bhaṭṭa's *Uddyota* on *Kāvya-Pradīpa*, *op. cit.*, p. 104 (Edited by Prof. Dinkar Trimbak Chandorkar, B.A., Poona, 1896). The interpretaticn introduced with केचित्तु in the above extract has a clear reference to the explanation of the *gāthā* as furnished by Abhinavagupta in his °*Locana*.

§ 46. 122. 'देव्वाएत्तम्मि फले—' The Sanskrit *chāyā* of this *gāthā* is as follows :

"दैवायत्ते फले किं क्रियतामेतावत् पुनर्भणामः ।[1]
रक्ताशोकपल्लवाः पल्लवानामन्येषां न सदृशाः ॥"

The word कङ्किल्ल is a *Deśī*-word for रक्ताशोक. In the Bhandarkar Oriental Research Institute MS. (No. 256 of 1875-76) referred to as D in Dr. De's collation, the variant कङ्कोल्लि° is found. कङ्केल्लि and कङ्किल्लि, two other variant forms of the same word, are found to occur in Hemacandra's *Kumārapālacarita*, III. 4 and III. 17 (*Bombay Sanskrit and Prakrit Series*, No. LX.). The twigs of रक्ताशोक are famous for their beauty. Cf. 'रक्ताशोकश्चलकिशलयः—' *Meghadūta*, II. 17.

§. 46. 122. 'हिअअट्ठाविअमण्णु—' Sanskrit *chāyā* of this verse would be :—

"हृदयस्थापितमन्युमपरोषमुखीमपि मां प्रसादयन् ।
अपराद्धस्यापि न खलु ते बहुज्ञ रोषितुं शक्यम् ॥'

In MS. D. however the *gāthā* is found in a widely different form : e.g.

1 भणामि for भणिमो in MS. D.

Section Page.

हिअअट्ठिअसंतक्ख अणरुट्ठमुहं सु मं पसाएन्त ।
अवरद्धस्स ण हु ए ण अत्तम्मि ओसक्कम् ॥[1]

§ 47. 124. 'जाएज्ज वणुद्देसे—' The Sanskrit *chāyā* of this *gāthā* is as follows :—

'जायेय वनोद्देशे कुब्ज एव पादपो गलितपत्रः ।
मा मानुषे लोके त्यागैकरसो दरिद्रश्च ॥'

For the wretched condition of a liberal and well-to-do person reduced to a state of poverty refer to the piteous utterances of Cārudatta in S'ūdraka's *Mṛcchakaṭika*, Act. I. Compare also the following verse cited by Ānandavardhana in his *Vṛtti* on *Dhv*. III. 41 :

'कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं
वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते ।
वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते
न च्छायापि परोपकारकरिणी मार्गस्थितस्यापि मे ॥'

§ 48. 126. 'चन्दनासक्तभुजग—' For parallel ideas compare Daṇḍin's *Kāvyādarśa*, II. 238-239 :

"चन्दनारण्यमाधूय स्पृष्ट्वा मलयनिर्झरान् ।
पथिकानामभावाय पवनोऽयमुपस्थितः ॥
अभावसाधनायालमेवम्भूतो हि मारुतः ।
विरहज्वरसम्भूतमदनाग्न्यातुरे जने ॥"

§ 48. 126. 'ईसाकलुसस्स वि—' The Sanskrit *chāyā* of this Prakrit verse would be :—

---

1 This version closely agrees with the following as recorded in MS. B of Dr De's collation (Bhandarkar Oriental Institute MS. No. 257 of 1875-76 in S'āradā script.) :—

"हिअअट्ठिअमन्तस्वं अनुट्ठमुखं सु पसाएन्त ।
अवरुद्धस्स ण हु एण अरुसिओ सक्कं" इति ॥

Section. Page.

'ईर्ष्याकलुषस्यापि तव मुखस्य नन्वेष पूर्णिमाचन्द्रः ।
अद्य सादृश्यं प्राप्य अङ्गे इव न माति ॥''

§ 48. 126. 'त्रासाकुलः परिपतन्—' This is Māgha's *Śiśupālavadha*, V. 26. The reading adopted by Mallinātha in foot *c* is : 'तस्थौ तथापि °क्वचिदङ्गनानाम्'. Mallinātha explains it as follows :—

"त्रासाकुलो जनदर्शनाद्भयविह्वलोऽत एव निकेतान् निवेशान् परितः सर्वतः । 'अभितः परितः—' इत्यादिना द्वितीया । परिपतन् धावन् मृगो हरिणः कैश्चिदपि धन्विभिर्धनुष्मद्भिः ।.... पुम्भिर्नान्वबाधि नानुयातः । बध्नातेः कर्मणि लुङ् । तथाप्यङ्गनानामाकर्णपूर्णा विस्तीर्णा आकृष्टाश्च ये नयनान्येवेषवस्तैर्हता ईक्षणश्रीर्यस्य सः । अतः क्वचिदपि न तस्थौ, किन्तु वीरविशिखापाताभावेऽप्यङ्गनापाङ्गविशिखापातात् पलायित एवेति भावः । अत्र जनालोकनोत्थभयहेतुकस्य मृगानवस्थानस्याङ्गनापाङ्गेषुहतिहेतुकत्वोत्प्रेक्षणाद्धेतूत्प्रेक्षा । सा च व्यञ्जकाप्रयोगात् प्रतीयमाना । हेतोश्च हतेक्षणश्रीरिति विशेषणगत्योक्तत्वात् काव्यलिङ्गमिति सङ्करः ॥"

§ 49. 129. 'रम्या इति प्राप्तवतीः पताकाः—' —This is Māgha's *Śiśupālavadha*, III. 53. Compare the following extract from Mallinātha's comm. on this verse :—

"....वधूभिः सममसेवन्त वधूसहिता असेवन्तेत्यर्थः । अत्र वधूनां वलभीनां च प्रकृतानामेव धर्मसाधर्म्यणौपम्यावगमात् केवलप्रकृतगोचरा तुल्ययोगिता, न श्लेषः । तत्र विशेष्यस्यापि श्लिष्टत्वनियमात् । यथाहुः—

'प्रस्तुतानां तथान्येषां केवलं तुल्यधर्मतः ।
औपम्यं गम्यते यत्र सा मता तुल्ययोगिता ॥'

—इति ॥"

Section. Page.

§ 54. 136. 'यत्र प्रतीयमानोऽर्थः—' (*Kārikā*). MS. A reads प्रम्लानत्वेन for प्रम्लिष्टत्वेन, while in MS. B it is read as प्रश्लिष्टत्वेन. The N.S.P. Edn. has the reading प्रक्लिष्टत्वेन.

§ 54. 137. 'कमलाअरा णँ मलिआ—' This is from Hāla's *Sattasaī* (II. 10). The Nirṇayasāgara text of the *Sattasaī* reads व्वूढम् for फलिहं. The °*Locana* gives the *chāyā* as follows :—

'कमलाकरा न मलिता हंसा उड्डायिता न च सहसा ।
केनापि ग्रामतडागेऽभ्रमुत्तानितं क्षिप्तम् ।।'

and remarks 'अन्ये तु पिउच्छा पितृष्वसः इत्यमामन्त्रते', According to Dhanapāla's *Pāiyalacchī* (v. 253) पुप्फिया and पिउच्छा are synonyms. Hemacandra gives पुप्फा as a synonym for पितृष्वसा. See *Deśīnāmamālā*, VI. 52 (Pischel's Edn 1938). For a closely similar instance of apparent *naïveté* (मुग्धमातिशयः) on the part of simple-hearted women, cf.—

"अद्रेः शृंगं हरति पवनः किंस्विदित्युन्मुखीभि-
र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।"
—*Meghadūta*, I. 14.

§ 54. 137. 'वाणीरकुडङ्गोड्डीण —'—°*Locana* gives the *chāyā* as follows :—

'वेतसलतागहनोड्डीनशकुनिकोलाहलं शृण्वत्याः ।
गृहकर्मव्यापृताया वध्वाः सीदन्त्यङ्गानि ।।'

This *gāthā* is cited by Mammaṭa also in his *Kāvya-Prakāśa*, Ullāsa V : 'वानीरो वेतसवृक्षः, कुडङ्गं लतागहनम्'—Rūyyaka's *Kāvyaprakāśa-Saṃketa*.

Section Page

§ 54. 137. 'उच्चिणसु पडिअकुसुमं—' --The Sanskrit *chāyā* of the *gāthā* as given in the °*Locana* is :—

उच्चिनु पतितं कुसुमं मा धुनीहि शेफालिकां हालिकस्नुषे ।
एष ते विषमविपाकः श्वशुरेण श्रुतो वलयशब्दः ।।'

APPENDIX II

A. Alphabetical Index of *Kārikās* in the *Dhvanyāloka, Uddyota* II.

		Page	Section	Serial number
अर्थान्तरे संक्रमितम्	..	1	1	1
अर्थशक्त्युद्‌भवस्त्वन्यः	..	99	37	22
अर्थशक्तेरलंकारः	..	113	40	25
अलंकारान्तरस्यापि	..	114	41	26
अलंकारान्तरव्यङ्ग्य°	..	136	53	30
अव्युत्पत्तेरशक्तेर्वा	..	140	55	32
असंलक्ष्यक्रमोद्द्योतः	..	7	6	2
आक्षिप्त एवालंकारः	..	71	32	21
क्रमेण प्रतिभात्यात्मा	..	70	31	20
तमर्थमवलम्बन्ते	..	29	13	6
तस्याङ्गानां प्रभेदा ये	..	43	19	12
दिङ्मात्रं तूच्यते येन	..	44	20	13
ध्वन्यात्मभूते शृङ्गारे	..	46	21	15
ध्वन्यात्मभूते शृङ्गारे समीक्ष्य		54	24	17
निर्व्यूढावपि चाङ्गत्वे	..	55	25	19
प्रधानेऽन्यत्र वाक्यार्थे	..	13	9	5
प्रौढोक्तिमात्रनिष्पन्न°	..	108	39	24
यत्र प्रतीयमानोऽर्थः	..	136	54	31
रसभावतदाभास°	..	8	7	3
रसाक्षिप्ततया यस्य	..	48	22	16
रूपकादिरलंकारवर्गः	..	114	41	26
रौद्रादयो रसा दीप्त्या	..	36	16	9
वाच्यवाचकचारुत्व°	..	11	8	4
विवक्षा तत्परत्वेन	..	55	25	18
व्यज्यन्ते वस्तुमात्रेण	..	134	52	29

		Page	Section	Serial number
शरीरीकरणं येषां	..	133	51	28
शब्दार्थशक्त्याक्षिप्तोऽपि	..	103	38	23
शृङ्गार एव मधुरः	..	31	14	7
शृङ्गारस्याङ्गिनो यत्नाद्	..	44	20	14
शृङ्गारे विप्रलम्भाख्ये	..	35	15	8
श्रुतिदुष्टादयो दोषाः	..	40	18	11
समर्पकत्वं काव्यस्य	..	38	17	10
सर्वेष्वेव प्रभेदेषु	..	141	55	33

B. Alphabetical Index of *Vṛtti*-verses.

		Page	Section
यमकादिनिबन्धे तु	..	54	§ 23
रसभावादितात्पर्यम्	..	20	§ 11
रसवन्ति हि वस्तूनि	..	54	§ 23
रसाभासाङ्गभावस्तु	..	54	§ 23

C. Alphabetical Index of Illustrative Quotations in the *Vṛtti*.

		Page.	Section
अम्बा शेतेऽत्र वृद्धा	..	104	§ 38
अंकुरितः पल्लवितः	..	130	§ 50
आक्रन्दाः स्तनितैः	..	62	§ 28
ईसाकलुसस्स वि तुह	..	126	§ 48
उद्दामोत्कलिकां विपाण्डुररुचं	..	58	§ 27
उन्नतः प्रोल्लसद्धारः	..	85	§ 34
उच्चिणसु पडिअकुसुमं	..	137	§ 54
एवंवादिनि देवर्षौ	..	99	§ 37
कपोले पत्राली करतल	..	48	§ 22
कमलाअरा णँ मलिआ	..	136	§ 54
किं हास्येन न मे	..	17	§ 10
कोपात् कोमललोलबाहुलतिका°	..	66	§ 29
क्षिप्तो हस्तावलग्नः	..	17	§ 10

		Page	Section
खं येऽत्युज्ज्वलयन्ति	..	96	§ 36
गअणं च मत्तमेहं	..	6	§ 5
चञ्चद्भुजभ्रमितचण्ड°	..	36	§ 16
चक्राभिघातप्रसभाज्ञयैव	..	57	§ 26
चलापाङ्गां दृष्टिं स्पृशसि	..	55	§ 25
चमहिअमाणसकञ्चण°	..	81	§ 33
चन्दमऊएहि णिसा	..	115	§ 43
चन्दनासक्तभुजग°	..	126	§ 48
जाएज्ज वणुद्देसे	..	124	§ 47
तरङ्गभ्रूभङ्गा क्षुभितविहग°	..	22	§ 12
तन्वी मेघजलार्द्रपल्लवतया	..	22	§ 12
तस्या विनापि हारेण	..	81	§ 33
तं ताण सिरिसहोअर°	..	120	§ 45
ताला जाअन्ति गुणा	..	4	§ 3
तेषां गोपवधूविलाससुहृदां	..	22	§ 12
त्रासाकुलः परिपतन्	..	126	§ 48
दत्तानन्दाः प्रजानां	..	85	§ 34
दृष्टया केशव ! गोपरागहृतया	..	85	§ 34
देव्वाएत्तम्मि फले	..	122	§ 46
नो कल्पापायवायोः	..	61	§ 28
प्राप्तश्रीरेष कस्मात्	..	116	§ 44
भ्रमिमरतिमलसहृदयतां	..	81	§ 33
यत्र च मातङ्गगमिन्यः	..	86	§ 34
येन ध्वस्तमनोभवेन	..	72	§ 32
यो यः शस्त्रं बिभर्त्ति	..	36	§ 16
रविसंक्रान्तसौभाग्यः	..	5	§ 4
रक्तस्त्वं नवपल्लवैः	..	58	§ 27
रम्या इति प्राप्तवतीः पताकाः	..	129	§ 49
लावण्यकान्तिपरिपूरित°	..	116	§ 44
वत्से मा गा विषादं	..	104	§ 38
वाणीरकुडङ्गोड्डीण°	..	137	§ 54

		Page	Section
वीराणं रमइ घुसिणरुणम्मि	..	119	§ 45
श्यामास्वङ्गं चकितहरिणी°		67	§ 30
श्लाघ्याशेषतनुं सुदर्शनकर.	..	81	§ 33
समवाय इव विरोधिनां पदार्थानाम्	..	94	§ 35
संकेतकालमनसं विटं	..	100	§ 37
सज्जेइ सुरहिमासो	..	108	§ 39
स वक्तुमखिलान्‍ शक्तः	..	120	§ 45
सवकशरणमक्षयमधीशं	..	94	§ 35
साअरविइण्णजोव्वण°	..	108	§ 39
सिहिपिच्छकण्णऊरा	..	109	§ 39
स्निग्धश्यामलकान्ति	..	3	§ 2
हिअअट्ठाविअमण्णु	..	122	§ 46

